स्वरूपमेवं जानीयात् सर्वशान्तिषु कर्मसु ॥

* * * *

विकीर्णकेशी रोगाणां प्रतिरूपं प्रकल्पयेत् ॥

इति शौनकीयऋग्विधान उत्तरकल्पः ॥

Beginning:

अथ द्वितीयः । ऋषय ऊचुः

शृण्वन्तु ऋषयस्सर्वे गुह्याद्गुह्यतमं महत् ।
दशश्लोक्यमिदं स्तोत्रं वदामि ध्यानपूर्वकम् ॥
अङ्कुशं चाक्षसूत्रं च पाशपुस्तकधारिणीम् ।
मुक्ताहारसमायुक्तां देवीं ध्यायेच्चतुर्भुजाम् ॥

End:

प्रथमं भारती नाम द्वितीयं च महेश्वरी ।
तृतीयं शारदा देवी चतुर्थं कंसमर्दिनी ॥

पञ्चमं च जगन्माता षष्ठं चैव तु पार्वती ।
सप्तमं चैव कामाक्षी अष्टमं ब्रह्मपुत्रिका ॥
नवमं चैव वाराही दशमं ब्रह्मचारिणी ।
एकादशं तु वाग्वाणी द्वादशं वरदाम्बिका ॥

Colophon :

इति शौनकीयऋग्विधाने उत्तरकल्पे द्वितीयस्समाप्तः ।
अथ शिष्टरोगमूर्तिलक्षणम् । त्रिदोषशूलस्वरूपम् ।
त्रिदोषशूलरोगस्स्यात् दशहस्तः खराननः ।
त्रिलोचनश्शक्तिशूलपाशखड्गाङ्क(द्वाङ्ग)शस्त्रभृत् ॥
त्रिशूलत्रितयैर्मर्त्यान् आपात्य क्षतयन् हृदि ।
नासानिहिततर्जन्या मोहयन् पारिपार्श्वकान् ॥

End :

पानात्पयःप्रभूताङ्गः पाण्डुरायतविग्रहः ।
चक्राङ्कुशखरः क्रूरः कुटिलेक्षणलालसः ॥

No. 885. ऋग्वेदलक्षणम्.

ṚGVĒDALAKṢAṆAM.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 20. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Incomplete.

Begins on fol. 3*a*. The other works contained in the MS. are Vaiśvadēvavidhiḥ 1*a*, Vikṛtivalli 13*a*.

This is a work on the various kinds of Pādas or metrical lines found in the 8 Aṣṭakas of the Ṛgvēda.

Beginning :

देवा वै प्रथमेनाह्नेन्द्राय वज्रं समभरंस्तं द्वितीयेनाह्नासिञ्चंस्तृतीयेनाह्नाप्या ऋतेन मित्रावरुणादस्रायुवाकवस्सुताः ब्रह्म च वरुणश्शृणु । अथ द्वादशेन

पादः त्वन्नो अग्ने पित्रोरुपस्थ आराय स्पूर्धि स्वधा वोऽति हिते । अत्राह तत्कण्व एषां कण्वतमः ।

End:

आपो दीर्घं विश्वजिते अरिष्टिमा नो ब्रह्मण्यरिष्टं तातूत इन्द्रवधेन दस्युमिन्वकरां वावशाना ग्रावाणा वावृधाना आन्यूनमयं वां यन्नासत्याय द्वां कक्षीवानुभे भद्रे उदिरः ।

No. 886. ऋग्वेदपरिभाषा.

ṚGVĒDAPARIBHĀṢĀ.

Pages, 11. Lines, 20 on a page.

Begins on fol. 46*a* of the MS. described under No. 879.

Incomplete.

This work mentions the number of stanzas, and the names of the Ṛṣi, Dēvata and Chandas, in relation to every hymn in the Ṛgvēda.

Beginning:

अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीके ऋक्सङ्ख्याऋषिदैवतछन्दांस्यनुक्रमिष्यामः यथोपदेशं न ह्येतज्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिर्मन्त्राणां ब्राह्मणार्षेयछन्दोदैवतविज्ञानाध्यापनाभ्याम् । स श्रेयोऽधिगच्छति

End:

आदौ पञ्चाक्षरौ पादौ तृतीयसप्ताक्षरश्चतुर्थो नवाक्षरस्सप्तम्याः पञ्चको मुख्योदित इत्यर्थः ।

तृतीयस्सप्तको नवकश्चे ऋक्कृतं चिद्धिष्म ४ ५ ५ ७ ९ । अष्टम्याः पञ्चकपादश्चतुष्कसप्तकस्त्रैष्टुभश्च शिवा न सङ्ख्येति । ऋक् ५ ४ ७ ११

No. 887. ऋग्वेदपरिभाषा.

ṚGVĒDAPARIBHĀṢĀ.

Substance, palm-leaf. Size, 16 × 1⅜ inches. Pages, 6. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Complete.

Begins on fol. 3*a*. The other works herein are —Vēdāṅgajyautiṣam 10*a*, Chandas 6*a*, Ṛgvēdānukramaṇikā 10*a*, Saptasvaram 35*a*.

Beginning: Same as above.

End:

ब्रह्मजाया जुहूर्नाम अगस्त्यस्य स्वसा दितिः ।
इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी ॥
लोपामुद्रा च नद्यश्च यमी नारी च शश्वती ॥
श्रीर्लाक्षा सार्पराज्ञीव श्रद्धा मेधा च दक्षिणा ।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः ॥

The date of copying is given in Telugu as follows :—

Copied by Kṛṣṇa on the 15th of Kārtika, Thursday in the year Siddhārti.

No. 888. ऋग्वेदपरिभाषा.

ṚGVĒDAPARIBHĀṢĀ.

Substance, palm-leaf. Size, 12×1¼ inches. Pages, 43. Lines, 7 on a page. Character, Kanarese. Condition, good. Appearance, old.

Incomplete.

Begins on fol. 14*a*. The other works contained in the codex are Śikṣāśāstram 1*a*, Vēdacchandas 4*a*, Kālajñānam 8*b*, Śamānam 10*b*, Viliṅghyam 36*a*.

Same as the last.

After the 31st fol. in the work under notice, there are four leaves, numbered as 19 to 22, which do not continue consecutively the work. However, they also treat of the same subject.

Beginning:

ऋग्वेदाम्नाये शाकलके सूक्तप्रतीके ऋक्संख्याऋषिदैवतछन्दांस्यनुक्रमिष्यामः—यथोपदेशं न ह्येतद्ज्ञानमृते श्रौतस्मार्तकर्मप्रसिद्धिर्मन्त्राणां ब्राह्मणार्षेयच्छन्दोदैवतविद्याजनाध्यापनाभ्याम् । स श्रेयोऽधिगच्छत्येताभ्यामेव । अनेवंविदो यातयामानि च्छन्दांसि भवन्ति । स्थाणुं वर्छति गर्तं वा पात्यते प्रमीयते वा पापीयान् भवतीति विज्ञायते

End:

सौपर्णी नवमी वज्रसंस्तुतिरयमिति । द्व्यृचेनेन्द्र आत्मानमस्तौदुपान्त्ये वाच्योधक्षोल(ऽथ षोड)श जमदग्निर्भार्गवो मैत्रावरुणं प्रागाधं त्रित्रिष्टुबन्तं तृतीया गायत्र्या परासतो बृहतिस्तोत्रं राजस्रुक् सपादादित्याश्विन्यौ वायव्ये सौर्यौ ॥

No 889. ऋग्वेदानुक्रमणिका.

ṚGVĒDĀNUKRAMAṆIKĀ.

Pages, 45. Lines, 20 on a page.

Begins on fol. 21*a* of the MS. described under No 879.

Complete.

A work, similar to the last, but by a different author.

Beginning:

अग्निं नवमधुच्छन्दो वैश्वामित्रा वायो वायव्यैन्द्रवायवमैत्रावरुणास्तृचाश्विना द्वादश । अश्विनैन्द्रवैश्वदेवसारस्वतास्तृचास्सप्तैताः प्रउगदेवताः सुरूपकृत्स्नं दशैन्द्रमा तु युजन्त्या दहेत्येताः

End:

तदेतत्सूक्तसहस्रं ससप्तदशकं सपादाधिकम् । वर्गाणां द्वे सहस्रे चतुर्विंशोतरे । ऋचां दशसहस्राण्यृचां [दशसहस्राणि ऋचां] पञ्चशतानि च ऋचामशीतिः । पादश्च पारायणं स प्रकीर्तितम् । शाकल्यदृष्टे पदलक्षमेकं सार्द्धं

तथा त्रिसहस्रयुक्तम् अष्टौ शतानि षड्विंशतिः पदसङ्ख्या प्रकीर्तिता । ऋग्वेदपारायणपाठे शाकल्ये शैशिरीयके नमश्शौनकाय नमः परमऋषिभ्यः ॥

* * * *

सूक्तमध्ये योऽवसाने भ्रष्टवीर्यस्स पापकृत् ।
गतासुर्मुनिहन्ता च रौरवं नरकं व्रजेत् ॥
अविदित्वा ऋषिच्छन्दोदैवतं योगमेव च ।
योऽध्यापयेज्जपेद्यस्तु पापीयान् जायते सुतः ॥
एकैकस्य ऋषेर्ज्ञानात् सहस्रायुर्भवेद्द्विजः ।
छन्दसामपि सालोक्यं छन्दोज्ञानादवाप्र(प्नु)यात् ॥

No. 890. ऋग्वेदानुक्रमणिका.

ṚGVEDĀNUKRAMAṆIKĀ.

Pages, 148. Lines, 6 on a page.

Begins on fol. 10*a*. of the MS. described under No. 887.

Complete.

The copying is said in the end to have been completed on Tuesday, the 11th, of the bright fortnight of Pramādi year; and the copyist's name is said to be Śrī Rāmasētu, a resident of Garakubākapura.

At the end of the work the characteristics of the various modes of Udātta-svara are mentioned in a few verses.

No. 891. कालनिर्णयशिक्षा.

KĀLANIRṆAYAŚIKṢĀ.

Pages, 4. Lines, 19 on a page.

Begins on fol. 45*a* of the MS. described under No. 864.

Complete.

This work treats of the Mātrā, or prosodial time-measure of letters, and of accents and stops.

Beginning:

प्रातिशाख्यादिशास्त्राणि मया वीक्ष्य यथामति ।
वेदतत्त्वावबोधार्थमिह कालो निरूप्यते ॥

अखण्डवर्णविषयो वर्णांशविषयोऽपि च ।
विरामविषयश्चेति त्रिविधः काल उच्यते ॥

स्वरवर्णविरामाणां भिन्नवाग्वृत्तिवर्त्तिनाम् ।
ऐकरूप्येण कालस्य कथनन्नोपपद्यते ॥

मध्यमां वृत्तिमाश्रित्य मया चेयं कृतिः कृता ।
प्रातिशाख्ये निषिध्यान्या यस्मात्सैकैव बोध्यते ॥

End:

परेण नित्यसंबन्धं प्रादिं परपदन्तथा ।
एकस्वराणां चादीनां प्रादीनामिति तद्द्वयम् ॥

यो यो विरामकालः प्रागृगादौ समुदीरितः ।
अङ्गीकृतस्यार्द्धमात्रं तु न सोऽधिक इष्यते ॥

Colophon:

कालनिर्णयशिक्षा सम्पूर्णा ॥

No. **892.** कालनिर्णयशिक्षा सव्याख्या.

KĀLANIRṆAYAŚIKṢĀ WITH COMMENTARY.

Pages, 13. Lines, 22 on a page.

Begins on fol. 100*b* of the MS. described under No. 867. Complete.

This commentary is by Muktīśvarācārya on the Śikṣā noticed above.

Beginning:

प्रातिशाख्यादिशास्त्राणि मया वीक्ष्य यथामति ।
वेदतत्त्वावबोधार्थमिह कालो निरूप्यते ॥

श्रोतृबुद्धिमनस्समाधानार्थं प्रकरणे प्रतिपाद्यमर्थं दर्शयति इह कालो निरूप्यत इति। अनेन विषयो दर्शितः। निष्प्रयोजने प्रकरणे प्रेक्षावत्प्रवृत्त्यनुपपत्तेस्तत्सिद्ध्यर्थं स्वग्रन्थस्य प्रयोजनं दर्शयति वेदतत्त्वावबोधार्थमिति। वेदस्य तत्त्वस्यावबोधः वेदतत्त्वावबोधः तदर्थं वेदतत्त्वावबोधार्थम्। अनेनार्थज्ञानकामिनोऽधिकारो दर्शितः। स्वग्रन्थस्य मूलन्दर्शयति प्रातिशाख्यादिशास्त्राणीति। प्रतिशाखासंबन्धि प्रातिशाख्यम्

End:

एक एव स्वरो येषां ते एकस्वराः तेषां पदानां योऽयं चादेः पूर्वपदान्तवद्भावः प्रादेः परपदादिवद्भावश्चोक्तः तदुभयं चादीनां प्रादीनामेकस्वरत्व एव भवति। बहुस्वरत्वे

प्रपरापसमन्ववनिर्दुर्व्याङ्न्यध्यप्यतिसूदभयश्च।
प्रतिना सह लक्षयितव्याः पर्युपयोरपि लक्षणमत्र॥
इति प्रादयो विंशतिः चादयोऽनन्ताः॥

Colophon:

इति श्रीमुक्तीश्वराचार्यकृतौ कालनिर्णयदीपिका समाप्ता॥

Beginning:

आदावनुक्ते स्रवति परस्ताच्च विशीर्यते।
तस्मात्समुच्चरेद्ब्रह्म रक्षायै छन्दसां स्फुटम्॥
ग्रामे मध्यन्दिने चैव तस्य कतिधा भवेत्।
एकं द्वे पञ्चकं त्वेकमवसान इति क्रमात्॥
वेदेन सह यद्वाक्यमुदात्तान्तं प्रकीर्तितम्।
यत्र भिन्नत्वमाप्नोति स्वरितं चाधिगच्छति॥

End:

प्र, परा, अप, सम्, अनु, अव, निः, दुः, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप, एते प्रादयो विंशतिः। चादयोऽनन्ता इति॥

No. 893. कौहलीयशिक्षा.
KAUHALĪYAŚIKṢĀ.

Pages, 12. Lines, 17 on a page.

Begins on fol. 49*a* of the MS. described under No. 864.

Complete.

A work on the characteristics of Vēdic accents as propounded by Kauhala.

Beginning:

अथ शीक्षां प्रवक्ष्यामि कौहलीयमतानुगाम् ।
स्वरादिनिर्णयस्तत्र क्रियते तन्निबोधत ॥
उदा(त्ता)श्चानुदात्ताश्च स्वरितः प्रचयस्तथा ।
इति चत्वार भागे हि(एवेह) स्वराः प्रोक्ता मनीषिभिः ॥
उच्चैरुच्चार्यते यस्तु स उदात्त उदाहृतः ।
आयामे दृढता सौक्ष्म्यं गात्रेङ्गचेषु तथा गले ॥
उच्चत्वकारकानेतानाहुः प्रज्ञा विशेषतः ।
नीचैरुच्चार्यते यस्तु सोऽनुदात्तोऽभिधीयते ॥
प्रसृता मृदुता स्थौल्यं गात्रादेः कारकं विदुः ।
नीचत्वे स्वरितः प्रोक्तः तयाः(दा) सत्वान इष्यते ॥

End:

औष्मस्वरान्ते चाप्येवं निपुणन्तन्निबोधत ।
अत्र यो विद्यते यस्य तद्विदां प्रय . . ॥
शास्त्रमेतत्त . सव्य ऋषिरस्य प्रसीदति ।
शिक्षामिमान्तु योऽधीते वेदतत्त्वप्रकाशिकाम् ।
अतुलामश्नुते कीर्तिं परे(रत्रेह च शाश्वतीम्) ॥

Colophon:

कौहलीयशिक्षामूलं समाप्तम् ॥

No. 894. गायत्रीगानलक्षणम्.

GĀYATRĪGĀNALAKṢAṆAM.

Substance, palm-leaf. Size, 17⅜ × 1⅜ inches. Pages, 13. Lines, 10 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 68*a*. The other work herein is Sāmatantrasūtrabhāṣyam 1*a*.

Incomplete; contains Prapāṭhakas 1 & 2 in the Saṁjñāprakaraṇa.

This work explains how the Gāyatrī-prayer has to be chanted when forming part of the Sāmavēda.

Beginning:

सावित्र्यां गायत्रीगानं देवताध्याय उक्तम् । तथा च ब्राह्मणं भवति—अथातो गायत्रमाग्नेयं भक्त्या भवतीति देवानां वा ऋषीणां वा परमेष्ठिनो वा प्राजापत्यस्य साम सावित्रीगेयं यत्रागीतं तत्सवितुर्वरेणियोमिति ।

End:

ओ इ त्रिक ओ इ प्रतु ओ इ ययुरो इ चमाता इ वसूमागाश्चा इ मृडा । 5 हो तो तव द होता उ तव द इत्येताः ओंकारादिन्यस्संज्ञा भवन्ति । समिध्द ओ इ पुष्येम यदीम हन्त्यभीनवन्ते होतोतवद ॥

6 त्रायोदशो दशकः हो हवे ह्वे सञ्चाभ्यः ॥

Colophon:

इति संज्ञाप्रकरणे द्वितीयः प्रपाठकः ॥

No. 895. गायत्रीगानलक्षणम्.

GĀYATRĪGĀNALAKṢAṆAM.

Substance, paper. Size, 11 × 8¾ inches. Pages, 22. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the Samjñāprakaraṇa. Begins on fol. 92*b*. The other work herein is Sāmatantrasūtrabhāṣyam 1*a*.

This is a copy made in 1896 from the MS. described under the last number.

No. 896. गायत्रीस्वरलक्षणम्.

GĀYATRĪSVARALAKṢAṆAM.

Substance, palm-leaf. Size, 14¾ × 1 inches. Pages, 2. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Śrīcūrṇapratiṣṭhāvidhiḥ 2*a*, Bhaktapratiṣṭhāvidhiḥ 3*a*, Dadhyañjalihōma 6*a*, Padmākṣatulasīmālikāpratiṣṭhā 7*a*, Nārāyaṇāṣṭōttaraśatanāmastōtram 10*a*, Sudarśanahōmavidhiḥ (13*a*).

Complete.

This work gives the order as well as the number of the various kinds of accents to be found in the Gāyatrī prayer, and mentions the way in which these accents are to be indicated.

Beginning:

गायत्रीस्वरनिर्णयः

उदात्तस्वरितश्चैव ह्यनुदात्त उदात्तकः ।
उदात्तस्वरितश्चैव प्रचयश्चानुदात्तकः ॥
उदात्तस्वरितश्चैव ह्यनुदात्त उदात्तकः ॥
स्वरितः प्रचयश्चैव प्रचयः प्रचयस्तदा ।
उदात्तश्चानुदात्तश्च उदात्तस्वरितस्तदा ॥
प्रचयश्चानुदात्तश्च उदात्तस्वरितस्तदा ।
उदात्तो वसुसङ्ख्यस्स्यात् बाणसङ्ख्योऽनुदात्तकः ॥
स्वरितो रससङ्ख्यस्स्यात् प्रचयो बाणसङ्ख्यकः ।

End:

यत्ते वयमिति द्वाभ्यां जुहुयादाहुतिद्वयम् ।
एकमेव स्वरूपेण परेण च निरूपितम् ॥
इष्टप्राप्तिरनिष्टस्य निवृत्त(त्ति)श्चेति कथ्यते ।

No. 897. चरणव्यूहः.

CARAṆAVYŪHAḤ.

Pages, 6. Lines, 19 on a page.

Begins on fol. 235*b* of the MS. described under No. 199.

Complete.

This work gives the names of the various schools and recensions of the four Vēdas as classified by Vyāsa.

Beginning:

अथातश्चरणव्यूहं व्याख्यास्यामः—तत्रैवोक्तं; चातुर्वेद्यं चत्वारो वेदा ज्ञाता भवन्ति ऋग्वेदो यजुर्वेदस्सामवेदो ह्यथर्वणवेदश्चेति। तत्र ऋग्वेदस्य सप्तभेदा भवन्ति—चर्चाश्रावकचर्चकश्रवणे पारक्रमपारक्रमशरक्रमशरक्रम-मदण्डेश्चेति। चतुष्पारायणमेतेषां शाखाः पञ्च भवन्ति—आश्वलायनी साङ्ख्यायनी शाकला बष्कला माण्डूकाश्चेति। तेषाम[ध्ययम]ध्याय(या): चतुष्षष्टिः, मण्डलानि च दश, वर्गाणां परिसङ्ख्यातं द्वे सहस्रे षडुत्तरे।

सहस्रमेकं सक्तानां निर्विशङ्कं विकल्पिनाम्।
दश सप्तसु पठ्यन्ते सङ्ख्यातं वै पदक्रमम्॥

End:

लोकातीतं महाशान्तममृतत्वन्तु गच्छत्यों नम इत्याह भगवान्व्यासः पाराशर्यो व्यासः पाराशर्यः।

तं वेदशास्त्रपरिनिर्गै(ष्ठि)त शुद्धबुद्धिं
चर्माम्बरं सुरमुनन्द्रिसुतं कवीन्द्रम्।
कृष्णात्विषं कनकपिङ्गजटाकलापं
व्यासं नमामि शिरसा तिलकं मुनीनाम्॥
मुनिं स्निग्धाम्बुदाभासं वेदव्यासमकल्मषम्।
वेदावासं सरस्वत्यावासं व्यासं नमाम्यहम्॥

Colophon :

चरणव्यूहं समाप्तम् ॥

No. 898. चरणव्यूहः.

CARAṆAVYŪHAḤ.

Substance, palm-leaf. Size, $7\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 12. Lines, 11 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 11*a*. The other works herein are Navagrahārādhanakramaḥ 1*a*, Rāmasahasranāmāvaliḥ 17*a*, Mahānyāsaḥ 42*a*, Anantavratanaṣṭadōṣakaprāyaścittam 56*a*, Yamunāpūjā 64*a*.

Complete.

Same as the last, excepting that the colophon is omitted herein.

No. 899. चरणव्यूहः.

CARAṆAVYŪHAḤ

Pages, 7. Lines, 6 on a page.

Begins on fol. 187*a* of the MS. described under No. 537.

Complete. Same as the last.

No. 900. छन्दस्.

CHANDAS

Pages, 8. Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 887.

Complete.

This is a work on Vedic prosody and consists of short Sūtras followed by brief explanations.

Beginning :

अथ छन्दांसि । अथेति प्रस्तावे । अनन्तरं छन्दांसि प्रस्तूयन्त इत्यर्थः । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्टयत्यष्टिधृ -

त्यतिधृतयः । चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि । गायत्री (24) उष्णिक् (28) अनुष्टुप् (32) बृहती (36) पङ्क्तिः (40) त्रिष्टुप् (44) जगत्यतिजगती (52) शक्करी (56) अतिशक्करी (60) अष्टिः (64) अत्यष्टिः (68) धृतिः (72) अतिधृतिः (76).

End:

सप्तम्याः पञ्चकौ मुख्यौ आदित इत्यर्थः तृतीयस्सप्तको नवकश्चेति । निरुक्त[कृ]तं चिद्धिष्म—5-5-7-9—अष्टम्याः पञ्चकपादश्चतुष्कस्सप्तकस्त्रैष्टुभश्च शिवा नस्सख्येति 8-ऋक्-5-4-7-11

No. 901. छन्दस्.

CHANDAS

Pages, 10. Lines, 6 on a page.

Begins on fol. 4*a* of the MS. described under No. 888.

Complete.

This also is a work on prosody. The stanzas in the beginning seem to be taken from the commentary of Yādavaprakāśa on Chandōviciti-sūtra.

Beginning:

मयरसतजभनलगसम्मितं
भ्रमति वाङ्मयं जगति यस्य ।
स जयति पिङ्गलनागः
शिवप्रसादाद्विशुद्धमतिः ॥
त्रिगुरुं विद्धि मकारं
लघ्वादिसमन्वितं यकाराख्यम् ।
लघुमध्यमं तु रेफं
सकारमन्ते गुरुनिबद्धम् ॥
लघ्वन्त्यं हि तकारं
जकारमुभयोर्लघुं विजानीयात् ।

आदिगुरुं च भकारं
नकारमिह पैङ्गले त्रिलघुम् ॥
दीर्घं संयोगपरं
तथा स्वरव्यञ्जनान्तमूष्मान्तम् ।
सानुस्वारं(च)गुरुं क्वचिदवसानेऽपि लघ्वन्त्यम् ॥
आदिमध्यावसानेषु यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ॥

End:

चतुश्शतं ष[ष्टा]विं(ड्वि)शतिर्विंशतिर्युगपरान्तिका त्रयोदश वृत्तं गावादौ विंशतिर्विंशतिर्यवमती त्रीणि यतिर्विंशतिर्वातोर्मिमष्टादश। प्रहर्षिणी विंशतिः। शार्दूलविक्रीडितं पञ्च। दशात्रानुस्तं सप्तदशाष्टादश ॥

Colophon:

इति छन्दस्समाप्तः(म्) ॥

No. 902. छन्दोनिदर्शनम्.
CHANDŌNIDARŚANAM.

Substance, palm-leaf Size, 16 × 1¼ inches. Pages, 4. Lines, 4 on a page. Character, Telugu Condition. injured. Appearance, old.

Begins on fol. 24*a*. The other works herein are Jaṭālakṣaṇam 1*a* and Vikṛtikaumudī 6*a*.

Incomplete.

The various kinds of Vēdic metres are herein illustrated from the Ṛg-Vēda.

Beginning:

अग्निमीले गायत्र्याग्ने तमद्य पदपङ्क्तिस्ता म अश्व्यानामुष्णिग्गर्भा त्वावतः पादानिदृत्पुरूतमं मतिनिचृत्स नुन्वे यदमेध्या . . गायत्री त्वमग्ने यज्ञानां वर्धमाना वः प्रणीतप्रतिष्ठाः प्रेष्ठमु प्रियाणां ह्वसीयसी न नो वाजेष्विति द्विपदा गायत्री ।

End:

त्रयोऽष्टका जागतश्च तथैवाष्टक इत्यपि ।
प्र वो महेऽतिजगती प्रो ष्वस्मै शक्वरी मता ।
साकं जातोऽतिशक्वर्यावष्टिश्चेति त्रिकद्रुकः ।
अत्यष्टिरग्निं होतारं प्रोक्ता द(धृ)तिरवर्महः ॥
अति(धृ)तिर्यदस्य कर्मण(:) स हि शर्धो न धृ(तिः) ॥

Colophon:

इति निदर्शनानि (समाप्तानि) ॥

No. 903. छन्दोनिर्णयः.

CHANDŌNIRṆAYAḤ.

Pages, 8. Lines, 6 on a page. Character, Kanarese.

Begins on fol. 193*a* of the MS. described under No. 15.

Complete.

The metres of certain verses in the Ṛg-Vēda are herein specified.

Beginning:

अग्निमीले गायत्री तस्य नूनं त्रिष्टुप् यत्र ग्रावा त्रिष्टुप् यच्छिद्धि पाङ्क्तिराव इन्द्रं गायत्री शश्वत्त्रिष्टुप् त्रिश्चिन्नो जगती ह्वयामि त्रिष्टुप् क्रीलं वो गाय[त्र]ञ्यग्निर्विवस्व(स्वान)नुष्टुप्.

End:

प्र वो ग्रावाणो गायत्री प्र सूनवो अनुष्टुप्पतङ्गं जगतीत्यमूषु त्रिष्टुबुत्तिष्ठतादु(नु)ष्टुप्र(प्प्र) ससाहिषे त्रिष्टुब्विष्णुर्योनिं गायत्री ऋतञ्च सत्यञ्चानुष्टुबानुष्टुप् ॥

Colophon:

इति छन्दोनिर्णयस्समाप्तः ॥

No. 904. छन्दोविचितिसूत्रम्.

CHANDŌVICITISŪTRAM.

Pages, 8. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 371. Complete.

A work on Vēdic prosody.

Beginning:

अथातश्छन्दसां विचयं व्याख्यास्यामः। त्रयश्छन्दःपादा भवन्ति अष्टाक्षर एकादशाक्षरो द्वादशाक्षर इति। तत्तु मिश्रं दशाक्षरोऽष्टाक्षर आपञ्चाक्षरतायाः प्रतिक्रामति। विश्वेषां हित इत्याचतुरक्षरताया इत्येक आदशाक्षरताया अभिक्रामति। वयं तदस्य संभृतं वस्वित्येकाक्षर आनवाक्षरतायाः प्रतिक्रामति।

End:

प्रश्लिष्टमभिनिहितं क्षिप्रसन्धिरभिध्रुवम् ॥
एतानि सन्धिजातानि मिमानश्छन्दसोऽक्षरैः।
द्वैधं कुर्यादसंपूर्णे सम्पूर्णे किञ्चनेङ्गयेदिति ॥
छन्दसां विचयं जानन्यश्शरीराद्विमुच्यते।

छन्दसामेति सालोक्यमानन्त्या(न्त्य)म(श्चा)श्नुते श्रिय(या) मिति श्रिय(या)मिति ॥

Colophon:

इति छन्दोविचितिसूत्रं सम्पूर्णम् ॥

No. 905. छन्दोविचितिभाष्यम्.

CHANDŌVICITIBHĀṢYAM.

Substance, paper. Size, 12¾ × 7¾ inches. Pages, 46. Lines, 21 on a page. Character, Telugu, written in a rather illegible hand. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are Chandōviciti with commentary 23*b*, *ibid* 32*a*.

Incomplete.

Breaks off in the course of the commentary on the 43rd Sūtra of the fourth Adhyāya. The commentary is stated to be by Yādavaprakāśa on the Chandōviciti of Piṅgalanāga.

Beginning:

श्रीमत्पिङ्गलमानम्य छन्दश्शास्त्रमहोदधिम् ।
वृत्तानि वार्तिकानीव कानि चिद्विचिनोम्यहम् ॥

ओमित्यादिमन्त्रास्तन्निबन्धनानि प्रायेण वैदिकानि के चित् च छन्दोबन्धाः[च]। (छ)न्दांसि चाविदुषा कर्मसु न मन्त्राः प्रयोक्तव्याः तथा च ब्राह्मणम्—यो ह वा अविदितार्षेयच्छन्दोदैवतविनियेगब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्छति गर्तं वा पद्यते प्र वा मीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति

* * * *

अविदित्वा ऋषिच्छन्दोदैवतं योगमेव च ।
योऽध्यापयेज्जपेद्विद्वान् पापीयान् जायते तु सः ॥

इति । तत इदमशेषच्छन्दोबृन्दसन्दीपनं (छन्दोविचितिभाष्यम्) शास्त्रमधिक्रियते धीश्रीस्त्रीमिति म इति संज्ञा निर्दिश्यते ।

End:

द्विगो गान्तो गादिश्चेति तृतीयो द्वादशश्च वा न वाशितेति चतुर्लघुत्वे संज्ञान्तरस्य वक्ष्यमाणत्वात् नवमस्य लघुत्वनियमात् गान्त एव चतुर्थो गान्ता इत्युक्तत्वात् द्विदा द्वी गान्तश्चेति ॥

No. **906.** छन्दोविचितिः सभाष्या.

CHANDŌVICITIḤ WITH COMMENTARY.

Pages, 79. Lines, 20 on a page.

Begins on fol. 32*a* of the MS. described under No. 905.

The first two pages seem to have been added later than the remaining portion of the work and by a different hand.

Complete.

This contains the commentary of Yādavaprakāśa along with the Sūtras of Piṅgalanāga on Sanskrit prosody.

Beginning:

अथ श्रीयादवप्रकाशविरचितच्छन्दस्सूत्रभाष्यप्रारम्भः ॥

मयरसतजभनलगसम्मितं
भ्रमति वाङ्मयं जगति यस्य ।
स जयति पिङ्गलनागः
शिवप्रसादाद्विशुद्धमतिः ॥ १ ॥

त्रिगुरुं विद्धि मकारं
लघ्वादिसमन्वित यकाराख्यम् ।
लघुमध्यमन्तु रेफं
सकारमन्ते गुरुनिबद्धम् ॥ २ ॥

लघ्वन्तं हि तकारं
जकारमुभयोर्लघुं विजानीयात् ।
आदिगुरुं च भकारं
नकारमिह पैङ्गले त्रिलघुम् ॥ ३ ॥

[स]दीर्घं संयोगपरं
तथा प्लुतं व्यञ्जनान्तमूष्मान्तम् ।
सानुस्वारं च गुरुं
क्वचिदवसानेऽपि लघ्वन्त्यम् ॥ ४ ॥

धीश्रीस्त्रीम्.

ओमित्यादिमन्त्राः तन्निबन्धनानि प्रायेण वैदिकानि कर्माणि । ते च छन्दस्सूत्रे निबद्धाः । छन्दांसि चाविदुषा न मन्त्राः कर्मसु प्रयोक्तव्याः ।

तथा च ब्राह्मणम्—यो ह वा अविदितार्षेयच्छन्दोदैवत(विनियोग)ब्राह्मणेन मन्त्रेण याजयति वाध्यापयति वा स्थाणुं वर्छति गर्तं वा पद्यते प्र वा मीयते पापीयान् भवति यातयामान्यस्य छन्दांसि भवन्ति। अथ यो मन्त्रे मन्त्रे वेद सर्वमायुरेति श्रेयान् भवति। अयातयामान्यस्य छन्दांसि भवन्ति। तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति। स्मर्यते च—

अविदित्वा ऋषिच्छन्दोदैवतं योगमेव च।
योऽध्यापयेज्जपेद्विद्वान् पापीयान् जायते तु सः॥

तत इदमशेषच्छन्दोवृन्दसन्दीपनं शास्त्रमधिक्रियते धीश्रीस्त्रीन् इति संज्ञा निर्दिश्यते धी—श्री—स्त्रीमिति। गुरुवर्णत्रयं संज्ञि एतच्च सर्वगुरोर्वर्णत्रयस्योपसङ्ग्रहणयोदाहरणम्। तेन धीरित्यादेर्वाच्यार्थो न गृह्यते प्रकृतानुपयोगाच्च। तेनेदमुक्तं सर्वगुरोस्त्रिकस्य वर्णगणस्य म इति संज्ञा।

End:

तथा हि

प्रस्ताराद्याः पादे समाविधयेऽर्थे समार्थाविधये(वा)।
पादेषु चतुर्षु कृताः समार्थसमाविषमाविधये स्युः॥

द्विगुणे छन्दसि ये प्रत्यया भवन्ति पादे इष्टस्यार्थस्य च ते पादचतुष्कस्य च ज्ञेयाश्छन्दसि तद्यथा—

षडरे यः प्रस्तारः
स त्र्यक्षरस्य सोऽर्थे स्यात्।
यो द्वादशाक्षरेऽसौ
कृत्स्नस्य त्र्यक्षरस्य स्यात्॥
प्रस्तारेऽक्षरसङ्ख्या
छन्दोऽक्षरगुणितवृत्तसङ्ख्या स्यात्।
गुरुलघुसङ्ख्याद्धोरा
मात्रासङ्ख्या तु साध्यर्था॥

छन्दोज्ञानमिदं भवाद्भगवतो लेभे सुराणां गुरुः
तस्माद्दुश्च्यवनस्ततोसुरगुरुर्माण्डव्यनामा ततः ।
माण्डव्यादपि सैत स्ततः पिङ्गलः
तस्येदं यशसा गुरोर्भुवि धृतं प्राप्यास्मदाद्यैः क्रमात् ॥ इति
इति साधुना यतिवरा वशीतृ(नृ)णामिव यादवप्रकाशेन ।
कविदयितानां पिङ्गलशास्त्राद्वृत्तविधिरुज्जह्रे ॥

Colophon:

इति भगवतो यादवप्रकाशस्य कृतौ पिङ्गलनागच्छन्दोविचितिभाष्येऽष्टमोऽध्यायः ॥

छन्दश्शास्त्रमिदं पुरा त्रिनयनाल्लेभे गुहो नन्दितः
तस्मात् प्राप सनत्कुमारकमुनिस्तस्मात्सुराणां गुरुः ।
तस्माद्देवपतिस्ततः फणिपतिः तस्माच्च सत्पिङ्गलः
तच्छिष्यैर्बहुभिर्महात्मभिरथो मह्यां प्रतिष्ठापितम् ॥

No. 907. छन्दोविचितिः सव्याख्या.

CHANDOVICITIḤ WITH COMMENTARY.

Pages, 12. Lines, 22 on a page.

Begins on fol. 23*b* of the MS. described under No. 905.

Imperfect.

The last few passages of the commentary on the first Adhyāya constitute the beginning hereof. Then follows the colophon of the Adhyāya, which is followed by the second Adhyāya, which also is incomplete.

This commentary on the Chandassūtra of Piṅgalanāga is by Bhaṭṭa Halāyudha.

Beginning:

योपविष्टा सा पृथिव्यां त्वाश्रमे न स्थिते न लभ्यते

* * * *

भूमितत्त्वोत्तरं न हि सन्दिहाना(दि)चापल्यं कुर्वाणस्ताधीयं नुभिते ॥

Colophon:

इति भट्टहलायुधकृतायां पिङ्गलच्छन्दोवृत्तौ प्रथमोऽध्यायः ।

द्वितीयच्छन्दः । अधिकारोऽयम(मा)शास्त्रपरिसमाप्तेः । इत्यू(त ऊ)र्ध्वं यद्वक्ष्यामः छन्दः पुरा उपतिष्ठते छन्दस्संज्ञेनाक्षरसंख्यादप्येव(द्योति)छन्दोऽत्राभिधीयते । गायत्री—अधिकारोऽयम् । तान्युष्णिगनुष्टुबित्यादिसूत्रात्प्राग्यदुच्यते छन्दः तद्गायत्रीसंज्ञं भवेदिति ।

End:

यद्वेदैः पञ्चाक्षरः पादो भवति त्रयश्च षडक्षराः तदा शङ्कुमतनाम गायत्री भवति छन्दोग्रहणे प्रकृते पुनः छन्दोग्रहणे ॥

No. 908. जटामणिः सव्याख्यानः.

JAṬĀMAṆIḤ WITH COMMENTARY.

Pages, 36. Lines, 16 on a page.

Begins on fol. 142*a* of the MS. described under No. 864.

Complete.

A work on a particular form of Vēdic recitation known as Jaṭā, which consists in repeating every pair of words in the Vēda first in true order, then reversed, and then again in true order.

Beginning:

ध्यात्वा सर्वजगन्नाथं साम्बं सर्वार्थसाधकम् ।
जटासिद्धान्तवचनव्याख्यां कुर्वे यथामति ॥

पदद्वयमनुक्रम्य व्युत्क्रम्योत्क्रम्य सन्धिमत् ।
यथावत्स्वरसंयुक्तं प्रयुञ्ज्यात्सा जटा मता ॥

अनुक्रम आर्षः व्युत्क्रमः विलोमः उत्क्रम अनुलोमः प्रातिशाख्योक्तस्वरसन्धिविधिमनतिक्रम्य सन्धिः । प्रथमं पदद्वयमनुक्रम्य व्युत्क्रम्योत्क्रमेत् ।

यथा वायव्यꣳ श्वेतꣳ श्वेतं वॉयव्यँ वायव्यꣳ श्वेतम् । इषे त्वा त्वेष इषे त्वा इत्यादि ।

End :

त्रिक्रमस्य जटा ज्ञेया ह्युक्त्वा पूर्वक्रमन्तथा ।
पुनरन्तश्च मध्यश्च पुनराद्यन्तमेव च ॥

यथा मास्थात् स्थादा मा मा स्थात् आस्थात् स्थादास्थात् ।
मो षू णो नस्सु मो मो षू णः सू नो नस्सु सू नः ॥

No. 909. जटावलिः.

JAṬĀVALIḤ.

Pages, 7. Lines, 18 on a page.

Begins on fol. 1*a* of the MS. described under No. 864.

Complete.

A work similar in character to the last one.

Beginning :

वागीशप्रभृतिस्तुत्यं प्रणम्याहं गणाधिपम् ।
वागीशञ्च तथा श्रीशं वरदं जगतां पतिम् ॥

क्रमेण द्विपदं ब्रूयाद्व्युत्क्रमेणोत्क्रमेण च ।
सलक्षणं सर्वसन्धौ प्रोच्यते सा जटा बुधैः ॥

तस्याः प्रमाणं प्रथमे प्रातिशाख्यप्रपाठके ।
रेफादेशेऽपिशब्दाच्च तथा मेत्यार्षशब्दतः ॥

त्रिक्रमेष्वष्टधा सन्धिर्द्वौ द्वावाद्यन्तयोरपि ।
आर्षसंज्ञास्त एवात्र सन्धयोऽन्ये त्वनार्षकाः ॥

End :

चित्रञ्च भवतं द्रप्सस्सहस्व पुनरैक्ष्यतः ।
पवस्व व्रतपास्सूर्ये परोज्येव पुनस्तथा ॥

यः प्राणश्च तथायुर्दाः प्राणं मे मयि के चन ।
येनाग्नेऽस्मिन् विधस्थे च वाज्यध्वनो न लुप्यते ॥
त्रिपदप्रभृतिष्वेव बलीयांस्त्वन्ययोगतः ।
अलोप एव कण्ठोक्तेरन्ययोगेऽपि सर्वदा ॥

Colophon:

जटावलिः समाप्ता ॥

No. 910. जटालक्षणम्.
JAṬĀLAKṢAṆAM.

Pages, 9. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 902.
Incomplete.
A work similar to the last.

Beginning:

वेदाधारं वेदनिधिं वेदव्यासं जगद्गुरुम् ।
जगतां कारणं नत्वा जटालक्षणमारभे ॥
यथोक्तक्रममारभ्य तं क्रमं व्युत्क्रमेत्ततः ।
पुनर्यथाक्रमं ब्रूयादेवं प्रोक्ता जटा मता ॥
यथाग्निमील ईलेऽग्निमग्निमील इति क्रमात् ।
प्रत्यादानाख्यमाकारं पुनरादाय तत्पदम् ॥
तदुत्तरपदेनैव त्रिर्ब्रूयात्पूर्वमुक्तवत् ।
तमा नो न आ तं तमा न इत्युक्त्वा तदनन्तरम् ।
आ नो न आ न इत्येवं क्रमेणैव वदेज्जटाम् ॥

End:

लोपागमाविकाराश्च विकृतिर्विक्रमः क्रमः ।
ह्रस्वदीर्घौ षत्वणत्वे उपाचरितमार्षवत् ॥

उपाचरितशब्दस्य कोऽर्थः? संहितावत्पूर्ववचनं पदवदुत्तरं ब्रूयात् विलोमे आयामाविस्रम्भाक्षेपकम्पकान्

No. 911. त्रिक्रमलक्षणम्.

TRIKRAMALAKṢAṆAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 54*a*. of the MS. described under No. 857.

Complete.

There is given in this work first a list of words, whose final vowels do not undergo phonetic changes, when followed by words beginning with vowels, this collection being known as पृथग्व्यक्ति; and then the places where three words go to make up a Krama are pointed out.

Beginning:

स्वधा पूषा प्रमा प्रबुध्निया प्रपा प्रतिमा विमोन्मा द्या मिथुनी अमिनन्त बृहस्पते द्रापे धर्मे वाजे वदे मन्दे रेजते न योजते अग्ने अज्ञे अक्ते अर्पे विश्वैर्देवैर्नैर्ऋती त्वी इत्यस्तुहि इति प्रधाव्यक्तयः ।

आकारान्तमुदात्तान्तमाङ्परं यत्र दृश्यते ।
त्रिक्रमं तं विजानीयात् मो षू ण ऊ षु णस्तथा ॥

End:

अन्यत्र पञ्चधा सन्धिस्तत्राद्यन्तौ तथार्षकौ ।
समौ वर्णस्वरौ यत्र तत्रैकस्सान्धिरार्षकः ॥
नोपसर्गोऽवसानस्थः नीचः पूर्वस्तथा द्वयोः ।
त्रिषु मध्यगतश्चैव अवानोऽवग्रहस्तथा ॥

No. 912. थकारधकारसूत्रम्.

THAKĀRADHAKĀRASŪTRAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 45*a* of the MS. described under No. 857.

Complete.

This consits of two lists of such words in the Kṛṣṇayajurvēda as contain the letters थ् and ध्, respectively, these letters being apt to be confounded in ordinary uncritical pronunciation.

Beginning:

इषे विजिहाथां पर्याधत्था जुषेथां सयूथ्यो नाथितं व्यथितमाघोषथा मत्र रमेथां व्यथिः प्रथिष्ठमापृणेथां दधाथां त्रायेथां भवथा पीडयेथां विमुच्येथां प्रत्नथा पूर्वथा विश्वथेमथा प्रथा नीथे नीथे शिश्रथ श्रथायाह्वथाः समिथेषु मन्थमर्थेतस्ततश्चक्षाथां वीथो वृतस्यारे बाधेथाम् ।

End:

प्रजननमुभा जिग्यथुर्न परा जयेथे अपस्पृधेथामैरयेथां सप्रथसमुत्थास्यते मन्थ्यग्रान्मन्थिपात्रं शवसा जघन्थ प्रोण्वाथां गाथाभ्यः स्वाहा ॥

Beginning:

अथ धकारसूत्रम् ।

आयुषेधामुभा राधस उशते धेष्ठाशुरुधो वर्चोधा राधसा रत्नधा विदधेष्वन्धं नेमधिभा गावीधुकं सन्निधाय तमवरुधम् ।

End:

पटरो विक्लिधः एकधुरमग्निमिन्धीत कतिधा धेना बृहस्पतेस्त्वष्टा विदधद्वधाय याधमानो विधुन्दद्राणं यो रत्नधानाध ॥

No. 913. नपरतपरम्.

NAPARATAPARAM.

Substance, palm-leaf. Size, 15¼ × 1¼ inches. Pages, 4. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 29*a*. The other works contained in the MS. are: Raghuvaṁśam 1*a*, Śiśupālavadham 8*a*, Samānasandhi 25*a*, Vilaṅghaym 28*a*, Pūrvōttarōbhayadīrghī 31*a*.

Complete.

This consists of two lists of such words as end in न् and त्, respectively, as they occur in the Kṛṣṇayajurvēda; they are given as a help to the knowledge of the Padapātha, since these letters often become changed into other letters through Sandhi.

Beginning of Napara.

अथ यजुस्संहितायां च-छ-ज-त-थ-द-ध-न-म-ल-प-राः तत्तत्सानुनासिकाः पदान्ताः पदकाले नकारा दृश्यन्ते। अमुष्मिन्नसिन्नब्रुवन्ननड्वानकुर्वन्नसुरानवसन्ननयन्नदुहन्नधुक्षन्

End:

नस्समानो नरो निरयाचथा नुदेथे परं यं न सत्रायणेनेव नैव नो नौ नवनीतं न प्रवस्तव्यं निर्बाधानां नाकसदां परं तद्यत् ॥

नपरस्समाप्तः ॥

Beginning of Tapara.

अथ यजुस्संहितायां नकारपरास्सानुनासिकाः पदान्ताः पदकाले तकारा दृश्यन्ते। अद्यादतृणदश्नीयादब्रवदिजुषदस्थादसदस्मात् ॥

End:

हिंसीद्धिणुयाद्धन्याद्धविष्मद्धविष्कृत् तेनैव पूर्वं निधनपर इति ॥

Colophon:

तपरस्समाप्तः।

No. 914. नपरतपरम्.

NAPARATAPARAM.

Pages, 8. Lines, 6 on a page.

Begins on fol. 12*a* of the MS. describ d under No. 853.

Complete.

Same as the last.

No. 915. नपरतपरम्.

NAPARATAPARAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 90*b* of the MS. described under No. 854.

Complete. Same as the last.

No. 916. नपरतपरम्.

NAPARATAPARAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 15*a* of the MS. described under No. 857.

Complete.

Same as the above.

No. 917. नपरतपरम्.

NAPARATAPARAM.

Pages, 4. Lines, 30 on a page.

Begins on fol. 90*b* of the MS. described under No. 859.

Complete.

The same subject as in the above is dealt with here by Śēṣa-Nārāyaṇa, the selected words being strung together to form mnemonic verses.

Beginning of Naparam.

प्रणम्य गरुडारूढं हरिं नीलाद्रिसन्निभम् ।
शेषनारायणाख्येन लक्षणं क्रियते मया ॥
नतयोस्तु विहाय(स्या)त्सव्याख्यं दोषवर्जितम् ।
सङ्गृह्य श्लोकरूपेण तदन्तानि पदानि तु ॥
वर्जयोश्च(येच्च)धकारन्तु हित्वा तादिचतुष्टये ।
मकारेण लकारेण परे सति विकारभाक् ॥

पदान्तो यो नकारश्च तकारो नापरश्च यः ।
दृश्यते एष तौ ज्ञातुं प्रवक्ष्यामि पदान्यहम् ॥
वर्णक्रमेण गृह्यन्ते तेनान्तानि यथाक्रमम् ।
तत्र दुःखपदचा(ञ्चा)पि नानादवितीष्यते ॥
स्यात्तदेत्यादिका(क)श्चात्र पूरणार्थे विधीयते ।
इति परिभाषा ॥
अभूषन्नब्रुवन्नमन्नकृण्वन्नरुहन् दिवा ।
अपप्तन्नश्रुवन्नसिन्नस्मानर्वन्नयानयन् ॥

End:

सर्वान्त्सीव्यंस्तथा स्थातॄन् सामत्स त्वं सहन्तु मः ।
सहन् सिञ्चन् हविष्मान् हर्यन्निति च सङ्ग्रहः ॥
शेषनारायणाख्येन सम्पूर्णं नपरं कृतम् ।

Colophon:

नपरं संपूर्णम् ॥

Beginning of Taparam.

अभ्रादमुञ्चदकृणोदखापयदचिक्रि(क्र)दत् ।
असच्चातृणदनमदस्मन्नस्थादवीद्भवेत् ॥
अस्तभ्नादसदच्चैवाप्यवधीच्च स्फुटन्तथा ।
अङ्गिरस्वदविन्दच्चाजनयच्चारुहत्तथा ॥

End:

सङ्ग्राह्यमपि यत्किञ्चित् अत्रानुक्तं विल(च)क्षणैः ।
ऊह्यमेवं सता ख्यातं लक्षणं समुदीरितम् ॥

Colophon:

इति तपरं समाप्तम् ॥

No. 918. नपरतपरं सव्याख्यानम्.

NAPARATAPARAM WITH COMMENTARY.

Pages, 18. Lines, 20 on a page.

Begins on fol 24*a* of the MS. described under No. 855.

Complete.

A work of the same kind as the above; it is by Śaurisūri, and has a commentary by himself; the words are arranged in alphabetical order.

Beginning:

नत्वा श्रीनायकं देवं सर्वसम्पत्करं परम्.।
शौरिसूरिः प्रवक्ष्यामि नवं नव(त)परं पर(द)म् ॥

सकलकार्यनिर्वृत्तिहेतुं विनायकं पूर्वं नमस्कृत्य नपरलक्षणं करिष्यामीत्युक्त्वा इदानीं प्राचीनग्रन्थस्य दोषबाहुल्यं दर्शयन् आरभ्यमाणस्य गुणमु(प)पादयन्नाह—

दुर्ज्ञानं दुष्करं यत्तु सापेक्षं चाक्रमं तथा ।
तत् परित्यज्य सव्याख्यमकारादि च पुष्कलम् ॥

दुर्ज्ञानं ज्ञातुमशक्यम् अन्यमभिप्रेत्यान्योपदेशात् दुष्पठं पठितुमशक्यं ग्रन्थरचनासामर्थ्यात् सापेक्षम् अपूर्णोपदेशात् अक्रमम् अकारादिवर्णक्रमरहितं तत् परित्यज्य निराकृत्य सव्याख्यं व्याख्यासहितम् अकारादि अकारादिवर्णक्रमेण रचितं पुष्कलं पूर्णम्; एतदुक्तं भवति पुरातनस्य दुर्ज्ञानत्वादिबहुदोषदुष्टत्वात् तन्निराकृत्य तैत्तिरीयवेदाध्यापकाध्येतॄणां सुशाखावगमनार्थं सव्याख्यं समासव्यासरूपेण प्रतिषिध्योदाहरे । प्रत्युदाहरणं च पुष्कलं पूर्णं सुज्ञानं लक्षणान्तरं करिष्यामीत्यत्र सम्बध्यते । लक्षणं नारम्भणीयमित्येव चोदयन्तं प्रत्यारम्भणीयमुपपादयितुमाह नारम्भणीयमिति श्लोकद्वयेन ।

End:

सर्वान्मया कामान् व्यश्नुवथ, सर्वान् लोहितगन्धेन, स्तेगान्दंष्ट्राभ्याम्, सहसाश्चित् सहीयान् देवः, हविष्मान् देवो अध्वरः, एतान् होमान् जुहुयात् इति नपद्धतिः ॥

Beginning:

अथ तकारपद्धतिः अन्नाद्यान्निर्भजामि, वज्रेण खान्यतृणन्नदीनां, न मांसमश्नीयान्न स्त्रियम्, इत्यब्रवीन्न वै, यस्याजुषन्नमस्विनः ।

End:

एवं नपरं तान्तं च यत् पदं तत् सवर्णं प्रकीर्तितम् । संहितायां क्वचिदपि प्रदेशे दृष्टं तकारान्तपदमवेक्षते तत् सर्वं प्रकीर्तितम् ॥

Colophon:

इति नपरतपरव्याख्यानं सम्पूर्णम् ॥

No. 919. नपरतपरं सव्याख्यानम्.

NAPARATAPARAM WITH COMMENTARY.

Pages, 16. Lines, 7 on a page.

Begins on fol. 11*a* of the MS. described under No. 856.

Complete.

Same as the last.

No. 920. नारदशिक्षा.

NĀRADAŚIKṢĀ.

Pages, 30. Lines, 18 on a page.

Begins on fol. 94*a* of the MS. described under No. 864.

Complete.

A work on the accents and the manner of pronunciation of the verses in the Sāma-Vēda, written by one who styles himself as a traditional student of the Yajur-Vēda.

Beginning:

श्रीरामं सामगानेन सन्तोषयितुमिच्छता ।
मया नारदशिक्षेयं याजुषेणापि लिख्यते ॥
अथातस्स्वरशास्त्राणां सर्वेषां वेदनिश्चयम् ।
उच्चनीचविशेषाद्धि स्वरान्यत्वं प्रवर्तते ॥
आर्चिकं गाधिकञ्चैव स्वा(सा)मिकञ्च स्वरान्तरम् ।
कृतान्ते स्वरशास्त्राणां प्रयोक्तव्यं विशेषतः ॥
एकान्तरस्वरस्त्वृक्षु गाधासु द्व्यन्तरस्वरः ।
सामसु त्र्यन्तरं विद्यादेतावत्स्वरितोऽन्तरम् ॥

End:

यथा व्यालो हरेत्पुत्रान् दंष्ट्राभिर्न च पीडयेत् ।
भीतः पतनभेदाभ्यां तद्वद्वर्णान् प्रयोजयेत् ॥
एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः ।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥
खण्डः ९ । द्वितीयः प्रपाठकस्समाप्तः ॥

Colophon:

नारदशिक्षा समाप्ता ॥

No. 921. पदकारिकारत्नमाला.

PADAKĀRIKĀRATNAMĀLĀ.

Substance, palm-leaf. Size, 17 × 1¾ inches. Pages, 136. Lines 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains 40 Adhyāyas.

This work is by a person who says in the introduction that his name is Śaṅkarācārya, and that he is acquainted with all the Śāstras, devoted to the study of the Vēdas and the performance of religious ceremonies, and well-versed in all the Vēdas and Mantras; and he treats in this work of certain component phonetic elements of

words—such as Visarga, Anusvāra, Vēṣṭana—and of words ending with the letter *n*, as they are to be found in the Mantras of the White Yajur-Vēda.

Beginning :

श्रीकान्तं सितरुचिराजितोत्तमाङ्गं गौरीशं गुरुपदमम्बुजालयञ्च ।
सन्नत्वा सुललितलक्षणं पदानामासारैः प्रक यामः ॥

पदानामावलिं वेलवि(स)र्गाणान्निरीक्षणम् ।
नान्तानां वक्ष्यते लक्ष्म निक्षिप्यैकाक्षरे क्षयम् ॥
विहीना ऋलृवर्णाभ्यान्नवा ।
दशमं बिन्दुना ज्ञेयं विसर्गाद्विंशतिर्भवेत् ॥

त्रिदशाङ्को(ऽ) कु(ङ्कु)शः पार्श्वा उकारश्चोभयाङ्कुशः ।
आसन्नस्त्रिदशं लक्ष्म यत्र क्वचिदिह स्फुटम् ॥

पदानां लक्षणं प्रोक्तं वेलानां तदनन्तरम् ।
वार्गाणां पञ्चमार्गाणां पञ्चपञ्चोर्ध्वरेफया ॥
दशोभयाङ्कुशं लक्ष्म वेदे वाजसनेयके ।
वार्गान्तराक्षरैः पञ्चविसर्गाणान्निरीक्षणम् ॥
अथो रेफस्तथा पञ्च द्विपञ्चेषु(क्षी च) शुकस्तथा ।
सवेलसविसर्गाङ्को वार्गाणां च हलं क्रमात् ॥
सविसर्गास्तथाम्भ(न्त)स्था हकारेणासलक्षणम् ।
अवेलास्तद्वद्दृष्टाणो लस्त(अन्त)स्थैव हलं क्रमात् ॥
नान्तानां वै त्वथो युक्तं वर्गाणाञ्च हलं क्रमात् ।
ओष्ठ्याणाञ्च तथान्तस्थरेफवर्जं यथाक्रमम् ॥
पञ्चानाञ्च द्विपक्षी च शुकि(कः) पारिश्वतीति यत् ।
गणान्तानां निजं पूर्णं स[मा]सानां पदलक्षणम् ॥
सर्वशास्त्रविचारज्ञः सदाचारसमागमः ।
तपस्समाधिनिरतो गुरुध्यानसमन्वितः ॥

सर्ववेदार्थतत्त्वज्ञो भानुकोटिसमद्युतिः ।
सर्वागमविवेकज्ञः सर्वमन्त्राधिपश्शुचिः ॥
शङ्कराचार्यनामाहं रत्नमाला च वक्ष्यते ।
उमायुक्तो विश्वनाथश्चरणद्वयवन्दितः ॥
ब्रह्माणं भास्करं व्यासं श्रीकान्तञ्च जगत्प्रभुम् ।
यजुर्वेदमहाकल्पतरोरेकशतैर्युताः ॥
शाखास्तत्र शिवाकाराः प्रथमा(ः) काण्वसंज्ञकाः ।
पुण्यं पवित्रपूतन्तु सर्वमन्त्रसमागमम् ॥
यजुषाञ्चैव सर्वेषां तच्छ्रेष्ठसममुत्तमम् ।
पदानां कारिकाञ्चैव रत्नमालाञ्च संज्ञकाम् ॥
वाजसनेयशाखासु यथोक्तन्तु यथाक्रमम् ।
तथा श्रुत्यनुसारेण वक्ष्येऽहं रत्नमालिकाम् ॥
पदानाञ्चैव वेष्टा च विसर्गाणान्तथैव च ।
यथाक्रमस्तु नान्तानां वक्ष्येऽहं गण्यते तथा ॥
इषे त्वेति समन्त्रस्य पदास्त्रयोदशैव च ।
वेष्टनं चैकमेव स्याद्विसर्गस्तु त्रयो भवेत् ॥

Colophon :— इति श्रीशङ्कराचार्यकृतौ वाजसनेयसंहितायां पदकारिकारत्नमाला नाम चत्वारिंशदध्यायस्समाप्तः ॥

End :

अन्तः पुनस्स्वस्सवितो न स रेफो वेलो भवति । स्वस्वाहान्तः परार्थश्च पृथिव्यौ च न वेलाः ॥

No. 922. पदकारिकारत्नमाला.

PADAKĀRIKĀRATNAMĀLĀ.

Pages, 110. Lines, 15 on a page.

Begins on fol. 29*a* of the MS. described under No. 67.

Complete.

A copy of the MS. described under the last number.

No. 923. पदसङ्ख्या.

PADASAṆKHYĀ.

Pages, 50. Lines, 5 on a page.

Begins on fol. 167*a* of the MS. described under No. 15.

Complete.

This work gives the number of words contained in every Varga of the Ṛgvēda.

The transcription of this work is said to have been begun on the 14th Śuddha Phālguna of Plavaṅga year, and to have been completed on the 2nd Bahula of the same month.

Beginning :

पदसङ्ख्याविभाग उच्यते—अग्निमीले सप्तचत्वारिंशद्यदङ्गैकचत्वारिंशद्वायवायाह्येकोनपञ्चाशद्वायविन्द्रस्त्रयस्त्रिंशदश्विनैकोनपञ्चाशदोकोनु मास एकपञ्चाशत्.

End :

प्रथश्च सप्तचत्वारिंशर्बृ (द्रृ)हस्पतिर्द्वात्रिंशदपश्यं त्रिचत्वारिंशद्विष्णुर्योनिमष्टात्रिंशन्महित्रीणामष्टाविंशद्वात आवात्वष्टत्रिंशत्प्राग्नेयात्रिंशत्र नूनं त्रयोविंशदायङ्गौस्त्रयस्त्रिंशदृतं यथा सहितं संसमित्रिषष्टिः ॥

Colophon :

इति श्रीवेङ्कटपदविन्यासे ग्रन्थे अष्टमाष्टकेऽष्टमोऽध्यायः ॥

क(स)रभसकरवेगभ्रष्टवर्णादिदोषो
यदि भवति न वाच्यं पुस्तके हस्तदोषात् ।
सकलगुणग्राहिणां सद्गुणग्राहकाणां
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

No. 924. पारिशिक्षाटीका याजुषभूषणम्.

PĀRIŚIKṢĀṬĪKĀ : YĀJUṢABHŪṢAṆAM.

Substance, paper. Size, 13¼ × 8½ inches. Pages, 60. Lines, 25 on a page. Character, Dēvanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. Contains another work called Gōpāladēśikāhnikam 33*a*.

This MS. is a copy of the MS. described under No 925 which latter is injured.

Complete.

A work on Yajurvēda-Lakṣaṇa attributed to Pāri, with the commentary of Cakra, son and pupil of Rāma. It deals with phonetics, accents, &c., as appertaining to the language of the Yajur-Vēda.

Beginning:

सिताम्भोजनिष्ठं रथाङ्गाब्जमुद्राः
तथा पुस्तकन्तं कराब्जैर्दधानम् ।
प्रणम्याश्ववक्त्रं त्वहं पञ्चवर्ण-
क्रमाणां निदानं प्रवक्ष्ये प्रबन्धम् ॥

अथ इष्टदेवताप्रणामानन्तरं स्वगुरोः वेदतल्लक्षणाद्यभिज्ञताप्रकाशनमुखेन वस्तुनिर्देशात्मकं मङ्गलमातनुते पदक्रमेति—

पदक्रमजटाघनध्वजरथादिभेदैर्युता
श्रुतिः प्रथितलक्षणा स्फुरितपञ्चवर्णक्रमा ।
यदीयवदनान्तरे वसतिमाप शास्त्रैस्समं
स मे विजयते तरां प्रथितरामनामा गुरुः ॥

अथ मङ्गलानन्तरं विविधवर्णक्रमादिलक्षणविचाररसिकानां विदुषां तत्तल्लक्षणसुखपरिज्ञानार्थं साम्प्रतिकजनदुरवबोधभारद्वाजव्यासपारिशम्भुकौलह (हल) हारीतबोधायनवसिष्ठवाल्मीकिप्रभृतिमुनिगणविनिर्मितशिक्षादिग्र-

न्थानुसारेण ललितपदसन्दर्भं किञ्चित्प्रबन्धं कर्तुमनाः स्वकीर्त्यनुवृत्तये स्वनामधेयान्निबध्नन् शिष्यावधानाय प्रतिजानीते तनय इति—

तनयो विनयोज्ज्वलस्य तस्य
प्रथितो वैदिकवावदूकसिंहः ।
कृपया महतां स चक्रनामा
ह्यपि वर्णक्रमलक्षणं करोति ॥

तनय इत्यादि स्पष्टोऽर्थः । सम्प्रति स्वग्रन्थस्यामूलकताशङ्काप्रयुक्तानादरपरिहाराय समूलकतां प्रतिपादयन् शिष्टपरिग्रहस्य स्वस्य ग्रन्थस्य च अभ्युदयसाधनतया एतन्न्यर्गा(ग्भा)वफलीभूतां शिष्टप्रीतिं प्रार्थयते सतामिति—

सतां मुदं सम्प्रति पारिशिक्षा-
व्याख्यानभूता हृदयङ्गमेयम् ।
विलक्षणा याजुषभूषणाख्या
कृतिर्मदीया वितनोतु कामम् ॥

अथ शिक्षाकारोक्तं मङ्गलश्लोकमाह—

प्रणिपत्य जगन्नाथं वासुदेवं सनातनम् ।
गणाधिपं गिरां देवीं शीक्षां वक्ष्ये यथामति ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तये प्रचयगमनाय च मङ्गलमादधानः शिष्टाचारपरिप्राप्तेष्टदेवतानमस्कारपूर्वकं ग्रन्थारम्भं प्रतिजानीते प्रणिपत्येति । जगन्नाथं सर्वलोकैकनाथं सनातनम् आद्यन्तरहितं वासुदेवं विष्णुं गणाधिपं विष्वक्सेनं सेनेशमिति यावत् गिरां देवीं सरस्वतीं च प्रणम्य यथामति शीक्षां वक्ष्ये ।

अथ वर्णसमाम्नाय उच्यते याजुषोऽत्र तु ।

अथेत्ययं शब्दोऽधिकारार्थः ; वर्ण्यन्ते व्यक्तं ध्वन्यन्त इति वर्णा-अकारादयः समित्युपसर्गः सहत्वं द्योतयति आत्मानम्(म्नायः) अभ्यासः यत्र

समुदितानामभ्यासः क्रियते सः समाम्नायः वर्णानां समाम्नायो वर्णसमाम्नायः सोऽधिकृतो वेदितव्यः। सोऽयं पूर्वशिष्टैरुपदिष्टः तथा हि—

स्वराः स्पर्शास्तथान्तस्था ऊष्माणश्चाथ दर्शिताः ।
विसर्गानुस्वारळाश्चानुनासिक्याः पञ्च चोदिताः ॥

End:

शुद्धवर्णे त्वचामादौ यद्युच्चादिः प्रयुज्यते ।
संविद्यात् स्वरवर्णन्तमेतदेवास्य लक्षणम् ॥

शुद्धवर्ण इति । शुद्धवर्णे केवलवर्णक्रमोक्तौ अचाम् अकाराद्यौकारपर्यन्तानां स्वराणामादौ प्रथमतः उच्चादिः उदात्तादिस्वरः प्रयुज्यते यदि तं तथाप्रयुक्तोदात्तादिस्वरविशिष्टवर्णं स्वरवर्णं संविद्यात् स्वरवर्णक्रममिति सम्यग्ज्ञेयमित्यर्थः। अस्य स्वरवर्णक्रमस्य एतदेव लक्षणं एतावदेव लक्षणम् ॥

No. 925. पारिशिक्षा सटीका.

PĀRIŚIKṢĀ WITH A GLOSS.

Substance, palm-leaf. Size, 15¼ × 1⅜ inches. Pages, 120. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Same as the last.

No. 926. पूर्वोत्तरोभयदीर्घी.

PŪRVŌTTARŌBHAYADĪRGHĪ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 31*a* of the MS. described under No. 913.

This work gives three lists of certain pairs of words in the Yajur-veda, which are phonetically fused together and have a long vowel (1) at the end of the first word, or (2) at the beginning of the second word, or (3) both at the end of the first word and the beginning of the second word. The object of the work is to be of help in the learning of the Padapāṭha.

Beginning of Pūrvadīrghī

वशान्नायाकवारिं महेन्द्राय माहेन्द्रमैतुमैतोरष्टाश्रीरष्टाक्षराण्यष्टाक्षरमष्टाक्षरेणाजेदेयातामार्पयन्ती याज्यानुवाक्ये याज्यानुवाक्ययोः

End:

यथोदितमे(व) विश्वाहाञ्जसायनीरार्तोर्महेन्द्रम् ।

इति पूर्वदीर्घी.

Beginning of Uttaradīrghī

उपायवोऽदब्धायो विश्वायुश्शतायुः सर्वायुः सत्यायुश्चित्रायुः ।

End:

वैश्वदेवाग्निमारुते यत्राकूताय प्राप्यते मृगाखरे ।

इत्युत्तरदीर्घी ॥

Ubhayadirghī

पराह दक्षिणावृतो यथायतनं यथायतनावि(दि)त्युभयर्दर्घी ॥

No. 927. पूर्वोत्तरोभयदीर्घी.
PŪRVŌTTARŌBHAYADĪRGHĪ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 46*a* of the MS. described under No. 857.

Complete.

Same as the last.

No. 928. प्रातिशाख्यम् (यजुस्).
PRĀTIŚĀKHYAM (YAJUS).

Substance, palm-leaf. Size, 17⅝ × 1⅛ inches. Pages, 26. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Grahanirṇaya 14*a*, Dharmaśāstraviṣayam 29*b* and Parāśarasmṛti 34*a*.

Complete.

This is a work on Vēdic orthography and pronunciation as relating to the Kṛṣṇa-Yajurvēda.

Beginning:

अथ वर्णसमाम्नायः, अथ नवादितस्समानाक्षराणि, द्वे द्वे सवर्णे ह्रस्वदीर्घे न प्लुतपूर्वम्, षोडशादितस्स्वराः, शेषो व्यञ्जनानि, आद्याः पञ्चविंशतिः स्पर्शाः, पराश्चतस्रोऽन्तस्थाः ।

End:

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्राविभागज्ञो गच्छेदाचार्यसंसदम् ॥
गच्छेदाचार्यसंसदमिति ॥

अथ चतस्रस्संहिताः, अथ वर्णविशेषोत्पत्तिः, शब्दः प्रकृतिस्सर्ववर्णानां, व्यञ्जनं स्वराङ्गम्, इवर्णोकारयोर्यवकारभावे स्वरितयोर्मध्ये यत्र नीचं स्यात् उकारन्तु प्रणव एके तीव्रतरमानुनासिक्यम् । अथ सकारपराः नकारस्य रेफोष्मयकारभावात्, स्वरपूर्वं व्यञ्जनं द्विवर्णं व्यञ्जनपरम् । अथ मकारलोपः ।

वेङ्कटः कृष्णतनयः सीतारामस्य सूरिणा ।
प्रातिशाख्यद्वये प्रश्ने लिख्यते तन्मया कृतम् ॥
शारदां वरदां देवीं विद्यादानविशारदाम् ।
शारदां भज सिद्धान्तां शारदाम्भोजसेविताम् ॥
सिद्धार्थिवत्सरे चैव ऊर्जे मासे तु पूर्णिमा ।
लिख्यते प्रातिशाख्ये तु सर्वलक्षणसंयुते ॥

No. 929. प्रातिशाख्यम् (यजुस्).
PRĀTIŚĀKHYAM (YAJUS.)

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 22. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains 24 Adhyāyas in two Praśnas.

Begins on fol. 39*a*. The other works herein are : Kṛṣṇayajurvēdamantrapraśnaḥ 1*a*, Āpastambagṛhyasūtram 25*a*, Bōdhāyanapūrvaprayōgaḥ 50*a*, Iṣṭihautram 60*a*.

Same as the last.

Beginning :

अथ वर्णसमाम्नायः, अथ नवादितस्समानाक्षराणि, द्वे द्वे सवर्णे ह्रस्वदीर्घे, षोडशादितस्स्वराः ।

End :

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्राविभागज्ञो गच्छेदाचार्यसंपदम् ॥

Colophon :

इति प्रातिशाख्ये द्वितीयप्रश्नेन सह चतुर्विंशोऽध्यायः ॥

No. 930. प्रातिशाख्यम् (यजुस्).

PRĀTIŚĀKHYAM (YAJUŚ).

Pages, 23. Lines, 22 on a page.

Begins on fol. 1*b* of the MS. described under No. 867.

Complete. Same as the last.

No. 931. प्रातिशाख्यव्याख्यानं त्रिभाष्यरत्नम्.

PRĀTIŚĀKHYAVYĀKHYĀNAM: TRIBHĀṢYARATNAM

Pages, 161. Lines, 22 on a page.

Begins on fol. 20*a* of the MS. described under No. 867.

Complete.

A commentary on the last described work.

Beginning:

भक्तियुक्तः प्रणम्याहं गणेशचरणद्वयम् ।
गुरूनपि गिरान्देवीमिदं वक्ष्यामि लक्षणम् ॥
व्याख्यानं प्रातिशाख्यस्य वीक्ष्य वाररुचादिकम् ।
कृतं त्रिभाष्यरत्नं यद्भासते भूसुरप्रियम् ॥

श्लोकयोरनयोरयमर्थः—गणेशचरणद्वयं गुरून् गिरामपि देवीं वाग्देवीमित्यर्थः । ताश्च प्रणम्य लक्षणामेदं वक्ष्यामि । यल्लक्षणं त्रिभाष्यरत्ननामकं भूसुरप्रियं विद्वत्प्रियं भासते यत्, कीदृशं लक्षणं प्रातिशाख्यस्य व्याख्यानरूपं, वाररुचादिकं भाष्यजातं वीक्ष्य कृतं न्यूनातिरेकेण रचितम् आदिशब्देनात्रेयमाहिषेयौ गृह्येते । अत एव त्रिभाष्यरत्नमितिनाम्नः उपपत्तिः; त्रयाणां भाष्याणां समाहारः त्रिभाष्यं तस्य रत्नं भूषणम् । अथ वर्णसमाम्नायः—मङ्गलानन्तरारम्भप्रश्नकात्स्न्येष्वथो अथेति मङ्गलाद्यनेकार्थत्वात् अथशब्दस्य अत्रैकोऽर्थो निर्णेतव्यस्तत्र प्रथमं मङ्गलार्थत्वमुच्यते.

End:

वेदस्वरूपमुच्यते—

यजुर्वेदः पिङ्गलाक्षः कृशमध्यो बृहद्बलः ।
बृहत्कपोलः कृष्णाङ्घ्रिः ताम्रः काश्यपगोत्रजः ॥

वेदाङ्गान्युच्यन्ते—

शीक्षा कल्पो व्याकरणं निरुक्तं ज्यौतिषन्तथा ।
छन्दसां लक्षणञ्चेति षडङ्गानि विदुर्बुधाः ॥
आनुपदञ्चानुषदं छन्दोभाषासमन्वितम् ।
मीमांसान्यायतर्काश्च उपाङ्गानि विदुर्बुधाः ॥

एवं साङ्गोपाङ्गं वेदं गोत्रस्वरूपादि विजानन्नधीयानः पूतो भवति ।

ग्रन्थान्तरे यथा तद्वदिदं शास्त्रं यदृच्छया ।

असूत्रितेषु स्थानेषु पौरुषेयेषु वर्तते ॥

तथा हि न प्र नक्षत्राय देवाय । स ईं ममाद महि कर्म कर्तवे महामुरुं, महि सप्तदशेनावस्युवाताः, अपि सीद मिथुन्यष्टौ च, असिन्स्तनुवस्तुहि पिनाकमित्यादौ न वर्तते । सिंहो व्याघ्र उत या पृदाकौ । द्वादशाग्निष्टोमस्य स्तोत्राणि आत्मना परा णिष्प्र शुक्रशोचिषा । ऊश्मसि पोषमित्यादौ तु वर्तते । गच्छेद्दाचार्यसंसदमिति वीप्सा शास्त्रसमाप्तिं द्योतयति ॥

Colophon:

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे द्वितीयप्रश्ने द्वादशोऽध्यायः ॥

त्रिलोचनध्यानविशुद्धकौमुदी-
विनिद्रचेतःकुमुदः कथा(ला)निधिः ।
स सोमवर्यो विततान सम्मतं
विपश्चितां भाष्यमिदं सुबोधनम् ॥

त्रिभाष्यरत्नमखिलं यथामातृकमत्र हि ।
लिख्यते परमं वेद्यं वेल्लङ्क्या भवयज्वना ॥

No. 232. प्रातिशाख्यविवरणम्—त्रिभाष्यरत्नम्.

PRĀTIŚĀKHYAVIVARAṆAM: TRIBHĀṢYA RATNAM.

Pages, 20. Lines, 7 on a page.

The work begins on fol. 19*a* of the MS. described under No. 856.

Contains the commentary on Adhyāyas 3 and 4. They are called Kuriki and Pragraha respectively.

This fragment of the commentary is also by the author of that which is described under the last number.

Beginning of Kurikivyākhyā—

अथादावुत्तरे विभागे ह्रस्वं व्यञ्जनपरः । अथेत्ययमधिकारः । आदौ पदादौ उत्तरे पदान्ते वर्तमानायां संहितायां यो दीर्घः आदौ विभागे विभागसमये व्यञ्जनपरो ह्रस्वमापद्यते । व्यञ्जनपरमत्र यथासंहितास्थं विज्ञेयम् ।

End:

अनुदात्त इति किम्? विश्वकर्मा व्यानट् । पत्नीमुदानयति । अनूष्मवतीति किम्? धारा व्यानशुः । उदानिषुर्महीरिति ।

Colophon:

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे प्रथमप्रश्ने तृतीयोऽध्यायः ॥

Beginning of Pragrahavyākhyā—

अथ प्रग्रहाः । अथेत्ययमधिकारः । प्रग्रहा उच्यन्त इत्येतदधिकृतं वेदितव्यम् । इत उत्तरं यद्वक्ष्यामः नावग्रहः अवग्रहः प्रग्रहो भवति । ओकारः । ओकारोऽसांहितौकारव्यञ्जनपरः श्री न हि परः द्वे इति च वक्ष्यति । तदुद्दिश्य पुरस्तादपवादोऽनेन विधीयते । यथा तनूनपादसुरः ।

End:

उपबन्धस्तु देशाय नित्यमिति सूत्रप्रसङ्गादुक्तम् । समानश्च तत्पदश्च समानपदं तस्मिन् ॥

Colophon:

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे प्रथमप्रश्ने चतुर्थोऽध्यायः ॥

इति प्रग्रहाध्यायः ॥

No. 933. प्रातिशाख्यविवरणम्—त्रिभाष्यरत्नम्.

PRĀTIŚĀKHYAVIVARAṆAṀ: TRIBHĀṢYARATNAM.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 140. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

Same as the work described under No. 931, except for the following found in addition at the beginning and the end.

Beginning:

अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं यथा ।
शास्त्रानुपूर्वं तद्विद्य(द्यात्) यथोक्तं लोकवेदयोः ॥
प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥
त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाश्शम्भुमते मताः ।
प्राकृते संस्कृते चापि स्वयं प्रोक्ता(स्)स्वयम्भुवा ॥
अनुस्वारो विसर्गश्च ᳵकᳵपौ चापि पराश्रितौ ।
दुस्पृष्टश्चेति विज्ञेयः ऌकारः प्लुत एव च ॥
शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥
भक्तियुक्तः प्रणम्याहं गणेशचरणद्वयम् ।

End:

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्राविभागज्ञो गच्छेदाचार्यसंसदम् ॥
गच्छेदाचार्यसंसदमिति ॥

पदानां क्रमः तस्य विशेषं जानातीति पदक्रमविशेषज्ञः । वर्णानां क्रमः तस्मिन् विचक्षणः । स्वराश्च मात्राश्च स्वरमात्राः तासां विभागं जानातीति स तथोक्तः । मात्राशब्देन कश्चिदुच्यते सोऽपि चतुरणुक इत्यवादिष्म[ः] ।

* * * *

यश्चेदं शास्त्रं जानीते सोऽयमाचार्यो भूत्वा तेषां सदनं ब्रह्मलोकं गच्छति ॥

Colophon:

इति त्रिभाष्यरत्ने प्रातिशाख्यविवरणे चतुर्विंशोऽध्यायः । इति द्वितीय-प्रश्नस्समाप्तः ॥

No. 934. प्रातिशाख्यव्याख्यानम्—वैदिकाभरणम्.

PRĀTIŚĀKHYAVYĀKHYĀNAM: VAIDIKĀBHARAṆAM.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 165. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old.

Complete.

Another commentary on the Prātiśākhya of the Kṛṣṇa-Yajur-Vēda; it is by Gārgya Gōpālamiśra. The subject-matter of this Prātiśākhya is summed up in a few verses at the end of the work, which are extracted below.

Beginning:

प्रणम्य साङ्गमाम्नायमाचार्यांश्च प्रणीयते ।
व्याख्येयं प्रातिशाख्यस्य गार्ग्यगोपालसूरिणा ॥

. . . पूर्वशास्त्रार्णवोद्धृतैः ।
रचितं धारयन्त्वेतद्वैदिकाभरणं बुधाः ॥

अथ किमर्थं प्रातिशाख्यं नाम लक्षणं प्रणीयते ।

End:

गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च ।
लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः ॥

स्वरितोदात्तनीचत्वं श्वासो नादोऽङ्गमेव च ।
एतत् सर्वं तु विज्ञेयं छन्दोभाषामधीयताम् ॥

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्राविभागज्ञो गच्छेदाचार्यसंसदम् ॥

Colophon:

इत्याचार्यगोपालमिश्रविरचिते वैदिकाभरणाख्ये प्रातिशाख्यव्याख्याने द्वितीयप्रश्ने द्वादशोऽध्यायः ॥

No. 935. प्रातिशाख्यभाष्यम् (शुक्लयजुस्).
PRĀTIŚĀKHYABHĀṢYAM (WHITE YAJURVĒDA).

Substance, paper. Size, 12½ × 7¾ inches. Pages, 216. Lines, 21 on a page. Character, Telugu. Condition, good. Appearance, old. Begins on fol. 1*b*. The other works herein are :—

	fol.
Yajurvēdamantrapraśnaḥ	110*b*
Śatadvayī	127*b*
Śatadvayīvyākhyā	151*a*
Yajussrautaprayōga	217*a*
Sannyāsavidhiḥ	294*b*

Complete.

A commentary on the Prātiśākhya of the Śuklayajurvēda by Anantabhaṭṭa, son of Nāgadēva and Bhāgīrathī of the Prathama-śākhā (probably the Kāṇvaśākhā of the White Yajur-Vēda).

Beginning :

याज्ञवल्क्यमुनीन्नत्वा कात्यायनमुनीनपि ।
सुमङ्गलादिकांश्चापि वन्दे विद्यागुरून्मम ॥
वेदवेदान्ततत्त्वज्ञोऽनन्तभट्ट इति श्रुतः ।
व्याख्यास्यामि प्रातिशाख्यं कात्यायनमुनीरितम् ॥
समस्तकाण्वशाखिभ्यो मूर्धन्येषोऽञ्जलिर्मया ।
बध्यते मच्छ्रमं दृष्ट्वा कृपाङ्कुर्वन्तु ते मयि ॥
उदाहरणवाक्यानि दीयन्ते काण्वशाखिनाम् ।
अलाभे परकीयानि सूत्रकारानुशासनात् ॥

ननु शाखायां शाखायां प्रतिशाखं प्रतिशाखं भवं प्रातिशाख्यम् इति समाख्यया समग्रोदाहरणालाभेन च माध्यन्दिनशखीयमेवेदं प्रातिशाख्यमिति गम्यते ।

End :

सर्वन्तु सौम्यमाख्यातं नाम वायव्यमिष्यते ।
आग्नेयस्तूपसर्गस्स्यान्निपातो वारुणस्स्मृता(तः) ॥

सर्वमाख्यातं सोमदेवत्यं नामपदं सर्वं वायुदेवत्यम् उपसर्गोऽग्निदैवत्यं निपातो वरुणदैवतः एवश्च अथ पदगोत्राणीत्यादिकमुपासनार्थमुक्तमित्यवधेयम् । एवं ह्युपासिताश्शब्दाः अर्थमनाभिज्ञस्यापि पुरुषस्य फलप्रदा भवन्तीति ज्ञायते । यो ह वा अविदितार्षेयशब्दो दैवतेन मन्त्रेण याजयति वा स्थाणुं वर्च्छति गर्त[तां] वा पद्यन्ते(ते)जपित्वा हुत्वेष्ट्वा तत्फलेन युज्यते । गुणश्रवणाच्चैवं कृत्स्नं शास्त्रमभिधाय स्व(सु)कृतमिव(वा)म्नि[नि]त्य(म)लङ्करोति इत्याह स्वरसंस्कारयोः प्रतिष्ठापयिता भगवान् कात्यायनः ।

उत्पत्तिश्च विनाशश्च भूतानामागतिङ्गतिम् ।
वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति ॥

इति भगवच्छब्दार्थः । शेषं सुमङ्गलम् । वृद्धं वृद्धिरित्युक्तार्थः ।

वेदवेदाङ्गविदुषानन्तभट्टेन सादरम् ।
परेषामुपकाराय भाषितं प्रातिशाख्यकम् ॥
अम्बा भागीरथी यस्य नागदेवात्मजस्सुधीः ।
तेनानन्तेन रचितं प्रातिशाख्यस्य वर्णनम् ॥
असाधु साधु वा पद्यं ग्रन्थेऽस्मिन्यन्मयोदितम् ।
तत्सर्वं क्षम्यतां सन्तः श्रीमन्तः काण्वशाखिनः ॥
न पाण्डित्याभिमानेन न च वित्तस्य लिप्सया ।
ग्रन्थोऽयं रचितः किन्तु रामनाथस्य तुष्टये ॥

Colophon:

इति श्रीमत्प्रथमशाखिनागदेवभट्टतनुजेन श्रीमदनन्तभट्टेन विरचिते श्रीमत्कात्यायनप्रणीतप्रातिशाख्यसूत्रभाष्ये पदार्थप्रकाशे अष्टमोऽध्यायस्समाप्तः ॥

वर्तमानव्यावहारिकचान्द्रमाने नन्दननामसंवत्सरे आश्वयुजशुक्लपक्षे सप्तम्यां भानुवासरे शुभनक्षत्र — शुभयोग — शुभकरण — एवङ्गुणविशेषणविशिष्टायामस्यां शुभतिथौ श्रीरुक्मिणीसत्यभामासमेतश्रीकृष्णार्पणमस्तु ॥

No. 936. प्लुतानुशासनम्.

PLUTĀNUŚĀSANAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 42*b* of the MS. described under No. 857.

Complete.

This work notes down those places in the Taittirīyaśākhā of the Yajurvēda where Plutas or protracted vowel-sounds occur.

Beginning:

तैतिरीयस्य वेदस्य प्लुतानामनुशासनम् ।
यथाश्रुति यथान्यायं सकलं क्रियते मया ॥
आद्येषु त्रिषु वर्णेषु प्लुतानामिह संभवः ।
तत्रावर्णाः प्लुताः पञ्च पदान्ते सानुनासिकाः ॥
यशो ममाँ ३ यत् घ्राङ् ३ उपहूताँ ३ सुश्लोकाँ ४ सुमङ्गलाँ ४ ॥

End:

सामनि त्रिहा ऋता स्यादि नाभा मा वा द्वयन्द्वयम् ।
प्रायशोऽन्त्ये तु दीर्घावित्याचार्यैरभिधीयते ॥
इत्येष कथितस्सर्वस्समासात् प्लुतनिर्णयः ।
यजुषान्तैतिरीयाणां सन्देहविनिवृत्तये ॥

Colophon:

इति प्लुतसङ्ग्रहः ॥

No. 937. फुल्लसूत्रं भाष्यसहितम्.

PHULLASŪTRAM WITH COMMENTARY.

Substance, palm-leaf. Size, 16½ × 1½ inches. Pages, 104. Lines, 14 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

A commentary by Ajātaśatru on the Phullasūtra, which explains the various modes of chanting the verses of the Sāma-Vēda.

The fly leaf contains the following note :-इदं ग्रन्थम् (अयं ग्रन्थः) अजातशत्रुविरचितं फुल्लभाष्यम् । शुभमस्तु । आद्यन्तं रामस्वामिस्वहस्तलिखितम् ।

Beginning :

अथ तालव्यमा इ॒ध॒वृद्धम् । वृद्धस्य तालव्यस्य आइभाव आदेशो भवति । अवृद्धं प्र॒ति॒कृतिः । अवृद्धं यत्तालव्यं तत्प्रकृतिर्भवति । एङ ऐई इत्येतानि तालव्यानि । एतान्येव तालव्यशब्देनोच्यन्ते । आ इ प्राप्तो(प्ते) मो(ओ) इभावे(वो) भवति। हिशब्द एवाहि सौभारमहीयवयोः । प्रथमसूत्रेण आ इ भाव(वं)प्राप्तस्य तालव्यस्य ओ इ भावो भवति ।

Colophon :

इत्यजातशत्रुभट्टोपाध्यायविरचिते फुल्लभाष्ये भावः परिसमाप्तः ॥

End:

यण्वादीनां प्रस्ताव्या उत्तराः आद्यवत् प्रस्तावे प्राप्ते उत्तरयोः प्रस्तावलोप उच्यते अप्रस्ताव्या उत्तरा इति । प्रस्ताव्ये वासन्तनिनिः प्रस्ताव्ये वासन्तनिनिः । यण्वाप्यंसन्तनिशाकरवर्णानामुत्तरस्तोत्रीया(:) प्रस्ताव्या इत्युक्तम् । तस्मिन् प्राप्ते विकल्पमाह सन्तनिन उत्तरे स्तोत्रीये प्रस्ताव्ये भवता प्रस्ताव्ये वेति विकल्प उत्तरयोरिति सिद्धम् ॥

Colophon :

उपाध्यायाजातशत्रुणा आत्मनोऽनुस्मरणार्थं कृतं वाररूचस्य फुल्लस्य विवरणम् ॥

* * * *

इलान्दस्य स्तौभिकेऽनुगाने त्रिरुक्ताभ्यां प्रस्तावो भवति यथोक्त

No. 938. फुल्लसूत्रभाष्यम्.

PHULLASŪTRABHĀṢYAM.

Substance, paper. Size, 12 × 9¾ inches. Pages, 211. Lines, 19 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Same as the last, excepting the end, which being different is extracted below.

End:

योनावष्टाक्षरपादाभ्यासात् षोडशाक्षरप्रस्तावो भवति। दद्राणायान्त्वेकादशाक्षरपादे एकादशाभ्यासे द्वाविंशतिप्रस्तावो भवति। यण्वादीनां प्रस्ताव्या उत्तराः। आध्य(द्य)वत्प्रस्तावे प्राप्ते उत्तरयोः प्रस्तावलोप उच्यते अप्रस्ताव्या उत्तरा इति। प्रस्ताव्ये वा सन्तनिनः यण्वाप्रत्य(दि)सन्तनिशाकरवर्ण उत्तरस्तोत्रीया अप्रस्ताव्या इत्युक्तम्। तस्मिन् प्राप्ते विकल्पमाह। सन्तनिन उत्तरे स्तोत्रीये अप्रस्ताव्ये भवतः प्रस्ताव्ये वेति विकल्पः। उत्तरयोरिति सिद्धम् ॥

उपाध्यायाजातशत्रुणात्मनोऽनुस्मरणार्थं कृतं वाररुचेः फुल्लस्य विवरणं समाप्तम् ॥

आमहीयवसामादिश्रायन्तीयकृतावधिः(म्) ।
ऊहसागरमुद्धर्तुं शक्नुमः फुल्लनौकया ॥
सामजालजलाकीर्णं छन्दःकल्लोलसङ्कुलम् ।
तन्त्रग्राहान्वितं वन्दे सामवेदमहार्णवम् ॥
सप्ताकारविभक्तिरम्यतनुमान् सप्तस्वरद्वीपवान्
नानारूपमखाख्यरत्ननिलयो देवर्ष्यनेकाश्रयः ।
कल्पेन्दूदयवर्द्धमानविभवश्छन्दोनदीपूरित-
स्तोभोत्तुङ्गतरङ्गवानवतु वस्सामागमाम्भोनिधिः ॥

No. 939. भारद्वाजशिक्षा.

BHĀRADVĀJAŚIKṢĀ.

Pages, 18. Lines, 18 on a page.

Begins on fol. 63*a* of the MS. described under No. 864.

Complete.

A work on phonetics, accents, &c., in relation to the Kṛṣṇa-Yajur-Vēda; according to Bhāradvāja.

Beginning:

गणेशं प्रणिपत्याहं सन्देहानां निवृत्तये ।
शिक्षामनुप्रवक्ष्यामि वेदानां मूलकारणम् ॥
वृजने ज उदात्तश्चेदकारेण सहोच्यते ।
स्तुतं धृतं नयाचो(वृतेनो)र्ध्व(र्ध्वं) हव्यपूर्वोऽन्त आहुतम् ॥
स्तुतं पदन्तु वाक्यान्ते प्रचयः परिकीर्तितम् ।

End:

क्रम इङ्गचश्च वर्णोक्तिर्यजुरादिसमद्वयी ।
पदसाङ्ख्यं वर्णसाङ्ख्यमवधानाष्टकं बुधैः ॥
यो जानाति भरद्वाजशिक्षामर्थसमन्विताम् ।
ब्रह्मलोकमवाप्नोति गृहमेधी गृहं यथा ॥

Colophon:

भारद्वाजशिक्षा समाप्ता ॥

No. 940. भारद्वाजशिक्षा.

BHĀRADVĀJAŚIKṢĀ.

Pages, 12. Lines, 18 on a page.

Begins on fol. 114*a* of the MS. described under No. 867.

Complete.

Same work as the last though slightly differing from it.

Beginning:

गणेशं प्रणिपत्याहं सन्देहानां निवृत्तये ।
शिक्षामनुप्रवक्ष्यामि वेदानां मूलकारणम् ॥

वृजने ज उदात्तश्चेदकारेण सहोच्यते ।
स्तुतं प्रचय इत्यन्ते न नयोत्तरतो यदि ॥
घृतेनोर्ध्वो हविश्चाथो हव्यपूर्वोऽन्त आहुतम् ।
रादत्परशुरन्तोच्चे त्विज्यं(ङ्गचं) पर्शुश्च भक्तितः ॥
पर्षश्चैवातिपर्षापि स्वरभक्तेस्तु नित्यता ।
पापं विलोमपूर्वे च अकार्षं गौ(का)र्षिरादिषु ॥

End:

अन्त्यन्तु ज्योतिरापो वा इमे वा एत एव च ।
प्रजापतिश्च रक्षांसि प्रजापतिर्नवैषु च ॥
आदौ नयति वित्तान्वा वाणुशश्शो युनक्त्यपन् ।
दर्भास्यौस्माद्विषूची मम ब्राह्मण इति(त)त्त्वतः॥
अवस्याश्च नदृश्शत्रयेव मध्ये अकारवान् ।
निमित्ति च निमित्तश्च व्यपेतः कार्यभाग्भवेत् ॥

Colophon:

इति श्रीभारद्वाजशिक्षामूलं समाप्तम् ॥
प्रथमोऽध्यायः ॥

No. 941. भारद्वाजशिक्षा सभाष्या.

BHĀRADVĀJAŚIKṢĀ WITH COMMENTARY.

Pages, 92. Lines, 18 on a page.

Begins on fol. 120*a* of the MS. described under No. 867.

Complete.

A commentary on the last described work; by Vēlimakanyā Sūrāvadhāni.

Beginning:

श्रीमन्तं गणपं प्रणम्य शिरसा वाग्देवताञ्चोत्तमां
श्रीमद्व्यासकृपामृतं सुमनसा कृत्वा महानुग्रहात् ।

श्रीमान् वेलिमकन्यनामपुरजस्सूरावधानीत्यहं
शिक्षाभाष्यमतस्त्वसंशयकरं वक्ष्ये बुधानाम्मुदे ॥
गणेशं प्रणिपत्य . . कारणम् ।

श्रीमहागणपतिं प्रणम्य वेदानां ग्रन्थत्रयाणां संहितानामादिकारणम् । येषु पदेषु सन्देहाः प्रवर्तन्ते तेषां सन्देहानां निवारणाय शिक्षां प्रवक्ष्यामीति भरद्वाजमहामुनिना प्रणीतम् ।

वृजने ज . . सहोच्यते

एतदारभ्याकारादिस्वरसंहितानि पदानि क्रमेण कथ्यन्ते । वृजने वृजनशब्दे जकारोऽकारसहितस्स्यात् स जकारः उदात्तो यदि । यथा--वृजनं दोहसे ।

End:

इदमिन्द्र प्रतिहव्यं गृभाय । नपुंसकत्वात् भागधेयं प्रेप्सति । तस्मै यदाहुतिं न जुहुयात् । यजमानश्च ध्यायेच्छतरुद्रीयमित्याद्येकवचनत्वात् य एवं चतुर्होतॄणामृद्धिं वेद । ऋध्नोत्येव । य एषामेवं बन्धुतां वेदेत्यादिपुंलिङ्गबहुवचनत्वादित्यादिर्विज्ञेयः ।

क्रम ज्यं(इङ्गचं) च कण्ठोक्तिरञ्जुरादेसद्वयी (यजुरादिसमद्वयी) ॥
पदसाङ्ख्यं सर्वसाङ्ख्यमवधानाष्टकं बुधैः ।
यो जानाति भरद्वाजशिक्षामध्यसमन्विताम् ॥
स ब्रह्मस्थानमाप्नोति (गृहमेधी) गृहं यथा ॥

Colophon:

इति श्रीवेलिमकन्यासूरावधानिविरचितं भारद्वाजशिक्षाभाष्यं द्वितीयोऽध्यायः समाप्तः ॥

No. 942. भारद्वाजशिक्षाव्याख्या.
BHĀRADVĀJAŚIKṢĀVYĀKHYĀ.

Substance, palm-leaf. Size, $17\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 62. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are : Aniṅgyam 32*a*, Siddhāntaśikṣā 36*b*, Sarvasammataśikṣā 39*b*, Aniṅgyavyākhyānam 45*a*.

Incomplete.

Same as the last.

No. 943. योहिप्राप्तिलक्षणम्.

YŌHIPRÁPTILAKṢAṆAM.

Substance, paper. Size, $7\frac{3}{4} \times 6\frac{1}{4}$ inches. Pages, 4. Lines, 14 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 39*a*. The other works contained herein are : Ēkāvalī 1*a*, Vālmīkisūtram 17*a*, Hrasvadīrghaplutamātrālakṣaṇam 41*a*.

Incomplete.

A treatise on the change in the accents of verbs in the Sāma-Vēda, when they are in conjunction with यत् and हि, the form यः of यत् being used in the formation of the name योहि.

Beginning:

ऋग्वेदस्तु घनान्तस्स्यात् यजुर्वेदो जटान्तकः ।
सामवेदः पदान्तस्स्यात्संहितान्तस्त्वथर्वणः ॥
यच्छब्देन हिशब्देन तिङन्तं यत्पदं युतम् ।
उदात्तवत्तद्विज्ञेयं सम्बोधनपरन्तथा ॥

यच्छब्देनेति यः या यत् इति सप्त विभक्तयः । यावत् यावान् यावती यथा यदा यर्हि यतः यत्र इत्येतैर्युक्तं क्रियापदं सर्वमुदात्तवद्भवति ॥

End:

अपर्वत्वादसंज्ञत्वादव्ययत्वाच्च नित्यशः ।
मन्द्रो हि नु हि भूतस्तु परिखार इति स्मृतः ॥

उच्चान्नीचैरवस्थानं हीति संज्ञा प्रकीर्तिता ।
नीचादुच्चैरवस्थानं न्विति संज्ञा प्रकीर्तिता ॥

No. 944. योहिप्राप्तिः.

YŌHIPRĀPTIḤ.

Pages, 6. Lines, 5 on a page. Character, Nandināgarī.

Begins on fol. 36*a* of the MS. described under No. 857.

Complete.

There is herein another copy of this work on fol. 44*a*, in Grantha character, extending over 2 pages of 7 lines each.

A treatise on certain changes in the accent of certain verbs as occuring in the Kṛṣṇa-Yajurvēda ; by Hōmakanyāpurasūrabhaṭṭa.

Beginning :

श्रीमद्गणेशं प्रणिपत्य देवं श्रीसूरिनारायणसुप्रसादात् ।
वक्ष्ये क्रियायास्स्वरलक्षणं यद्यद्धोमकन्यापुरसूरभट्टः ॥
तस्माद्यज्ञ च चत्वारि पर आहरदुच्चभाक् ।
प्रायच्छत्त्रिर्यवं तस्मात् तस्मै त्वेषपरस्त्वसे ।
प्राविशत्तं प्राह तादृग्यत्सोमोऽजनयत्तथा ॥
मदोद्ध यत्र व्यावृद्धौ याते यं द्याति विश्व तान् ।
मात्रान्य सोऽम नायेंते त्रिवृत(त्त)स्मादसं पितृ ॥

No. 945. योहिप्राप्तिः सभाष्या.

YŌHIPRĀPTIḤ WITH COMMENTARY.

Pages, 11. Lines, 22 on a page.

Begins on fol. 294*b* of the MS. described under No. 867.

Complete.

This is wrongly named Pāṇinīyaśikṣā in the colophon.

Beginning:

तस्माच्चत्वारि परतश्चेदाहरच्चाद्युदात्तवान् । तस्माच्चत्वारि एवंपरः आहरदित्यत्र क्रियाशब्द आद्युदात्तो भवति। यथा सोममाहरत्तस्मात् । सोमञ्चा-हरच्चत्वारि । (प्रायच्छत्त्रिर्यवं तस्मात्तस्मै त्वैषपरस्त्वसे । त्रिः यवं तस्मात् तस्मै त्वा) एषः एवंपरं प्रायच्छदित्यत्र अयच्छदिति पदमाद्युच्चं स्यात् अने(से) सकाराद्य(न्य)वर्णे परे सति । यथा यत् त्रिः प्रायच्छत् ।

End:

यत्तस्यां दिशि भवति। यत्तद्वित्तं वेद्यमसुराणामविन्दन्त । येषाꣳह्येष भागस्तेभ्य एनं गृह्णाति। यो यक्ष्य इत्युक्त्वा न यजते। यस्यैवं विदुषोऽदाभ्यो गृह्यते । यत्तं दक्षिणाभिः । यावानेव यज्ञस्तमन्ततोऽन्वारोहति। ये यज्ञपतिं वर्द्धानित्याह । इत्याद्येकयजुरन्तःपातित्वाभावाच्च(च्च) तत्स्वरस्सूचनार्थं बाला(ना)मिति वर्णितः ॥

Colophon:

पाणिनीयाशिक्षा समाप्ता ॥

No. 946. योहिप्राप्तिः सभाष्या.

YŌHIPRÁPTIḤ WITH COMMENTARY.

Pages, 12. Lines, 22 on a page.

Begins on fol. 334*a* of the MS. described under No. 867.

Complete.

A work with commentary treating of the change in Vēdic accent caused by the proximity of a word to other words.

Beginning:

तस्माच्चत्वारिपरश्चेदाहरच्चाद्युदात्तवान् । तस्मात् चत्वारि एवंपर आहरदित्यत्र क्रियाशब्दः आद्युदात्तो भवति । यथा सोममाहरत्तस्मात् । सोमं चाहरच्चत्वारि । एषः एवंपर(रं) प्रायच्छदित्यत्र अयच्छदिति पदमाद्युच्चं

स्यात्। आ(अ)सि सकारान्यवर्णे परे सति। यथा यत्रिः प्रायच्छत्। वसन्ताय प्रायच्छद्यवन्। जयान् प्रायच्छत्तस्मात्। प्रायच्छत्तस्मादैन्द्रा-वैष्णवन्। स तं प्रायच्छत्तस्मै त्वा। त्वेति किम्? प्रायच्छत्तस्मै द्वितीयम्। तस्मै प्रायच्छदेष ते योनिः।

End:

यावानेव यज्ञस्तमन्ततोऽन्वारोहति। ये यज्ञपतिं वर्धानित्याह। इत्या-द्येकयजुरन्तःपातित्वाभावं(वात्) च तत्स्थस्वरः सूचनार्थं बाला(ना)मिति वर्णितः॥

The following stanzas point out the places in the Kṛṣṇa-Yajur-Vēda where the final doubled न् does not form a conjunct consonant with the following initial य्, व्, ह्.

नकारान्तं पदं पूर्वं यवहेषु परेषु च।
नकारयवहा मध्ये तत्र वर्णमसंयुतम्॥

नकारस्य वकारस्ययकारः परतो यदि।
विशेषं तत्र जानीयात् द्वित्वमित्यभिधीयते॥

नकारान्तं पदं पूर्वं वकारद्वपरेऽपि च।
विशेषं तत्र जानीयात् द्वित्वमित्यभिधीयते॥

यवहेषु च संयुक्तो नकारस्या(श्चा)न्तद(ग)स्त्विति।
ह्रस्वपूर्वो नकारस्य द्वित्वं न स्यात् कदा चन॥

नकारान्तं पदं पूर्वं यपरे हपरे च वा।
तत्रैव तु नकारस्यासंयुतत्वं न विद्यते॥

नस्यान्तगस्त्य(स्य) दीर्घात्तु यवहे हे च हल्परे।
नकारमाद्ययोस्तत्र न स्यात् संयुतता असत्॥

निरवपन् यानि, मूर्धन्वती, एतस्मिन् हि सर्वाभ्यः, नान्ये वृषण्वन्,

प्रत्यङ् होतार मेवैनान् युनक्ति, एतान् वा अरुणः, यज्ञान् व्यादिशत्, आसन्निषून् हृत्स्वसः, आत्मन् ह्यङ्गानि, तिष्ठन् ह्याश्रुततरम्, तिक्तान् ह्येनान्,

* * * *

स्यातां सोर्ध्वे खदोर्ध्वे च ङसौ ह्रस्वद्विमात्रिकौ ।
षपरां नित्यखदोर्ध्वे च हकारे हल्परे तथा ॥
स्यातां सोर्ध्वे खदोर्ध्वे च ङसौ ह्रस्वद्विमात्रिकौ ।
षपरां नित्यखदोर्ध्वे च हकारे हल्परे तथा ॥

Colophon:

योहिप्राप्तिशिक्षावचनानि समाप्तानि ॥

No. 947. योहिप्राप्तिः सभाष्या.

YŌHIPRĀPTIḤ WITH COMMENTARY.

Pages, 28. Lines, 5 on a page. Character, Nandināgarī.

Begins on fol. 22*a* of the MS. described under No. 857.

Complete.

A commentary on the last described work.

Beginning:

श्रीमद्गणेशं प्रणिपत्य देवं श्रीसूरिनारायणसुप्रसादात् ।
वक्ष्ये क्रियायास्स्वरलक्षणं यद्यद्धोमकन्यापुरसूरभट्टः ॥

तस्माद्यज्ञ च चत्वारि पर आहरदुच्चभाक् ।

तस्माद्यज्ञ; चत्वारि; एवंपरः आहरदित्यत्र आद्युदात्तो भवति । यथा सोममाहरत्तस्माद्यज्ञमुखम् । यज्ञमिति किम्? तद्गौराहरत्तस्माद्गवि, सोममाहरत्तस्मिन्निन्द्रः । सा सोमं चाहरच्चत्वारि च ।

प्रायच्छत्रिर्यवं तस्मात्तरमै त्वैषपरस्त्वसे ।

त्रिः यवं तस्मात् तस्मैत्वा एषः एवंपरः(रं) प्रायच्छदित्यत्रायच्छदिति पदमाद्युदात्तो(त्तं) भवति असे सकारादन्यवर्णपरे सति। यथा—यत्रिः प्रायच्छत्रिः।

End:

ताने(न्ये)व तेन प्रीणाति। सोऽमन्यत। अभ्रिरसि नारिरसीत्याह। यत्सम्भारा अथो खल्वाहुरेते। तेजस्कामस्य मिनुयात्त्रिवृता। हविर्धाने खादन्ते तस्माच्छीर्षण्यदधिषवणे न सन्तृणत्त्यसन्। तावतीमेवास्मिन् रुजं दधाति पितृणाम्॥

Colophon:

योहिभाष्यं संपूर्णम्॥

No. **948.** योहिप्राप्तिः सभाष्या.

YŌHIPRĀPTIḤ WITH COMMENTARY.

Pages, 11. Lines, 19 on a page.

Begins on fol. 219*a* of the MS. described under No. 864.

Complete.

Same as the last.

The name of the author is here given as Gōpakanyāpurasūribhaṭṭa.

Beginning:

श्रीमद्गणेशं प्रणिपत्य देवांश्च(न् श्री)सूर्यनारायणसम्प्रसादात्।
वक्ष्ये क्रियायाः स्वरलक्षणन्तद्गोपकन्यापुरसूरिभट्टः॥

तस्माच्चत्वारिपरश्चेदहरच्चाद्युदात्तवान्।

तस्मात् चत्वारीति पदद्वयपरस्सन् अहरदित्यत्र क्रियाशब्द आद्युदात्तो भवति। यथा—सोममाहरत्तस्माद्यज्ञमुखम्। सा सोमं चाहरच्चत्वारि। एवंपर इति किम्? सोममाहरत्तस्मिन्निन्द्रः। यज्ञमाहरद्यत(त्त)दित(द)म्।

यस्तस्यन्दिसि(त्तस्यां दिशि), यत्तद्वित्तं वेद्यं, येषां शे(द्ये) षभागः, यो यक्ष्या (क्ष्य) इत्युत्वा (क्त्वा), यस्यैवं विदुषोऽदाभ्यो गृह्यते, यतं(त्तं) दक्षिणाभिः, यावानेव यज्ञस्तमन्त(त)ः, ये यज्ञपतिं वर्द्धानित्याह, इत्यादे(द्ये)कयजुरन्तः-पातित्वाभावश्च(वाच्च)। तस्वशाईपं(तत्स्वर)सु(सू)चनार्थं बालानामिति गणितम् ॥

Colophon:

योहिप्राप्तिभाष्यं समाप्तम् ॥

No. **949.** योहिप्राप्तिः सभाष्या.

YŌHIPRĀPTIḤ WITH COMMENTARY.

Pages, 26. Lines, 6 on a page.

Begins on fol. 47*a* of the MS. described under No. 861.

Incomplete.

Same as the last except that there are certain additional passages at the end.

End:

वार्णत्रैलिङ्गचसङ्ख्यानं वक्ष्याम्यक्षरसङ्ख्यया ।
इषे त्वाद्यनुवाकानामेकैकपदशः क्रमात् ॥
अत्र द्वे द्वे अक्षरे तु स संजञ्जिकमुच्यते ।
पूर्वमेव कडौ वृद्धिः दशादिपरमक्षरम् ॥

* * * *

नीतं खातं यशो वागो नाशं नावं शमो वयः ।
वशन्धिलं शरं शैवप्रश्ने समिधनामके ॥
धिया हलं नखं लाभं नरो वायुचलः परः ।
सेवातिस्वानितश्चेति प्रगेन पञ्चदशे मतम् ॥
खरो रागतिलः पूगं नादुपालं वटिस्सह ।

No. 950. योहिलक्षणम्.

YŌHILAKṢAṆAM.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 11. Lines, 4 on a page. Character, Grantha. Condition, good. Appearance, old.

Incomplete. Begins on fol. 1*a*. The other works herein are Agnisandhānam 7*b*, Darśaśrāddhaprayōga 11*a*, Subrahmaṇyastōtram 20*a*, and Dharmaśāstraślōkaḥ 24*a*.

A treatise on the change in the accent of verbs caused by their being compounded with prepositions, or by their being in conjunction with यत्, in the Kṛṣṇa-Yajur-Vēda.

Beginning:

यो हि यद्यतः सोमे सोममुभयन् विमुक्तः । सौम्यो यदि यानि येन यस्य यत्र यस्मिन् यथा यदा ययोर्येषां यस्मात् कस्मादासप्तमपरपदं वान्तोदात्तं वा समस्तं वा भवति ।

End:

द्वेभूर्भुवस्सुवर्द्वे उत्सृज्यां द्वे.

No. 951. रावणभेट्.

RĀVAṆABHĒṬ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 81*a* of the MS. described under No. 864.

Complete.

A mnemonic work relating to the proper pronunciation and recitation of the Black Yajurvēda.

Beginning:

इषे त्वा । नूथ नावै नव वेदे । नावी नाव नखिनीवेगु । निविनखूपि निवहीसू । व नारि श्राजनभानवानश्रावैश्रानिश्रा वचवि (शनि) वावश्रावे-मारोदी । नादन(न्नु)देद्व(दु)निदगु ।

End:

ने ने भुनवै मा(म) गारो ना। नूवि(थ)न(नवौ)भाषा (नू) नृहा(भा) न। मदगतस दशोत्तरवृद्धिः। स्वराणामेकवृद्धिरिति परिभाषा॥

Colophon:

रावणभेट् समाप्तम्॥

No. **952.** रावणभेट्.

RĀVAṆABHĒṬ.

Pages, 14. Lines, 7 on a page.

Begins on fol. 81*a* of MS. described under No. 856. Incomplete.

Same as the last excepting the following at the end.

End:

मदगतस दशोत्तरवृद्धिः। म 10 द 20 ग 30 त 40 स 50

प्रथमे गु सुदीगूगिः द्वितीये च गुगूदुगिः।
तृतीये गूदीर्घयुतं दासिमागू चतुर्थके॥
नीदीर्घं पञ्चमे प्रोक्तं षष्ठे नीदीर्घमेवं च।
नानानस्सप्तमे तूक्तं ह्रस्वा दीर्घाश्च भेटुके॥
विभु नादनवे नीमं निखनारानिमं गिगि।
नेनैवायप्रजप्राचीनप्रसापरदीर्घगाः॥

अर्धान्तिकानुवाकसङ्ख्या

इषे त्वा.

1—0	4—0	7—1	10—8	13—7
2—0	5—0	8—10	11—0	14—27
3—0	6—0	9—0	12—1	

श्रीराम॥

बृहस्पतिः

1—0	9—0	17— 8
2—0	10—0	18—11
3—0	11—0	19—32
4—0	12—0	20— 9
5—0	13—0	21— 0
6—0	14—0	22 – 0
7—0	15—5	
8—0	16—0	

श्रीराम.

गावो वै.

1—0	10—0	19—0
2—0	11—0	20—0
3—0	12 -0	21—0
4—0	13—0	22—0
5—0	14—0	23—0
6—0	15—0	24—2
7—0	16—2	25—0
8—0	17—2	
9—0	18—0	

श्रीराम.

No. 953. रावणभेट्.

RĀVAṆABHĒṬ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 96*b* of the MS. described under No. 851.

Complete. Same as the last.

Beginning:

गोकर्णाकृति मग्नजलं पिबेत् ।
तन्न्यूनमधिकं पीत्वा तज्जलं सुरया समम् ॥(१)
नूथना वै नव वेदे नावीनावनखीनवे गु ।
निवीनखूणिनी वहि . . . जनभानवान ॥

End:

कादि (९) टादि (९) पादि (५) याद्य (८) लवण म (९) म (१०) ममात्रं वर्जयित्वा अन्यत्र मात्रसङ्ख्या इति स्वरसङ्ख्या ॥

Colophon:

इति रावणभेट्ट समाप्ता ।

No. 954. लक्षणरत्नम् बैट्.

LAKṢAṆARATNAM BAIṬ.

Pages, 14. Lines, 7 on a page. Character, Grantha.

Complete.

Begins on fol. 47*a* of the MS. described under No. 857.

A Vēdalakṣaṇa work by Vaidyanāthabhaṭṭa. The contents of this work are given in the extract taken from the beginning of the work.

Beginning :

अथ यजुषि प्रतिपञ्चाशत् पदादिनिहिताकारपदान्तनकारयोः पदान्ततकारप्रग्रहयोः इङ्गचपदाद्याकारयोः संहितावसानस्य च सांहितषत्वणत्वयोर्श्चेकादेशे उत्तरपदाद्यैकारौकारपदान्तङकाराणाञ्च पदान्तसमानाक्षरदीर्घत्रयस्य समविषमसङ्ख्याद्योतकं विसर्जनीयसङ्ख्याप्रतिपादकं प्रतिपञ्चाशदेकैकमक्षरं प्रत्यनुवाकमेकैकं वाक्यं वैण्णाम लक्षणरत्नं वक्ष्यामः। अत्र प्रवृत्त(वर्त)का वर्णा अकाराद्युकारपर्यन्ताः प्लुतवर्ज्जिताः स्वराः पञ्च ।

End :

गावो वै प्यौटाश्याचातल्ये। श्विती। शाक्य। लाकी। व्यपू। मूल्यूतैता। लोटूपिजो। शीच्यौल्यकैत्या। ता चोकेपि। ला। लंशे। शोंमि। कि। चे। ल्याटाशि। शै। टौ। ल्यु। चेच्यु। के। तशा। टोटु। मि। श्योमु।

Colophon :

इति वैद्यनाथभट्टविरचितलक्षणरत्नं सम्पूर्णम् ॥

No. 955. लक्ष्मीकान्तशिक्षा सव्याख्या.

LAKṢMĪKĀNTAŚIKṢĀ WITH COMMENTARY.

Pages, 19. Lines, 21 on a page.

Begins on fol. 300*b* of the MS. described under No. 867.

Complete.

A treatise relating to the Udātta accent of words in the Taittirīya-Yajur-Vēda; probably by Lakṣmīkānta. There is also a commentary.

Beginning:

प्रणम्य नारायणपादपङ्कजे
समस्तलोकत्रितयार्तिहारिणी ।
करिष्यते वेदपदानि पाठतो
निरूप्य चोच्चस्वरनिर्णयो मया ॥

प्रारिप्सितग्रन्थस्य स्वरलक्षणस्य अविच्छेदपरिसमाप्तये लोकत्रितयार्तिहारिणी नारायणपादपङ्कजे प्रणम्य तैत्तिरीयवेदपदानि लोकप्रसिद्धपाठानुसारेण तत्त्वतः प्रतीक्ष्योदात्तस्वर निर्णयो नाम लक्षणं क्रियत इति। ननु किमनेन लक्षणकरेणन स्वत एव वेदपदानि इदमीदृशमिति प्रसिद्धाध्ययनादेव सर्वे तत्त्वतो निश्चिनुयुः तथापि तु प्रतिलक्षणं प्रतिपदं किमिदं किमेवमिति सर्वदा सर्वत्र सन्देहिनां विस्मारिणामस्मादृशां निश्चायकं लक्षणमपेक्षणीयमेवेति तथास्तु। स्वराष्टकस्वरसमुच्चयप्रातिशाख्यादीनि स्वरनिश्चायकानि पूर्वोक्तानि लक्षणानि सन्ति उदात्तस्वरनिर्णयनाम्ना किमनेन लक्षणप्रकरणेनेति आकङ्क्षायामाह—

अन्तोदात्तं पदचेदमाद्युच्चमिदमीदृशम् ।
नियमो न कृतः कैश्चित् कस्मिंश्चित्स्वरलक्षणे ॥

End:

एति तद्यद्धिरण्येन चैकैकस्मात्तथा भवेत्—

एति तद्यद्धिरण्येनेत्यत्र एते(तीत्ये)तत् एति यद्धिरण्येनेत्येवं संबध्यते। राध ऐति तन्मित्रस्य। तदिति किम्? सदोऽभ्यैति सुवर्गम्। रूपमभ्यैति यद्धिरण्येन। हिरण्येनेति किम्? यजमानमभ्यैति यदग्निः। तस्मान्नैका। उत्तमैकस्मादक्षरात्। ओषधीष्वोषधीनाञ्च तदौषधय ओषधीः—सौषधीः। महिमौषधि(ध)यः। एतान्याद्युदात्तानि व्याख्यातानि। एवमुच्चस्वरोऽस्माभिर्निर्णीतो वर्णितः क्रमात्॥

Colophon :

इत्युच्चलक्ष्मीकान्तशिक्षा समाप्तः(प्ता) ॥

No. 956. लोमशशिक्षा.
LŌMAŚAŚIKṢĀ.

Pages, 11. Lines, 18 on a page.

Begins on fol. 83*a* of the MS. described under No. 864.

Complete.

A treatise on phonetics and pronunciation, in relation to the Sāma-Vēda, according to Lōmaśa; written by a traditional student of the Yajur-Vēda.

Beginning :

सामगानप्रियं राममाराधयितुमिच्छता ।
मया लोमशशिक्षेयं याजुषेणापि लिख्यते ॥
लोमशीयां प्रवक्ष्यामि गर्गाचार्येण चिन्तिताम् ।
साभिधानं यथोक्तां कृत्वाचार्यवचनं यथा ॥
ह्रस्वन्दीर्घन्तथा वृद्धमभिगीतन्तु सामगाः ।

End :

यथा धनुषा यतेन क्षिप्ते शारे पुनर्गुणः ।
स्वस्थानं प्रतिपद्येत तद्वद्धस्तगतः स्वरः ॥
शून्ये गृहे पिशाचस्तु गर्जते न च दृश्यते ।
एवं यकार(रा) वक्तव्या धियग्निर्ज्मनिदर्शनम् ॥

Colophon ;

(८) (खण्डः) समाप्तः । इति लोमशशिक्षा समाप्ता ॥

No. 957. वासिष्ठशिक्षा.
VĀSIṢṬHAŚIKṢĀ.

Pages, 2. Lines, 14 on a page.

Begins on fol. 42*a* of the MS. described under No. 864.

Complete.

This is a Śikṣā treating of the euphonic doubling of consonants in Vēdic pronunciation.

Beginning:

स्वरं स्वराच्चानुस्वाराद्व्यञ्जनं व्यञ्जने परे ।
द्विरूपमिष्यते रेफात्स्वरपूर्वात्परश्च तत् ॥
लवाभ्यामुत्तरस्पर्श इति प्राप्तिश्चतुर्विधः(।) ।
न द्वितीयचतुर्थानां द्वित्वं तत्प्राप्तिगोचरे ॥
पूर्वागमस्ततः पूर्वं वै यखि(?)भुजेषु च ।

End:

पदान्तेष्वानुनासिक्य(क्यं) पदसंहितयोक्तया ।
प्राकृतो वैकृतश्चापि तद्धर्मो बुध्यते सुखम् ॥
पदमध्यानुनासिक्ये स्पर्शात्पूर्वे तदुत्तमः ।
अन्तस्थाभ्यः परा तच्चेत्सैवान्तस्थेति निर्णयः ॥

Colophon:

वासिष्ठशिक्षा समाप्ता ॥

No. 958. विकृतिवल्ली.

VIKṚTIVALLI.

Pages, 4 Lines, 5 on a page.

Begins on fol. 13*a* of the MS. described under No. 885.

Incomplete.

This is a treatise explaining the 8 Vikṛtis or variations such as Jāṭā, Ghana, etc., in relation to Vēdic recitation.

The 6th stanza which refers to a commentary under the name of Vikṛtikaumudī seems to be an interpolation, as the MS. contains only the text. The reference at the end to an Ādi - purāṇa relating to Vēdic tradition is worth noting.

Beginning:

सर्वज्ञन्तं जगत्सेतुं परमात्मानमीश्वरम् ।
वन्दे नारायणं देवं निरवद्यं निरञ्जनम् ॥

नत्वादौ शौनकाचार्यं गुरुं वन्दे महानिधिम् ।
मुनीन्द्रं सर्वदेवज्ञं ब्रह्मज्ञं लोकविश्रुतम् ॥
नमामि शौनकाचार्यं शाकल्यं स्थविरन्तथा ।
ब्रह्मविद्यागुरुं श्रेष्ठं भारद्वाजं बृहस्पतिम् ॥

शैशिरीये समाम्नाये व्यालिनैव महात्मना ।
जटाद्या विकृतीरष्टौ वक्ष्यन्ते नातिविस्तरम् ॥
जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिणः (णा) ॥

ग्रन्थे विकृतिवह्याख्ये व्यालिप्रोक्ते पुरातने ।
टीकेयं क्रियतेऽस्माभिर्नाम्ना विकृतिकौमुदी ॥

ब्रूयात्क्रमविपर्यासे क्रममीदृग्विधं दिशेत् ।
जटाख्यां विकृतिं धीमान् विज्ञाय क्रमलक्षणम् ॥

अनुलोमविलोमाभ्यां त्रिवारं हि पठेत्क्रमम् ।
विलोमे पदवत्सन्धिरनुलोमे यथाक्रमम् ॥

षत्वं णत्वञ्च दीर्घत्वं क्रमसन्धौ यथोच्यते ।
व्युत्क्रमे तन्न कर्तव्यं स्वरक्षैप्रादिकन्तथा ॥

End:

शाकल्यस्य शतं शिष्या नैष्ठिकब्रह्मचारिणः ।
पञ्च तेषां गृहस्थास्ते धर्मिष्ठाश्च कुटुम्बिनः ॥
शैशिरो बाष्कलस्साङ्ख्यो वात्स्यश्चैवाश्वलायनः ।
पञ्चैते शाकलाश्शिष्याश्शाखाभेदे प्रवर्तकाः ॥

इदं जटापाठविधानमुक्तं महत्तमान्सुस्मरता च देन(व)म् ।
पठेज्जटां कीर्तिमुपैति मेयादन्ते पदं यान्ति परं हि विष्णोः ॥

क्रमाध्ययनसंपन्नो मन्त्रब्राह्मणपारगः ।
जटापारायणपरो रुद्रलोके महीयते ॥ इत्यादिपुराणे ॥

जटाध्ययनसम्पन्नाः सर्ववेदार्थतत्पराः ।
निषेदू रन्तिदेवस्य . . . .
वेदवेदार्थतत्त्वज्ञा जटाक्रमविशारदाः ।
श्रोत्रिया ब्राह्मणाश्श्राद्धे पङ्क्तिपावनतत्पराः ॥
प्रातिशाख्यादिशास्त्रज्ञाः सर्वशिक्षा

No. 959. विकृतिवल्लीव्याख्या विकृतिकौमुदी.
VIKṚTIVALLĪVYĀKHYĀ VIKṚTIKAUMUDĪ.

Pages, 35. Lines, 5 on a page.

Begins on fol. 6*a* of the MS. described under No. 902.

First Paṭala : complete.

A commentary on the last described work by Gaṅgādharācārya.

Beginning :

यत्प्रभावेन भासन्ते ब्रह्माद्या जगदीश्वराः ।
यज्ज्ञानाद्विनिवर्तन्ते पाशाः पुत्रेषणादयः ॥
तं वन्दे परमानन्दं जगदानन्दवर्द्धनम् ।
नित्यं ज्ञानधनं विष्णुं लोकाधिष्ठानमच्युतम् ॥

ग्रन्थे विकृतिवल्ल्याख्ये व्यालिप्रोक्ते पुरातने ।
टीकेयं क्रियतेऽस्माभिर्नाम्ना विकृतिकौमुदी ॥

तद्यथा सर्वज्ञं तं निरञ्जनमिति । नन्वस्मिन् जगतीतले ग्रन्थारम्भे लक्षणादौ कार्ये मङ्गलाचारं कुर्वाणाश्शिष्टाः प्रवर्तमानाः परिदृश्यन्ते । अतोऽयं व्यालिराचार्यः स्वचिकीर्षितस्य जटाद्यष्टलक्षणप्रतिपादनविकृतिवल्लीनाम्नो ग्रन्थस्य निर्विघ्नेन परिसमाप्त्यर्थं शिष्टाचारप्राप्ततया विशिष्टेष्ट-

दैवतं परमेश्वरं सर्वाभीष्टफलप्रदातारं नमति तं सर्वज्ञं तमित्यनेन श्लोकेन। तमहं वन्दे नमस्करोमीत्यर्थः ।

End :

यत्रोच्चस्वरितोदय इत्यत्र स्वरितग्रहणेन जात्यो गृह्यते न वैवृत्तादयः स्वरिताः तदुदाहरणम्—क्वो वः क्वा १ क्व वः । कन्या वाः। रायोवनिः । अभ्यर्षार्षा १ भ्या अभ्यर्ष अभी ३ दम् इत्युदाहरणानि स्वयमेवोन्नेयानि ॥

Colophon :

गङ्गाधराचार्यविरचितायां विकृतिकौमुद्यां टीकायां व्यालिरा(ल्या)चार्यप्रणीतजटाद्यष्टविकृतिलक्षणप्रतिपादकविकृतिनाम्नि ग्रन्थे विकृतिलक्षणं नाम प्रथमपटलं समाप्तम् ॥

No. 960. विलङ्घ्यम्.
VILAṄGHYAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 913.

Complete.

This work gives a list of words in the Yajur-Vēda ending in ए, ऐ, ओ, and औ, as such endings are often obscured by Sandhi in the Saṁhitā-pāṭha.

Beginning :

अथ यजुस्संहितायामकाराकारपूर्वस्वरपरो यकारो येषु पदेषु लुप्यते तेष्वेकारैकारान्तानि पदानि प्रवक्ष्यन्ते.

End :

उपसधपूर्वस्थे नोर्वन्तरिक्षं परः। हवामहै हन्तवै हुते हूत उपहवे हत्यै हित्यै होत्रे हवनीय ऐन्द्रः हुते ह्वयते हुते हूयते हूयन्ते ह्वयामहै हरामहै हरै हरन्ते हस्ते अनी(नि)ङ्ग्यान्तः ।

Colophon:

व्यक्तिविलङ्घ्यस्समाप्तः ॥

No. 961. विलङ्घ्यम्.

VILAṄGHYAM.

Pages, 4. Lines, 8 on a page. Character, Grantha.

Begins on fol. 13*a* of the MS. described under No 857.

Complete.

Same as the above.

No. 662. विलङ्घ्यम्.

VILAṄGHYAM.

Pages, 12. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 853.

Complete. Same as the last.

No. 963. विलङ्घ्यम्.

VILAṄGHYAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 36*a* of the MS. described under No. 888.

Incomplete.

Another treatise on the same subject as the last, by Nāgadēva son of Yajña-Nārāyaṇa.

Beginning:

शुद्धस्फटिकसङ्काशं पुण्डरीकनिवासिनम् ।
दातारं सर्वविद्यानां हयग्रीवमुपास्महे ॥
यज्ञनारायणात्सूरेर(रु)त्पन्नस्सोमयाजिनः ।
नागदेवो वि(वदिष्यामि)मि विलङ्घ्यानि पदान्यहम् ॥

ऋकारे पर आकारः परयोरोदुवर्णयोः ।
ओदौतौ स्वर एदैतौ संछन्नस्सं(न्नौ सं)हितागमे ॥

End:

स्वदन्ते सातये सिचे स्तवध्यै सवने सने ।
सूणे संवत्सरे स्योने सचन्ते सृज्यते वसै ॥
सहते सरमे सुन्वे सूदयन्ते च सिक्तये ।
सेचते सुरभौ सेके सन्तु सर्वे च सन्यसे ॥
सुम्नेभिस्तु

No. 964. विलङ्घ्यम्.

VILAṄGHYAM.

Pages, 4. Lines, 30 on a page.

Begins on fol. 87*a* of the MS. described under No. 859.

Complete.

Beginning:

यज्ञनारायणात्सूरेरुत्पन्नस्सोमयाजिनः ।
नागदेवो वदिष्यामि विलिङ्घ्यानि पदान्यहम् ॥
ऋकारे पर आकारः परयोरोदुवर्णयोः ।
ओदौतौ स्वर एदैतौ संछन्नौ संहितागमे ॥
एतदन्तानि तान्याहुर्विलिङ्घ्यानीति वैदिकाः ।
वर्णक्रमाद्गृहीष्यन्ते तान्यन्यूनादिकं मया ॥

End:

हस्ते हुवध्यै होतारौ हुताविव हवे भवेत् ।
इदं लक्षणरत्नन्तु बुध्यादिगुणसागरम् ॥
नागदेवात्ससुत्पन्नं हृदये धार्यतां बुधैः ।
एतद्विलिङ्घ्यमादृत्य पण्डितैः परिगृह्यताम् ॥

प्रोक्तं यथा तथा वापि पित्रा बालकलोक्तिवत् ।
मयोक्तान्यृग्विलिङ्ग्यानि वर्णक्रमत एव तु ॥
विलिङ्ग्यलक्षणश्लोका अष्टषष्टिरुदीरिताः ॥

Colophon:

समाप्तं (विलङ्ग्यम्) ॥

No. 965. विलङ्ग्यं सव्याख्यानम्.

VILAṄGHYAM WITH COMMENTARY.

Pages, 20. Lines, 20 on a page.

Begins on fol. 32*b* of the MS. described under No. 855.

Complete.

Another treatise with commentary on the same subject as the above; by Nārāyaṇa.

Beginning:

प्रणम्य भारतीन्देवीं सर्वलोकैकमातरम् ।
नारायणः प्रवक्ष्यामि विलङ्ग्यानि पदान्यहम् ॥

अनेन श्लोकेन प्रारिप्सितस्य विलङ्ग्यलक्षणस्याविच्छेदेन परिसमाप्तये सर्वलोकैकमातरं भारतीन्देवीं प्रणम्य अथ नारायणोऽहं विलङ्ग्यानि पदानि प्रवक्ष्यामीति प्रतिज्ञायते । प्रारिप्सितलक्षणग्रन्थस्य विलिङ्ग्यस्य स्वरूपज्ञानार्थं तत्प्रतिपादकत्वलक्षणविषयः प्रयोजनं सम्बन्धश्च अत्रैव सूचिता विज्ञेया इति प्रतिज्ञावाक्यं कृतम् विलङ्ग्यानीति विशेषणं व्याचष्टे ॥

एकारैकारवर्णौ यौ संहितायां विकारिणौ ।
संहितायां विषये एकारोऽयं विकारः अयं लुप्यते

End:

इषं स्तोतृभ्य आभर, पूति(ती)गन्धस्यापहत्या अग्नये, रक्षसे हन्तवा उ,

अंशुमाहरामह(हा) इति, विष्वधामहा इति ब्रह्मा पशोरुद्धारमुद्धर इति वरुणस्यान्तर्हित्या एधोऽसि ॥

Colophon :

इति विलिङ्घ्यव्याख्यानं सम्पूर्णम् ॥

No. **966.** विलङ्घ्यं सव्याख्यानम्.

VILAṄGHYAM WITH COMMENTARY.

Pages, 20. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 856.

Complete. Same as the above.

Beginning :

Same as in the last.

End :

रक्षसे हन्तवा उ अंशुमाहरामहा इति ।
ह्वयामहै हरेर्हित्यै नैभ्यःसत्य(न्त्य)धिकानि तु ।

निह्वयामह इति ब्रह्मा पशोरुद्धारमुद्धरा इति वरुणस्यान्तर्हित्या एधोऽसि इति संहितायां विकारैकारैकारान्तानि पदानि विलिङ्घ्यानीति अभिधीयन्ते । अग्रे वार इत्यादीनि वात्या इत्यन्तानि पदान्यमूनि विलिङ्घ्यानीति सं(म्ब)न्धः एभ्योऽधिकानि न सन्ति ॥

Colophon :

इति विलङ्घ्यव्याख्यानं सम्पूर्णम् ॥

No **967.** वेदलक्षणानुक्रमणिका.

VĒDALAKṢAṆĀNUKRAMAṆIKĀ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 34*a* of the MS. described under No. 861.

Complete.

A list of the names of the various kinds of Vēdalakṣaṇa-works is given herein in verse.

Beginning:

प्रातिशाख्यासंहितायारसमानं नपरं तथा ।
तपरं प्रग्रहश्चैव कुरिकी च विलङ्घ्यकम् ॥
इङ्गचानिङ्गचमवर्णी च आवर्णी ह्रुतमेव च ।
रङ्गह्रुतं पूर्वदीर्घ उभयोत्तरदीर्घकौ ॥
यण्दीर्घौ योहिभाष्यं च तथा रावणभेटु च ।
वर्णक्रमं जटावल्ली त्रिक्रमं चान्त्यवेष्टनम् ॥
स्वरपञ्चाशतं चैव षड्विंशतिसूत्रकम् ।
शाखाशमानमरुणशमानं सविशेषतः ॥
अथ नवशिक्षा--
भारद्वाजव्यासशम्भुपाणिनीकौहलीयकम् ।
बोधायनो वसिष्ठश्च वाल्मीकिर्हरितं नव ॥
सर्वसम्मतमारण्यं तथा सिद्धान्तमेव च ।
उपशिक्षा इमे प्रोक्ता लक्षणज्ञानकोविदाः(दैः) ॥
सप्तलक्षणनामानि--
समानं च विलङ्घ्यं च नपरं तपरं तथा ।
अवर्ण्यावर्णि(र्ण्य)निङ्चान्तं सप्तलक्षणमुच्यते ॥
वेदोच्चारणक्रमः--
गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥

End:

उदात्तो ब्रह्मजातिस्स्यान्नीचो राजन्य उच्यते ।
स्वरितो वैश्यजातिस्तु प्रचयश्शूद्रजातय(तिक)ः ॥

No. 968. वेदाङ्गच्छन्दस्सूत्रम्.
VĒDĀṆGACCHANDASSŪTRAM.

Pages, 9. Lines, 24 on a page. Character, Grantha.

Begins on fol. 44*a* of the MS. described under No. 589.

Complete.

Same as the work described under No. 901.

Beginning:

मयरसतजभनलगसंज्ञितं भ्रमति वाङ्मयं जगति यस्य ।
स जयति पिङ्गलनागशिवप्रसादाद्विशुद्धमतिः ॥
त्रिगुरुं विद्धि मकारं लघ्वादिसमन्वितं यकारवाच्यम् ।
लघुमध्यमन्तु रेफं सकारमन्ते गुरुनिबद्धम् ॥
लघ्वन्तं हि तकारं जकारमुभयोर्लघुं विजानीयात् ।
आदिगुरुव भकारमिह पैङ्गले (नं) त्रिलघुर् ॥

* * * *

धीश्रीस्त्री र्.

End:

चतुश्शतं षष्ठो विंशतिः विंशतिर्युगवराम् (ए)का त्रयोदश वृतं गावादौ विंशतिः विंशतिर्यवमति त्रीणि यतिर्विंशतिर्वातोर्मिमष्टादश प्रहर्षिणीविंशतिः शार्दूलविक्रीडितं पञ्चदश अत्रानुक्तं सप्तदशाष्टादशमयवृत्तमष्टौ ॥

Colophon:

इति पिङ्गलाचार्यविरचितं वेदाङ्गच्छन्दस्सूत्रं समाप्तर् ॥

No. 969. व्यालशिक्षा.
VYĀLAŚIKṢĀ.

Pages, 2. Lines, 15 on a page.

Begins on fol. 61*a* of the MS. described under No. 864.

Complete.

This work treats of Jaṭā, Ghana, and the other modes of Vēdic recitation.

Beginning:

अथ शीक्षां प्रवक्ष्यामि व्यालमानिमतानुगाम् ।
पदसन्धिसमायुक्तां स्वरसन्धियुतां तथा ॥
या पदस्य षडावृत्तिः सा जटेत्यभिधीयते ।
क्रमोक्तपदजातं यदुत्तरं तद्द्विरभ्यसेत् ॥
तत्पूर्वं द्विरभ्यस्य द्वितीयेऽतरसमापयेत् ।

End:

जटोत्तरं द्विरभ्यस्य चैकैकं मध्यमादिकम् ।
सन्धिवत्क्रमवच्चेति घन इत्युच्यते बुधैः ॥ इति घनः ॥
शिखेवानुक्रमन्तेषां त्रयाणां क्रममभ्यसेत् ।
जटेवान्तं वेष्टनीयं व्यालेन घन उच्यते ॥ इति पाठान्तरम् ॥

Colophon:

इति व्यालशिक्षा समाप्ता ॥

No. 970. व्यालिशिक्षा.

VYĀLIŚIKṢĀ.

Page, 1. Lines, 17 on a page.

Begins on fol. 44*a* of the MS. described under No. 864

Complete.

This work treats only of Ghana, and is therefore different from the work of the same name described under the last number.

Beginning:

व्यालिशिक्षां प्रवक्ष्यामि ब्रह्मणानुमतः पुरा ।
सहस्रवदनेनाहं सूत्रेण च समन्वितम् ॥
तत्र पूर्वं घनस्यैव प्रमाणं लक्षणं तथा ।
घनस्य च विधिं तत्र घनसन्धिं तथैव च ॥

एवमादि च यत् सर्वं तत् सर्वं वच्मि साम्प्रतम् ।
घने द्वादशसन्धिस्स्यात् त्रयोदशपदं वदेत् ॥

End:

विलोमे मध्यमपदमेकवारं हि केवलम् ।
तत्पूर्वं द्विविधं तूक्त्वा चानुलोमे यथाक्रमम् ॥
पुनश्च मध्यमपदमारब्धव्यमनन्तरम् ।
पूर्ववत् सन्धितः कुर्याद्घन एवं विधीयते ॥

Colophon:

इति व्यालिशिक्षा समाप्ता ॥

No. 971. व्यासशिक्षा.
VYĀSAŚIKṢĀ.

Pages, 32. Lines, 18 on a page.

Begins on fol. 187*a* of the MS. described under No. 864.

Complete.

A work on Vēdalakṣaṇa attributed to Vyāsa.

The following are the names of the Prakaraṇas into which the subject is divided.

1 संज्ञाप्रकरणम्.
2 व्यञ्जनपरदीर्घप्र०.
3. सन्धिप्र०.
4. षत्वप्र०.
5. णत्वप्र०.
6. विसर्जनीयसन्धिप्र०.
7. यत्वप्र०.
8. ऐक्यप्र०
9. आकारप्र०.
10. पूर्वैत्यैकारप्रकरणम्.
11. स्वरधर्मस्वरूपप्रकरणम्.
12. स्वरधर्मसंहिताप्र०.
13. स्वरन्यासप्र०.
14. द्वित्वप्र०.
15. आगमनर्वणप्र०.
16. अङ्गसंहिताप्र०.
17. कालनिर्णयप्र०.
18. सत्त्वतामसप्र०.
19. उच्चारणप्रकरणम्.

The first stanza belongs to a commentary.

Beginning:

वागीशप्रभृतिस्तुत्यं प्रणम्याहं गणाधिपम् ।
करोमि व्यासशिक्षाया व्याख्यानं वेदतैजसम् ॥
श्रीवासुदेवं वरदं प्रणम्य श्रीमद्गणेशं वचसां च देवीम् ।
शिक्षां प्रवक्ष्ये श्रुतिकारणाङ्गां सुबोधकं लक्षणशीर्षभूषाम् ॥
अथ स्वरादिसंज्ञाश्च तत्प्रयोजनमेव हि ।
तत्फलञ्च प्रवक्ष्यामि विदुषां प्रमुदे यथा ॥

End:

वेदामृतं पिबेद्यस्तु स तस्माद्भूसुरो भवेत् ।
एवञ्च व्यासशिक्षाव(वि)द्भूसुरे द्रस्स कथ्यते ॥
श्रीमत्परब्रह्मसुपूर्णचित्तश्रीव्यासकण्ठात् प्रसृतां च शिक्षाम् ।
एतामभिज्ञः प्रयतः पठेद्यः सर्वानभीष्टान् स समश्नुते वै ॥
इति उच्चारणप्रकरणम् ॥

Colophon:

व्यासशिक्षामूलं सम्पूर्णम् ॥

No. 972. व्यासशिक्षा.

VYĀSAŚIKṢĀ.

Pages, 18. Lines, 7 on a page. Condition, good.

Begins on fol 74*a* of the MS. described under No. 23.

Breaks off in the 16th Prakaraṇa.

Same as the last.

No. 973. व्यासशिक्षाव्याख्यानं वेदतैजसम्.

VYĀSAŚIKṢĀVYĀKHYĀNAM: VĒDATAIJASAM.

Pages, 186. Lines, 24 on a page. Character, Grantha.

Complete.

Begins on fol. 51*a* of the MS. described under No. 589.

A commentary on Vyāsaśikṣā; by Súryanārāyaṇa of Vēlmīkanyā city (probably Puttūr).

Beginning:

वागीशप्रभृतिस्तुत्यं प्रणम्याहं गणाधिपम् ।
करोमि व्यासशिक्षाया व्याख्यानं वेदतैजसम् ॥

ब्रह्मादिभिर्देवैस्स्तुत्यं गणाधिपतिमहं नमस्कृत्य व्यासशिक्षाया व्याख्यानरूपं वेदतैजसं लक्षणं वेदस्य तेजः तत्संबन्धि वेदतैजसमिति भाष्यं करोमि ।

श्रीवासुदेवं वरदं प्रणम्य
श्रीमद्गणेशं वचसाञ्च देवीम् ।
शिक्षां प्रवक्ष्ये श्रुतिकारणाङ्गां
सुबोधकं लक्षणशीर्षभूषाम् ॥

वरदमभीष्टप्रदं श्रीमहाविष्णुं श्रीमन्तं गणेश्वरं वचसां गिरान्देवीञ्च प्रणम्य श्रुतिकारणाङ्गां वेदस्य कारणाङ्गां लक्षणशीर्षभूषां प्रातिशाख्यादीनां सर्वलक्षणानां शिरोमणिं सुबोधकं सुव्यक्तं यथा भवति तथा शिक्षां प्रवक्ष्य इति व्यासभगवदुक्तम् ॥

End:

वेदामृतं पिबेद्यस्तु स तस्माद्भूसुरो भवेत् ।
एवञ्च व्यासशिक्षादी भूसुरेन्द्रस्स कथ्यते ॥
श्रीमत्परब्रह्मसुपूर्णचित्तश्रीव्यासकण्ठप्रसृताञ्च शिक्षाम् ।
एतामभिज्ञः प्रयतः पठेद्यः सर्वानभीष्टांश्च समश्नुते हि ॥
श्रीशान्तराङ्गिणा व्यासशिक्षाया भाष्यमुत्तमम् ।
वल्मीकस्य पुरो जातसूरावधानिना कृतम् ॥

Colophon:

इति श्रीसूर्यनारायणविरचिते वेदतैजसे व्यासशिक्षाविवरणे उच्चारणफलप्रकरणं सम्पूर्णम् ॥

No 974. व्यासशिक्षाव्याख्यानं वेदतैजसम्.

VYĀSAŚIKṢĀVYĀKHYĀNAM: VĒDATAIJASAM.

Substance, palm-leaf. Size, 14½ × 1¼ inches. Pages, 236. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Begins on fol. 4*a*. The other works herein are: Jyautiṣam 1*a* and Vēdalakṣaṇam 2*a*.

Same as the last.

Beginning:

वागीशप्रभृतिस्तुत्यं प्रणम्याहं गणाधिपम् ।
करोमि व्यासशिक्षाया व्याख्यानं वेदतैजसम् ॥

End:

श्रीशान्तरङ्गिणा व्यासशिक्षाया भाष्यमुत्तमम् ।
वेल्मीकन्यापूर्जातसूरावधानिना कृतम् ॥

Colophon.

वेल्मीकन्यासूरावधानिविरचिते व्यासशिक्षाविवरणे उच्चारणप्रकरणं सम्पूर्णम् ॥

इदं पुस्तकं रक्ताक्षिनामसंवत्सरे धनुर्मासे शुक्लपक्षे नवम्यां तिथौ सौम्यवासरे इदं पुस्तकं शेषाद्रिजटावल्लभशिष्येण लिखितम्, गुरोर्दीयताम् ॥

No 975. व्यासशिक्षाव्याख्यानं वेदतैजसम्.

VYĀSAŚIKṢĀVYĀKHYĀNAM: VĒDATAIJASAM.

Pages, 173. Lines, 18 on a page.

Begins on fol. 167*a* of the MS. described under No. 867.

Complete.

Same as the last.

Passages from the end are quoted to show the variety in the spelling of the name of the author's native place.

End:

श्रीशान्तरङ्गिणा व्यासशिक्षाया भाष्यमुत्तमम् ।
वेलिमिकन्यापूर्जातसूरावधानिना कृतम् ॥

इति वेलिमिकन्यासूरावधानिविरचिते व्यासशिक्षाविवरणे उच्चारणफल-प्रकरणम् ॥

No. 976. व्यासशिक्षाव्याख्यानं वेदतैजसम्.

VYĀSAŚIKṢĀVYĀKHYĀNAM: VĒDATAIJASAM.

Pages, 145. Lines, 8 on a page.

Complete.

Begins on fol. 1*a* of the MS. described under No. 23.

Same as the last.

No. 977. शमानशिक्षा.

ŚAMĀNAŚIKṢĀ.

Pages, 5. Lines, 30 on a page.

Complete.

Begins on fol. 85*a* of the MS. described under No. 859.

This work gives a list of such words in the Ṛg-Vēda as have their final Visargas dropped in accordance with the rules of Sandhi.

Beginning:

प्रणम्य प्रणताभीष्टप्रदातारं पतिं श्रियः ।
बह्वृचानां सुबोधाय शमानं क्रियते लघु ॥
विसर्जनीय आकारपूर्वको घोषवत्परः ।
व्यञ्जनस्पृक् शसपरो लुप्यते संहितागमे ॥
एषु वर्णक्रमात्तानि प्रवक्ष्यामि पदान्यहम् ।

End:

हिमा हवमाना हूयमाना हिन्वाना हर्या हुवाना हृताहया हेत्या वीरहव्याश्च हादीयद्रश्मानो हिरण्यया वि होत्रा हिता अनिङ्गचान्तो वृष्णो नमसा वाता पर्जन्या परो हस्ताः पञ्चदश ॥

Colophon:

इति शमानमूलं समाप्तम् ॥

No. 978. शमानशिक्षा.

ŚAMĀNAŚIKṢĀ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 10*b* of the MS. described under No. 888.

Incomplete.

The final passage which is quoted under the last number is alone wanting herein.

No. 979. शमानसन्धिः.

ŚAMĀNASANDHIḤ.

Pages, 11. Lines, 6 on a page.

Complete.

Begins on fol. 1*a* of the MS. described under No. 853.

This work gives a list of words from the Yajussaṁhitā similar to that given in the MS. described under No. 977 as belonging to the Ṛg-Vēda.

Beginning:

अथ यजुस्संहितायामाकारह्रुतपूर्वो घोषवद्व्यञ्जनोत्तरशसकारपरो विसर्जनीयो येषु पदेषु लुप्यते तानि पदानि प्रवक्ष्यामः । अत्रेङ्गचपदानां नानापदत्वमसङ्ख्याने तेषां पूर्वपदमवग्रहः ऊष्मविसर्जनीयप्रथमद्वितीया अघोषाः ।

End :

सर्वा न वै परः । अनृक्षु साध्याः । हिमा होतव्या हाया हायना हरुका होत्राः न दे परः । हूताः मकारपरः

Colophon :

इति संहिताशमानं समाप्तम् ॥

No. **980.** शमानसन्धिः.

ŚAMĀNA SANDHIḤ.

Pages, 5. Lines, 6 on a page.

Complete.

Begins on fol. 88*b* of the MS. described under No. 854.

Same as the last.

No. **981.** शमानं सव्याख्यानम्.

ŚAMĀNAM WITH COMMENTARY.

Pages, 47. Lines, 7 on a page.

Complete.

Begins on fol. 54*a* of the MS. described under No. 856.

This work is like the one described under the last number; but it has a commentary named Padadarpaṇa by Pōgala Mallayārya.

Beginning :

वन्दे वन्दारुमन्दारं कुन्देन्दूहारसुन्दरम् ।
सेन्द्रबृन्दारकैर्वन्द्यं विघ्नबृन्दघ्नमीशजम् ॥

वाणी क्रियाद्वर्णविनिर्मिताङ्गी
वाणीशुभा वर्णविडम्बिताब्जा ।
वाणीविवर्णीकृतकोकिला मे
वाणीयसामर्थ्यतलेन युक्ता ॥

समानसन्धेर्व्याख्यानं व्यक्तेश्च नपरस्य च ।
क्रियते मल्लया[चा]र्येण पददर्पणसंज्ञकम् ॥

तत्रादौ तावत् शिष्टाचारादिवर्णानुक्रमेण पदानि सङ्गृह्य संहिताकाले लुप्तविसर्जनीयपदानि पदकाले नकारान्तानि पदकाले एकारैकारान्तानि पदानि विलक्षयिष्यन् प्रथमं लुप्तविसर्जनीयानि समानसन्ध्या(न्धि)व्याख्यानग्रन्थेन लक्षयितुं प्रतिजानीते—अथ यजुस्संहितायामाकारप्लुतपूर्वो घोषवद्व्यञ्जनोत्तरसशकारपरो विसर्जनीयो येषु पदेषु लुप्यते तानि पदानि प्रवक्ष्यामः । अत्रायमथशब्दो मङ्गलाचरणार्थः । तथा चोक्तं शीक्षाकारैः—

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणावुभौ(णःपुरा) ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

End:

उपहूता मनुष्या इत्याह । मकारपर इति किम्? उपहूता धेनुः । हूता इति किम्? धृता मनसा जुष्टा विष्णवे ।

Colophon:

इति श्रीमत्पोगलमल्लयार्ययज्वकृतौ पददर्पणे समानसन्ध्या(न्धि)व्याख्यायामध्यायस्समाप्तः ॥

No. 932. शमानसन्धिव्याख्यानं पददर्पणम्.

ŚAMĀNASANDHIVYĀKHYĀNAM: PADADARPAṆAM.

Substance, palm-leaf. Size, 14¾ × 1¼ inches. Pages, 53. Lines 5, on a page. Character, Telugu. Condition, good. Appearance, old.

Complete.

The commentary on Śamānasandhi by Mallayārya; described under the last number; but given here without the text.

No. 983. शमानं सव्याख्यानम्.

ŚAMANAM WITH COMMENTARY.

Pages, 22. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 855.
Complete.
Another commentary on the same work; by Padmanābha.

Beginning:

अथ संहितायामाकारप्लुतपूर्वो घोषवद्व्यञ्जकोत्तरशसकारपरविसर्जनीया येषु पदेषु लुप्यन्ते तानि पदानि प्रवक्ष्यामि—संहितायामाकारश्च प्लुतश्च तौ पूर्वौ यस्मात्, प्लुतश्च आकारसम्बन्धी नान्यः, व्यञ्जकमुत्तरं परं याभ्यां शसाभ्यां तौ, घोषवन्तश्च व्यञ्जकोत्तरशसकारौ च घोषवद्व्यञ्जकोत्तरशसकाराः, ते परे यस्माद्विसर्जनीयात्, द्वन्द्वान्ते श्रूयमाणाः परशब्दाः प्रत्येकमभिसम्बध्यन्ते तदयमर्थः—आकारपूर्वश्च प्लुतपूर्वश्च घोषवत्परश्च व्यञ्जकोत्तरशसकारपरश्च पदकाले दृष्टः विसर्जनीयो येषु संहितायां लुप्यते तानि पदानि प्रवक्ष्यामि तेषां पदानां सङ्ग्रहं शास्त्रं प्रस्तुतमित्यथशब्दार्थः । अत्रेङ्गचपदानां नानापदत्वमसङ्ग्रचाने तेषां पूर्वपदमवग्रहः.

End:

हुं(ह्) ताः मरौ रपरः; मकारपरो हो(ह्)ताशब्दो विसृज्यते—उपहूता मनुष्या इत्याह । मकारपर इति किम्? उपहूता धेनुः ।

Colophon:

इति पद्मनाभशमानव्याख्यानं सम्पूर्णम् ॥

No. 984. शाखाशमानम्.

ŚĀKHĀŚAMĀNAM.

Pages, 8. Lines, 22 on a page.

Begins on fol. 71*a* of the MS. described under No. 855.
Complete.

This work gives a list of such words from the Kāṭhaka and the Āraṇyaka of the Kṛṣṇa-Yajur-Vēda as have their final Visarga dropped owing to Sandhi.

Beginning :

दीर्घा विसर्जनीयान्ता वर्णा वाक्यान्तसंस्थिताः ।
काठकारुणशाखासु तान्प्रवक्ष्याम्यशेषतः ॥
अरोचथा अवरुद्धा असुरा अनूराधौ(धा) अषाढौ(ढा) अर्धमासाः

End :

बाह्वोस्सक्थ्योः पार्श्वयोस्तद्वयोरश्विनोर्मासयोर्मयुरन्तोदात्तः मृत्योरपनयोर्हस्तयोः पादयोर्जन्तोरुभयोर्गौर्द्याः ॥

Colophon :

इति शाखाशमानं सम्पूर्णम् ॥

No. 985. शाखाशमानम्.

ŚĀKHĀŚAMĀNAM.

Pages, 9. Lines, 5 on a page.

Begins on fol. 35*a* of the MS. described under No. 861.

Complete.

Same as the last; though in the introductory stanza there is a slightly different reading.

Beginning :

दीर्घा विसर्जनीयान्ता वर्णवाक्यादिसंयुताः ।
शाखापदेषु येषु स्युः तानि वक्ष्याम्यशेषतः ॥

अरोचथा अवरुद्धा असुरा अनूराधा अषाढा अर्द्धमासा अष्टक द्वादशामावास्या अनूयाजा अग्निष्वात्ता अवेष्टा अतिच्छन्दा अग्निरूपा अनिशीतसर्गा अरा अहा अनिवर्त्स्यमाना अमृता अनग्निष्वात्ताः

End:

पादयोः, भवितोः, मृत्योः, वायोः, शंयोः, हरतयोः ॥

Colophon :

इत्यारण्यसमानं समाप्तम् ॥

No. **986.** शाखाशमानम् (आरण्यकम्.)

ŚĀKHĀŚAMĀNAM (ĀRAṆYAKAM).

Pages, 3. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 866.

Complete.

A work similar to the last; the words taken being only from the Āraṇyaka.

Beginning:

दीर्घा विसर्जनीयान्ता वर्णा वाक्यान्तसंश्रिताः ।
य आरण्यपदेषु स्युः ते च वक्ष्याम्यशेषतः ॥

अतप्तितपा अतिलोहिता अवाहा असिता अस्तङ्गा अपक्षेष्ठा अध्यक्षा अगा अवरुरुत्समाना अर्द्धमासा अमृता अनूतक्ष्या अग्निया अवान्तरदिशा अनुप्रश्नाः ।

End:

हुता हुता हिमा हता हुतभागा होत्राः । एतान्यारण्यवाक्यानि अवर्ण-पूर्वविसर्जनीयान्तानि ॥

No. **987.** शाखाशमानव्याख्यानम् (आरण्यकम्).

ŚĀKHĀŚAMĀNAVYĀKHYĀNAM (ĀRAṆYAKAM).

Pages, 9. Lines, 8 on a page.

Begins on fol. 24*a* of the MS. described under No. 866.

Complete.

A commentary on the work described under the last number.

Beginning:

दीर्घा विसर्जनीयान्ता वर्णा वाक्यान्तसंश्रिताः ।
य आरण्यपदेषु स्युः ते च वक्ष्याम्यशेषतः ॥
दीर्घा विसर्जनीयान्ताः वाक्यान्तसंश्रिताः ।

आरण्यस्य पदानि आरण्यपदानि तेषु आरण्यपदेषु ये वर्णाः विसर्जनीयाः ते स्युः अशेषतस्सर्वं वक्ष्यामि ॥

End:

या एव देवता हुतभागाः, एता वै होत्राः, अनु सप्त होत्राः, एतान्यारण्यवाक्यानि अवर्णपूर्वविसर्जनीयान्तानि ॥

Colophon:

इत्यारण्यसमानसन्धिव्याख्यानं समाप्तम् ॥

No 988. शम्भुशिक्षा.

ŚAMBHUŚIKṢĀ.

Pages, 7. Lines, 17 on a page.

Begins on fol. 35*a* of the MS. described under No. 864.

Complete.

This work explains the names given to the Kāṇḍas and the Anuvākas in the Kṛṣṇa-Yajur-Vēda, and classifies the letters of the alphabet.

Beginning:

प्रणम्य शिरसा लक्ष्मीं कालिकां च सरस्वतीम् ।
गणेशं च तथा शम्भुं शिक्षां वक्ष्यामि शाङ्करीम् ॥ (१)
काण्डोऽग्निसंज्ञो विज्ञेयश्चतुर्थस्तैत्तिरीयके ।
ग्रह इत्याददे प्रश्नस्सजोषान्तो विधीयते ॥ (२)
उख्यमित्यग्निकाण्डस्य प्रश्नद्वितयमादिकम् ।
अन्त्यानुवाकसहितं वेदविद्भिरुदाहृतम् ॥ (३)

इषेप्रभृत्यपामान्तं प्रश्नानां युक्ष्वसंयुतम् ।
अन्त्यानुवाका याज्याख्यास्त्रयोविंशतिरीरिताः ॥

End:

नासिक्यत्वमुरस्यत्वं पञ्चमैर्हस्य योगतः ।
अन्तस्थाभिरुरस्यत्वं कण्ठ्यत्वं केवलस्य तु ॥
पदादौ पदमध्ये वा स्थितस्योष्मपरस्य वै ।
प्रथमस्य द्वितीयत्वं पूर्वं कुर्वीत पण्डितः ॥
धूङ्क्षणे दङ्क्षणव इत्यत्राप्यनुस्वारो वि(ी)धर्मतः ।

Colophon:

शम्भुशिक्षा समाप्ता ॥

No. **989.** शिक्षा (पाणिनीया.)

ŚIKṢĀ(PĀṆINĪYĀ.)

Pages, 7. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 888.

Complete.

This work is attributed to Pāṇini and treats of phonetics and pronunciation.

Beginning:

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यतः ।
शास्त्रानुपूर्वं तद्विद्यात् यथोक्तं लोकवेदयोः ॥
प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः ।
पुनर्व्यक्तीकरिष्यामि वाच उच्चारणे विधिम् ॥
त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाश्शम्भुमते मताः ।
प्राकृते संस्कृते चापि स्वयंप्रोक्तास्स्वयंभुवा ॥
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमास्स्मृताः ॥

अनुस्वारो विसर्गश्च ऽकऽपौ चापि पराश्रितौ ।
दुस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च ॥

End:

स भवति धनधान्यपशुपुत्रकीर्तिमानतुलश्च सुखं समश्नुते । दिवीति दिवीति । अथ शिक्षामात्मोदात्तश्च हकारं स्वराणां यथा गीत्यचोऽस्पृष्टोदात्तचाषस्तु शङ्कर एकादश ॥

Colophon :

इति शिक्षा समाप्ता ॥

No. 990. शिक्षा.

ŚIKṢĀ.

Substance, palm-leaf. Size, 14½ × 1¼ inches. Pages, 8. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, not old.

Begins on fol. 12*a*. The other works herein are: Siddhasādhya-Susiddhāri-Kōṣṭōddhāraḥ 1*a*, Mantradēvatāprakāśikā—Gaṇapatimantrabhēdāḥ 4*a* and Saptalakṣaṇam with commentary 16*a*.

Complete.

Same as the last.

After दिवीतिदिवीति in the end this gives the following :—

End:

वृद्धिरादैच् । शङ्करः श(शा)ङ्करी(रीं) प्रा(दा)त् । चाषस्तुराहवदते मात्राम् । उदात्तमाख्याति वृषाङ्गुलीनाम् । अचोऽस्पृष्टा यणस्त्वीषत् । गीती शीघ्री शिरःकम्पी । यथा सौराष्ट्रिका नारी । स्वराणामूष्मणां चैव । हकारं पञ्चमैर्युक्तम् । उदात्तश्चानुदात्तस्य(श्च) । आत्मा बुध्द्या समेत्यार्थान् । अथ शिक्षां प्रवक्ष्यामि ॥

Colophon :

पाणिनीयशिक्षा समाप्ता ॥

वेङ्कटावधानिस्वहस्तलिखितम् ॥

अनुवाकानुवाकस्य वदेदादौ पदद्वयम् ॥

No. 991. षड्विंशतिसूत्रम्.

ṢAḌVIṀŚATISŪTRAM.

Pages, 23. Lines, 5 on a page.

Begins on fol. 22*a* of the MS. described under No. 861.

Complete.

This work is intended to help the learners of the Yajur-Vēda by removing the confusion arising from pairs of nearly similar words, such as प्रजापति and प्रजावति

Beginning :

इषे मयोभूः प्रथममहमस्मि द्वितीयतृतीयस्यां याः पुरस्तादमावास्यायाꣳ रात्रियां फलीकरणहोमꣳ सोमस्याꣳ यद्दते चित्तामन्दसाना शर्मवर्म द्वितीयं प्रजावतीः । अन्यत्र प्रजापतिः । वैश्वानरोऽम्बे जुष्टो घोषमतारिषत् । अन्यत्र तारिषः । धनस्य देवा जिह्वा मर्त्यस्याभिभूतिरस्वर्वाची सुप्रजसो मानुषं कवीरिषं चिकीरिषं चतस्र ओजिष्ठः पोतारा नेतारा नेष्टारा निषसाद[।[धृतव्रता यद्योषित् यत्परं भद्रं मन्द्राः । अन्यत्र मन्त्राः ।

End :

यो हि प्रजां द्वित्वष्टापुनरकर्नैयग्रोधः कवचतङ्महे । मे सावित्रमसुरे यन्तीर्हाना यदग्न उपहोमाकारान्तमयाग्नेरग्निर्बृहस्पतिसुतस्य द्वादशसु विश्वा अग्निश्च सावित्रं चत्वार्यशीतिः ॥

Colophon :

षड्विंशतिसूत्रं समाप्तम् ॥

No. 992. षड्विंशतिसूत्रम्.

ṢAḌVIṀŚATISŪTRAM.

Pages, 15. Lines, 6 on a page.

Begins on fol. 81*a* of the MS. described under No. 851.

Complete.

Same as the last.

No. 993. षड्विंशतिसूत्रम्.

ṢAḌVIṀŚATISŪTRAM.

Substance, palm-leaf. Size, $13\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 4. Lines, 5 on a page. Character, Nandinágari. Condition, injured. Appearance, old.

Begins on fol. 12*a*. The other work herein is Udakasāntimantraḥ 1*a*.

Same as the last.

Incomplete.

No. 994. षड्विंशतिसूत्रम्.

ṢAḌVIṀŚATISŪTRM.

Pages, 53. Lines, 5 on a page.

Begins on fol. 39*a* of the MS. described under No. 853.

Incomplete.

Beginning: Same as above.

End:

सावित्री सहस्रतमी देव्यदिते । वशान्नायोपायवः । पराहाहागाद्धिषणा यं स्वाहा योनिः प्रजां द्वित्वष्टा सोमं तेभ्यः पुनरकं नैयग्रोधःकवचतञ्चहे मे सावित्रमसुरो यन्तीहा न युक्ष्वोपहूताश्चतुरसप्ततिः ॥

Colophon:

षड्विंशतिसूत्रं समाप्तम् ॥

No. 995. षड्विंशतिसूत्रम्.

ṢAḌVIṀŚATISŪTRAM.

Pages, 12. Lines, 8 on a page. Character, Grantha.

Begins on fol. 7*a* of the MS. described under No. 857.

Incomplete.

Same as No. 991.

End:

पशुर्वै सौरी बलाका तिष्ठत्यभि दिशो जयत्येव तमो मृत्यूं ह्येष सन् मर्त्ये-ष्वेवास्य पूर्वायतेऽग्नयेऽग्नये विंशत्यै स्वाहाक्रान् षोडशैतान्यवेष्णानि ॥

No. 996. सर्वसम्मतशिक्षा.

SARVASAMMATAŚIKṢĀ.

Pages, 17. Lines, 18 on a page.

Begins on fol. 124*a* of the MS. described under No. 864.

Complete.

The first and the last verses, obviously belonging to a commentary, seem to be out of place, as the codex contains only the text.

This work treats of phonetics, accents, and things like the doubling of consonants in Sandhi as found in all the Vēdas and Śākhas.

From a stanza found in the MS. described under the next number and commented upon in the commentary of Mañcibhaṭṭa, noticed under No. 998 as the last stanza of the text, it is inferred that the author is Kēśavārya, son of Sūryadēva (or Sūridēva).

Beginning:

ध्यात्वा सर्वजगन्नाथं साम्बं सर्वार्थसाधकम् ।
व्याख्यायतेऽधुना शीक्षा सर्वसम्मतलक्षणा ॥ (१)
कृपालुं वरदं देवं प्रणिपत्य गजाननम् ।
द्वित्वादीनां प्रवक्ष्यामि लक्षणं सर्वसम्मतम् ॥ (२)

स्वराद्वित्वं (स)माप्नोति व्यञ्जनं व्यञ्जने परे ।
स्पर्शो लकारपूर्वो यो वपूर्वश्च द्विरुच्यते ॥ (३)

End:

पदक्रमविभागज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्राविभागज्ञो गच्छेदाचार्यसंसदम् ॥
ऋषिभिर्बहुधा प्रोक्तं वेदविद्भिस्तथापि हि ।
अध्येतृभिस्समस्तैस्तु यद्गृहीतं तदीरितम् ॥
सर्वसम्मतशिक्षापि संप्रदायानुसारतः ।
वासुदेवप्रसादेन व्याख्याता लक्षणेन वै ॥

No. 997. सर्वसम्मतशिक्षा.

SARVASAMMATAŚIKṢĀ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 39*b* of the MS. described under No. 942.

Complete.

Same as the last, except that the first stanza found in the last described MS. is wanting herein, and that the following stanza is found instead of the last 2 stanzas.

सूरिदेवबुधेन्द्रस्य नन्दनेन महात्मना ।
प्रणीतं केशवार्येण लक्षणं सर्वसम्मतम् ॥

Colophon:

इति सर्वसम्मतशिक्षा समाप्ता ॥

No. 998. सर्वसम्मतशिक्षा सव्याख्या.

SARVASAMMATAŚIKṢĀ WITH COMMENTARY.

Pages, 42. Lines, 22 on a page.

Begins on fol. 312*b* of the MS. described under No. 867.

Complete.

A commentary by Mañcibhaṭṭa on the work described under the last number; together with the text.

Beginning :

गणेश्वरं प्रणम्याहं लोकपालान् ग्रहान्गुरून् ।
सर्वसम्मतशिक्षाया वक्ष्ये व्याख्यामनुत्तमाम् ॥

प्रारिप्सितग्रन्थस्याविघ्नपरिसमाप्तये प्रचयगमनाय च शिष्टाचारपरिप्राप्तविशिष्टेष्टदेवतानमस्कारपूर्वकं ग्रन्थारम्भं प्रतिजानीते गणेशमिति—

गणेशं वरदं देवं प्रणिपत्य गजाननम् ।
द्वित्वादीनां प्रवक्ष्यामि लक्षणं सर्वसम्मतं ॥

गणेशं गणपतिं वरदमिष्टदं देवं विघ्नानां विजिगीषुं गजाननं गजवक्त्रं प्रणिपत्य भक्तितो नत्वा द्वित्वादीनां द्वित्वमादिर्येषान्तेषां द्वित्वपूर्वागमलोपागमविकारादीनां सर्वसम्मतं सर्वेषां तैत्तिरीयशाखोपयोगिनां प्रातिशाख्यप्रभृतीनां सम्मतं समानार्थं लक्ष्यन्ते प्रकाश्यन्ते अनेनेति लक्षणं प्रवक्ष्यामि निर्दोषं रचयामीत्यर्थः ॥

End :

हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् ।
ऋग्यजुस्सामभिः पूतो ब्रह्मलोके महीयते ॥
पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः ।
स्वरमात्राविभागज्ञो गच्छेदाचार्यसंसदम् ॥

स्पष्टार्थाविमौ श्लोकौ ॥

सूर्यदेवबुधेन्द्रस्य नन्दनेन महात्मना ।
प्रणीतं केशवार्येण लक्षणं सर्वसम्मतम् ॥

बुधानां पण्डितानाम् इन्द्रः श्रेष्ठः सूर्यदेव इति बुधेन्द्रः तस्य नन्दनेन महात्मना बुद्धिमता केशवार्येण सर्वसम्मतं लक्षणं प्रणीतं निर्दोषं रचितमित्यर्थः ॥

Colophon:

इति श्रीमच्चिभट्टविरचितं सर्वसम्मतशिक्षाविवरणं सम्पूर्णम् ॥

नवशिक्षानामानि.

व्यासो लक्ष्मीर्भरद्वाजः शम्भुः कापिलनिर्मिता [:] ।
कौहलीयः कलात्रेयारण्यशिक्षा नव स्मृताः ॥

सप्तलक्षणनामानि.

समानञ्च विलङ्घ्यञ्च नपरं तपरन्तथा ।
अवर्ण्यावर्ण्यनित्य(ङ्ग्य)ञ्च सप्तलक्षणमुच्यते ॥

वेदारम्भोच्चारणलक्षणम्.

प्रश्नानुवाकाद्यारम्भे सविसर्गोच्चको हरिः ।
न सन्धिः प्रणवस्यादौ विरामे स्वरितो हरिः ॥

No. 999. सर्वसम्मतशिक्षा सव्याख्या.

SARVASAMMATAŚIKṢĀ WITH COMMENTARY.

Pages, 52. Lines, 5 on a page.

Begins on fol. 21*a* of the MS. described under No. 238.

Incomplete.

Colophon:

इत्यालमूरिमच्चिभट्टविरचिते सर्वसम्मतशिक्षाविवरणे आगमप्रकरणं समाप्तम् ।

* * * *

इत्या . . . अङ्गप्रकरणं समाप्तम् ।

End:

नित्या भवति नासिक्या अनुस्वारोत्तमा यमाः ।

अनुस्वारश्च उत्तमाश्च यमाश्च नित्या नासिक्याः नासिक्यैकस्वभावा भवन्ति इत्यर्थः ।

अन्तस्थाश्च हकारश्च स्वराश्चैव निमित्ति(त्त)तः ॥

No. 1000. सर्ववेदपाठफलम्.

SARVAVĒDAPĀṬHAPHALAM.

Page, 1. Lines, 7 on a page. Character, Grantha.

Begins on fol. 55*a* of the MS. described under No. 857.

Complete.

This describes the merit attached to the recital of the Vēda in the various ways known as Saṁhitā, Pada, Krama, &c.

Beginning:

संहितापाठमात्रेण यत्फलं प्रोच्यते बुधैः ।
पदे तु द्विगुणं प्रोक्तं क्रमेणापि चतुर्गुणम् ॥
वर्णक्रमे शातगुणं जटायान्तु सहस्रकम् ।
यो जटामात्रव (वि) द्ब्रह्म (ह्मा) सन्धिज्ञो विष्णुरुच्यते ॥

End:

संहिताञ्च पदञ्चैव क्रमञ्चैव जटां पठन् ।
लक्षणज्ञस्तदाप्नोति ब्रह्मलोकञ्च शाश्वतम् ॥

No. 1001. सप्तस्वराः.

SAPTASVARĀḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 35*a* of the MS. described under No. 887.

Complete.

This treats of the seven musical notes as used in the Vēdas.

Beginning:

नित्यः क्षिप्रोऽभिनिहितस्तैरोव्यञ्जन एव च ।
तिरोविराम(:) प्रश्लिष्टः पादवृत्तस्तु सप्तमः ॥
यकारश्च वकारश्च व्यञ्जनैस्सह संयुतौ ।
स तत् स्वारस्स जात्याख्यः पूर्वो नीचात् परो यथा ॥

End:

उदात्तेनानुदात्तं स्यात् प्रश्लिष्टं तं निबोधयेत् ॥
विवृत्तो यः परो वर्णः स्वर्यते स मनीषिभिः ।
पादवृत्तस्स विज्ञेयः सदसद्व्यक्तिहेतुभिः ॥

Colophon:

सप्तस्वरास्समाप्ताः ॥

No. 1002. सप्तलक्षणम्—सव्याख्यानम्.

SAPTALAKṢAṆAM WITH COMMENTARY.

Substance, palm-leaf (Śritāla). Size, 6 × 2⅞ inches. Pages, 146. Lines, 18 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

This contains the following seven Vēdalakṣaṇa works: (1) Saṁhitāśamānam 1*a*, (2) Vilaṅghyam 11*a*, (3) Naparam 22*a*, (4) Taparam 29*b*, (5) Avarṇi 31*b*, (6) Āvarṇi 41*a*, (7) Aniṅgyam 46*a*. The commentaries of the above are also given. For extracts see No. 983, 965, 918, 871, for (1), (2), (3), (4) and (6) and 855, for (7). Extracts from (5) are given below.

Beginning:

अथ यजुस्संहितायामाकारं श्रुतपूर्वो घोषवद्व्यञ्जनोत्तरशसकारपरो विसर्जनीयो येषु पदेषु लुप्यते तानि पदानि प्रवक्ष्यामि । अथशब्दा(ब्दोऽ)धिकारार्थः । येषु पदेषु संहितायां विसर्जनीयो लुप्यते ॥

* * * *

End:

दिङ्मात्रोक्तत्वात् मनीषिभिर्विद्वद्भिरुन्नेयम् ॥

एषा[म]निङ्गचपदानां पदवी सन्दर्शिता सु[भगसु]धित(या) ।
देवमनीषिसुतेन श्रीवत्साङ्केन तैत्तिरीयाणाम् ॥

अनेन तैत्तिरीयशाखामधिकृत्य शास्त्रं प्रवर्त्तितमिति दर्शयति शास्त्रकृतो जन्मनाम कीर्तितमविच्छेदायेत्यूहनीयम् । प्रयोगानुगन्तव्यम् । इति सप्तलक्षणं सव्याख्यानं समाप्तम् ॥

अवर्णी सव्याख्या ।

अवर्णीत्य(र्णिन्य)नुक्तं समो(मा)प्यातिरिक्तं
परित्यज्य दुष्कीर्तितश्चाभिवीक्ष्य ।
ककारादिवर्णक्रमेणाहमेतं
सुवृत्तं(त्तिं) करिष्यामि विस्पष्टवाच्यम् ॥

अवर्णीत्यनुक्तमिति व्याख्यान्तं पूर्वलक्षणस्याधिकोक्तिभिर्दुर्बोधतया च दिह(हे)यत्वात्तत्परित्यज्य निर्दोषं लक्षणान्तरं प्रणीयत इत्यर्थः वक्ष्यमाणस्य लक्ष्यमर्थप्रयोजनमाह—

ओदेदवर्णसंछन्नं संहितायां पदादिगम् ।
अवर्णं ज्ञातुमस्माभिरिदं शास्त्रं . . . .॥

प्रवर्णोत्तरस्त्रयाणामिति वचनात्ते च पदान्ते वर्त्तत(न्त) एव पदादिगमिति विशेषोपादा[द]नात्तेनायमर्थः ओदेदवर्णैः पूर्वपदान्तवर्तिभिः संहितायां सम्यक् छन्नमुत्तरपदादिगतमकारमाकारञ्च ज्ञातुमिदमवर्णा(ण्या)ख्यं शास्त्रं प्रणीयत इत्यत्र पूर्वपदान्तगत ओकार-एकार-आकारश्चोत्तरपदादिगतमकारं छादयति ॥

* * * *

अहास्थाहरताञ्चेत्युक्तो ह्रस्वस्य सङ्ग्रहः । अहास्थाः, अहरतां च येषु-कारादि यथा अब्रुवन् कथा हा स्था इति, तमाहरतां तेनायजेताम्, एवमकारादीनि पदान्युक्तानि ह्रस्वसङ्ग्रहणमुच्यते ॥

Colophon:

अवर्णिव्याख्यानं समाप्तम् ॥

No. 1003. सप्तलक्षणम् सव्याख्यानम्.

SAPTALAKṢAṆAM WITH COMMENTARY.

Pages, 230. Lines, 6 on a page.

Complete.

This contains the following Vēdalakṣaṇa works with their commentaries: (1) Vilaṅghyam 16*a*, (2) Śamānam 32*a*, (3) Naparam 48*a*, (4) Taparam 58*b*, (5) Avarṇi 62*a*, (6) Āvarṇi 76*b* and (7) Aniṅgyam 84*b*.

For extracts see under Nos. 965, 918, 855, for (1), (3), (4) and (7), under No. 983 for (2), and under Nos. 860, 870 for (5) and (6). In the beginning of Ávarṇi the following stanza is found :—

श्रीमत्खण्डालिसङ्गीतव्यक्तवेदान्तवैभवम् ।
भूतये पूर्वदम्पत्योरखण्डाद्वैतमस्तु वः ॥

At the end of Vilaṅghya the following is written on fol. 31*b*.

Beginning:

यो हि यद्यतस्सोमे सोमसुभयान्विमुक्तस्सौम्यो यदि यानि येन यत्र यस्मात् कस्माद्येषां यासामासप्तमपरपदात् स्वरितं वा समरतं वा अन्तोदात्तं वा भवति.

End:

ब्रह्मवर्चसस्य त्रैधातवीयं यद्वेणोस्सुषिरं यत्पुरीषं यतः पुरोडाशोऽसुष्मिन् लोके यदध्वर्युर्यत्पञ्चमं यत् षष्ठं यत्सप्तमिति वर्जयित्वा ॥

No. 1004. सर्वानुक्रमणीवृत्तिः—वेदार्थदीपिका.

SARVĀNUKRAMAṆĪVṚTTIḤ: VEDĀRTHADĪPIKĀ.

Pages, 164. Lines, 30 on a page.

Begins on fol. 53*a* of the MS. described under No. 879.

Complete.

A commentary by Ṣaḍguru on Kātyāyana's Sarvānukramaṇi—a work giving the names of the Ṛṣi, Chandas and Dēvatā of all the hymns in the Ṛgvēda.

Beginning:

सर्वार्थसाधनोपाय सर्वैश्वर्यप्रदायक ।
समस्तापत्प्रतीकार चन्द्रशेखर ते नमः ॥

सर्वं कर्म सफलं यत्र तुष्टे दुष्टे न किंचित्तमहं नमामि ।
विनायकं गिरिराजेन्द्रपुत्रं महेश्वरप्रियसूनुं घृणाब्धिम् ॥

नमष्षड्गुरवे तुभ्यं नमोऽस्मद्गुरवेऽपि च ।
विनायकस्त्रिशूलाङ्को गोविन्दरसूर्य एव च ॥

व्यासश्च शिवयोगी च षट् तेभ्योऽपि नमस्सदा ॥

ओं नमो भगवते कात्यायनाय ॥

ललाटडिण्डिमध्वनिप्रकारभक्तवत्सलः
महेश्वरप्रियात्मजः प्रपातु मां विनायकः ।

नमस्त्रिशूलपाणये गुहप्रियाय शंकृते
उमाकुचार्द्रकुङ्कमप्रलुप्तभूतिवक्षसे ॥

भस्मशोभिने ॥

योऽजातशत्रोः प्रचकार दूत्यं पार्थस्य सारथ्यमथानिनाय ।
आश्चर्यधन्यश्चतुरस्तनूजान् पायात्सदा यादवराजसिंहः ॥

सर्वानुक्रमणीवृत्तिर्नाम्ना वेदार्थदीपिका ।
तदारम्भाय पूर्वेषामुपदेशागता कथा ॥

कथ्यते श्रुतवृत्तान्तास्सन्तश्श्रद्दधते खलु ।
वेदाश्चत्वार उद्दिष्टाष्षडङ्गानि तथैव च ॥

उपाङ्गानि च चत्वारि धर्मविद्याश्चतुर्दश ।
ऋग्वेदश्च यजुर्वेदस्सामवेदस्तथैव च ॥
अथर्ववेदश्चाङ्गानि पाणिपादादि तद्विदुः ॥
छन्दः पादौ शब्दशास्त्रं च वक्त्रं कल्पः पाणिर्ज्योतिषं चक्षुषी च ।
शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं वेदस्याङ्गान्याहुरेतानि षट् च ॥
मीमांसाद्या न्यायविद्या पुराणं स्मृतिस्तथोपाङ्गचतुष्टयं मतम् ।
अङ्गोपाङ्गोपस्कृतश्शुद्धबुद्धिः पश्येद्वेदमितरो नैव पश्येत् ॥

End:

ऋषीणां विषयज्ञस्तु यश्शरीराद्विमुच्यते ।
सोऽतीत्य तमसः पारं स्वर्गे लोके महीयते ॥
सर्वानुक्रमणी ह्येषा कात्यायनमुनेः कृतिः ।
समाप्तैषाध्यायवती षट्सप्ततिकखण्डिका ॥
अस्या वृत्तिरियं चापि समाप्ता षड्गुरोः कृतिः ।
अनुगृह्णन्तु विद्वांसस्तामेतां कृपया मयि ॥
क्वास्माकं मतयः क्व वेदविषयः क्वार्षा गिरः क्वाल्पधीः
मर्त्योऽहं बत चापलं सुब . . . . . व्यारव्यया ।
सोढव्यं दृढबुद्धिभिर्मयि दयावद्भिस्सुसद्भिः कृति-
स्सेयं ग्राह्यतया श्रुता यदि न वेत्यालोकयध्वं बुधाः ॥

Colophon:

समाप्तमिदं षड्गुरुभाष्यम् ॥

No. **1005.** सामतन्त्रसूत्रभाष्यम्.

SĀMATANTRASŪTRABHĀṢYAM.

Pages, 120. Lines, 10 on a page.

Begins on fol. 1*a* of the MS. described under No. 891.
Complete.

A commentary on the Sāmatantrasūtra, which is a work in 13 Prapāṭhakas on the chanting of the Sāma-Vēda.

Beginning:

ऋग्विहीनं छन्नगानं लेशं स्तोभमृचा सह।
आविर्गानं स्तोभहीनमेवं गानत्रयं विदुः॥

स्वरोऽनन्त्यः। स्वरोऽनन्त्यो गीतो भवति क्रुष्टः। तद्विविड्ढाइ। इन्द्रं विश्वाः। हं हिताः। अग्निं दूताम्। वचनादनन्त्यस्वरः। स्वरोऽनन्त्यः। नीचान्तानाम्। नीचान्तानां च पर्वणां संज्ञा भवति॥

End:

ग्रौष्टे। रोहतु। भगवानाम्नायो नव बृहतो रोहान् रहेतीति ग्राम इह इ विपरीतम्। वृश्चो रोहतु। एकादशो दशकः आनृगाद्यक्षरम् इति। सामतन्त्रे त्रयोदशः प्रपाठकः॥

Colophon:

समाप्तं छन्दोगसम्बन्धिसामतन्त्राभिधानं व्याकरणम्।

No. 1006. सामतन्त्रसूत्रभाष्यम्.

SĀMATANTRASŪTRABHĀṢYAM.

Pages, 184. Lines, 24 on a page.

Begins on fol. 1*a* of the MS. described under No. 895.

Complete.

This was restored in 1896 from the MS. noticed under No. 1005.

Same as the last.

No. 1007. सामपरिभाषा.

SĀMAPARIBHĀṢĀ.

Pages, 6. Lines, 12 on a page.

Begins on fol. 226*a* of the MS. described under No. 50.

Incomplete.

This was copied by Veṅkaṭa-subban who gives this verse :—

यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते ॥

This belongs to the collection of C. W. Whish, who has added the following note at the end :—

"Here ends the Paribhāṣā, a portion of the Sāmavēdam."

C. W. WHISH,
Calicut, 1825.

A work relating to the chanting of the Sāmavēda.

Beginning :

सप्तस्वरैस्समस्तं यो जगदेतच्चराचरम् ।
सञ्जीवयति विश्वात्मा स नो विष्णुः प्रसीदतु ॥

अथ साम्नां स्वराणि प्रदर्श्यन्ते—आदौ क्रुष्टा प्रथमा । द्वितीयतृतीयचतुर्थ(र्थौ)मन्द्रा । अतिस्वार्याणां परिस्वार्याणां सु(स्व)रवतां साम्नां पर्वणां ज्ञापकत्वेन प्रथमं प्रथमस्वर(रो) ज्ञापकः ककारादित्वात्तान्वि(नि वि)लिख्यन्ते ॥

End :

फप्रमं हा इष्ठया गायता म फा प्रमं हा इष्ठा या गा म फै सामेन्ता विश्वाम् ओजसां पातिम् म फो इत्यादि नास्ति ॥

No. 1008. सिद्धान्तशिक्षा.

SIDDHĀNTAŚIKṢĀ.

Pages, 10. Lines, 17 on a page.

Begins on fol. 8*a* of the MS. described under No. 864.

Complete.

This Śikṣā is based upon other Śikṣas and on Prātiśākhyas, and treats of Vēdic accents and phonetics. The author of the work is Catuṣkula (Catuṣkūla)-Śrīnivāsa-Makhin.

Beginning:

संप्रणम्य सकलैककारणं
ब्रह्मरुद्रमुखमौलिभूषणम् ।
लक्षणं श्रुतिगिरां विलक्षणं
श्रीनिवासमखिना प्रणीयते ॥
पूर्वशिक्षां परामर्श्य(मृश्य) प्रातिशाख्यञ्च सर्वशः ।
सिद्धान्तशिक्षां वक्ष्यामि वेदभाष्यानुसारिणीम् ॥
आवातमानीत्पूर्वं स्या[दत्तूदाहरणं] (दिदं प्रागत्तु नो) हविः ।
न हेन्द्रं वृत्रमहतः परोऽस्मै च त(द)दाशतः ॥

End:

समावद्विद्व(द्म)विहृत(तं)बन्धुरञ्च शुचर्त च ॥
शुच वेश्या शत श्वश्वो मष्मषारण्यकेऽर्षति ।
मेषी सञ्च समं संह विधेस्त्वन्तस्य संप्रजाः ॥
हीडिते महि मा हीति(सा)च्छिन्नाः के चन संशयाः ।
अनन्तसंशयाञ्छेत्तुमनन्तः परमेश्वरः ॥
श्रीनिवासाध्वरीन्द्रेण चतुष्कुलसुधांशुना ।
श्लोकास्सिद्धान्तशिक्षायां चतुस्सप्ततिरीरिताः ॥

No. 1009. सिद्धान्तशिक्षा.

SIDDHĀNTAŚIKṢĀ.

Pages, 7. Lines, 7 on a page.

Begins on fol. 36*b* of the MS. described under No. 942.

Complete.

Same as the last, except that there is the following stanza between the 2nd and the 3rd stanzas as given in the MS. described under the last number.

अकारादिपदानां स्यादत्रोदाहरणं क्रमः ।
आदिमध्यान्ततस्तत्र यावद्वेदं निरूप्यते ॥

No. 1010. सिद्धान्तशिक्षा.

SIDDHĀNTAŚIKṢĀ.

Pages, 9. Lines, 20 on a page.

Begins on fol. 112*b* of the MS. described under No. 855.

Complete.

Same as the last.

No. 1011. सिद्धान्तलक्षणम्.

SIDDHĀNTALAKṢAṆAM.

Pages, 9. Lines, 7 on a page.

Begins on fol. 39*a* of the MS. described under No. 854.

Complete.

Same as the work described under No. 1008, though its name as given here is different.

No. 1012. सिद्धान्तशिक्षा सव्याख्या.

SIDDHĀNTAŚIKṢĀ WITH COMMENTARY.

Pages, 77. Lines, 20 on a page.

Begins on fol. 74*b* of the MS. described under No. 855.

Complete.

A commentary on the work described under No. 1008.

Beginning:

संप्रणम्य सकलैककारणं ब्रह्मरुद्रमुखमौलिभूषणम् ।
लक्षणं श्रुतिगिरां विलक्षणं श्रीनिवासमखिना प्रणीयते ॥

इह खलु कारुणिकः सर्वशिक्षापरीक्षणविचक्षणो वेदभाष्य-पारावारपारीणः श्रीनिवासदीक्षितो नाम चतुकला(ष्कुल)मुख्यः कल्मष-

जाल्मपाठं निर्णेतु(क्तु)कामस्सन् सारतमं वेदलक्षणं करोमीति शिष्टा-चाराभीष्टदेवताप्रणामपूर्वकतया शिष्यशिक्षायै ग्रन्थमुखेन प्रतिपादयति संप्रणम्येति। ब्रह्मरुद्रमुखानां विधिशिवादीनां मौलिभूषणं शिखामणिं सर्वोपास्यमिति यावत् यस्य विश्व उपासत इति श्रुतेः। सकलानां वस्तूनाम् एककारणम् (अ) भिन्ननिमित्तोपादानम् अज(न)न्तादिशब्दवत् अन्यतरसाधारणार्थशब्दवशात् कारणशब्दो नारायणमेवाभिचष्टे। एको ह वै नारायण आसीत्। न ब्रह्मा नेशान इति कारणवाक्ये हिरण्यगर्भशिवादिपर्युदासपूर्वकं नारायणस्यैव कारणत्वनिर्धारणात्। करणं कारणं कर्तेति वैष्णवाभिधानकोशः। संप्रणम्य सम्यक् प्रणिपत्यात्र सम्यक्त्वम् अस्मद्देशिकमस्मदीयपरमाचार्यानित्युक्तगुरुपरम्पराप्रणामपूर्वकत्वा[द]भिधान(प्राय)गर्भं भगवद्वन्दनं स्वाद्यं गुरुवन्दनपूर्वकमिति विलक्षणमिति साधारणवक्तृवैलक्षण्यादीनामिह प्रबन्धवैलक्षण्यं हेतु(:) शून्यता स्यात् विलक्षणमित्यमरः।

End:

मया के चित् संशयाः प्रकटिताः। अनन्तसंशयान् परिहर्तुमनन्त एव शक्तः न तु तदितरः भूतभविष्यद्भव्यसंशयान् सर्वज्ञ एव ज्ञातुं परिहर्तुं च शाक्नोतीति [illegible] !!

Colophon:

श्रीनिवासाध्वरीन्द्रेण चतुष्कुलसुधांशुना।
श्लोकास्सिद्धान्तशिक्षायां चतुस्सप्ततिरीरिताः॥

No. 1013. सिद्धान्तशिक्षा सव्याख्या.

SIDDHĀNTAŚIKṢĀ WITH COMMENTARY.

Pages, 126. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 863.

Complete. Same as the last.

No. 1014. सिंहानुवाकः.

SIṀHĀNUVĀKAḤ.

Substance, palm-leaf. Size, 15 × 1¾ inches. Pages, 4. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 2*a*. The other works herein are—Vaiśvadēvavidhi 1*a*, Punassaṁskārānukramaṇikā 2*b*, Dharmaśāstravacanāni 3*a*, Bindudvādaśīvratakalpa 3*b*, Kūśmāṇḍahōmaprayōgaḥ 5*a*, Gaṇahōmaḥ 11*b*.

Complete. The work seems to be of a magical character.

Beginning:

* * * *

पौर्णमास्यां वा केशमापूर्यमाणपक्षे वा पुण्यनक्षत्रे केशश्मश्रुलोमनखानि वापयित्वा . . . . चतुष्पथं गत्वा पादौ प्रक्षाल्याचम्य पत्न्या पवित्रपाणिः प्राणानायम्य सङ्कल्पं करोति—समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं कलशस्थिते जले स्वात्मनो रूपमीक्षमाणः सिंहानुवाकमन्त्रपठनं करिष्ये ।

सिंहे मे मन्युः । व्याघ्रे मेऽन्तरामयः । वृके मे क्षुत् । अश्वे मे घसिः । धन्वनि मे पिपासा । राजगृहे मेऽशनाया । अश्वनि मे तन्द्रिः । गर्दभे मे स्पर्शः । शल्यके मे ह्रीः ।

End:

दुर्मित्रास्तस्मै भूयासुर्योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मः इत्यन्वीक्ष्यमाणः यस्यां दिशि द्वेष्याः तस्यां दिशि निरस्य पाणिपादौ प्रक्षाल्याचम्याप्रतीक्षमाणः गृहं गच्छेत् ॥

Colophon:

इति सिंहानुवाकः ॥

No. 1015. सिंहानुवाकः.

SIṀHĀNUVĀKAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 197*a* of the MS. described under No. 23.

Complete.

Same as the last, except that the prefatory passages are omitted, and that there is a slight difference in the end as shown below.

End:

यच्च वयं द्विष्मः पाप्मन् कलशं निरस्य अप उपस्पृश्य

No. 1016. सिंहानुवाकव्याख्या.

SIṀHĀNUVĀKAVYĀKHYĀ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 195*a* of the MS. described under No. 23.

Complete.

A commentary on the last described work.

Beginning:

सिंहे मे मन्युः । मे मन्युः क्रोधः हिनस्तीति हिंसः पृषोदरादिर्त्वात् हकारसकारयोर्व्यत्यासः सिंहः । जातिशब्दयोर्वाक्यस्य(अ) परिस(मा)सत्वात् अन्याक्रियापदस्याध्याहारःकर्तव्य(ः) । (प्रवर्त)तामिति शेषः । मम क्रोधः सिंहे प्राणिनां हिंसाकारिणि उग्रजतुर्नि(न्तौ) वर्ततां न मयीत्यर्थः । एव प्राणिनां पीडाकारिण्युग्रसत्त्वे मदीयक्रोधः प्रवर्ततामिति ।

End:

सहस्रशो बहुद्रष्टा अमर्त्यः अमरणधर्मा देवतास्वभाव इत्यर्थः ।

Colophon:

सिंहानुवाकव्याख्यानं समाप्तम् ॥

No. 1017. स्वरपञ्चाशत्.

SVARAPAÑCĀŚAT.

Substance, palm-leaf. Size, 17 × 1⅜ inches. Pages, 5. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Svarapañcāśadvyākhyā 4*a*.

Complete.

A work treating of the accents on the words in the Kṛṣṇa-Yajur-Vēda.

Beginning:

अतीन्द्रियार्थविज्ञानं प्रणम्य ब्रह्म शाश्वतः(म्) ।
तैतिरीयपदादीनां वक्ष्यामि स्वरलक्षणम् ॥
उदात्तश्चानुदात्तश्च वर्णानां प्रकृतौ स्वरौ ।
स्वरितास्तु द्विधोच्यन्ते धृ(द्रु)तः कम्पश्च सांहितः ॥
तुल्यस्वरस्वरूपार्थे पदभेदेऽपि तत्सुपाम् ।
द्विरुक्तावग्रहेऽप्येवं द्विधेङ्गचेंऽशे विभक्तिजे ॥

End:

न्यङ्स्वर्युज्यं चिदा नाव्या ससौम्याश्चेति तादृशाः ।
अन्येऽप्यध्ययनाद्बोध्याः आरुणोपनिषत्स्वराः ॥

Colophon:

इति स्वरपञ्चाशत्समाप्तः(ा) ॥

No. 1018. स्वरपञ्चाशद्व्याख्यानम्.

SVARAPAÑCĀŚADVYĀKHYĀNAM.

Pages, 55. Lines, 6 on a page.

Begins on fol. 4*a* of the MS. described under No. 1017.

Complete.

A commentary on the work described under the last number.

Beginning:

अतीन्द्रियार्थविज्ञानं प्रणम्य ब्रह्म शाश्वतम् ।
तैत्तिरीयपदादीनां वक्ष्यामि स्वरलक्षणम् ॥

अनेन परापरब्रह्मप्रणामपूर्वकमारिप्सितग्रन्थाभिधेयमाह संबन्धाभिधयप्रयोजनञ्च वक्तव्यं वेदोपि शाश्वतं ब्रह्म तदिति इन्द्रियार्थविज्ञाने कारणं भवति । तत्प्रतिपाद्यं परं ब्रह्मापि अतीन्द्रियार्थविज्ञानस्वभावं भवति । तदुभयरूपं ब्रह्म प्रणम्य स्वरलक्षणं वक्ष्याम इत्यर्थः

End:

सादन्यं सपुरं सख्या तथा रथ्याकरुण्ययोः ॥
न्यङ्स्वर्युज्यं चिदा नाव्या ससौम्याश्चेति तादृशाः ।
अन्येऽप्यध्ययनाद्बोध्याः आरुणोपनिषत्स्वराः ॥

Colophon:

इति स्वरपञ्चाशद्व्याख्यानं सम्पूर्णम् ॥

No. 1019. स्वरपञ्चाशत्.

SVARAPAÑCĀŚAT.

Pages, 6. Lines, 6 on a page.

Contains 45 verses; incomplete.

Begins on fol. 60*a* of the MS. described under No. 861.

No. 1020. स्वरपञ्चाशत्.

SVARAPAÑCĀŚAT.

Pages, 5. Lines, 6 on a page.

Begins on fol. 20*a* of the MS. described under No. 866.

Contains 46 verses; incomplete.

Same as the last.

No. 1021. स्वरभक्तिः.

SVARABHAKTIḤ.

Substance, paper. Size, 13 × 8 inches. Page, 1. Lines, 14 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other works herein are:

Yōgatattvadīpikā 1*b*, Kaupīnapañcakam 2*b*, Māyāpañcakam 2*b*, Śivōhampañcakam 3*a*, Manīṣāpañcakam 3*b*, Nṛsiṁhastutiḥ 4*b*, Nādānusandhānapañcakam 5*a*, Citkalāṣṭakam 5*b*, Sōpānapañcakam 6*b*, Paramārthasārasaṅgrahaḥ 7*b*, Mahāpuruṣalakṣaṇam 9*b*, Tattvapīṭhadaśakam 10*a*, Śivōtkarṣasākṣīpañcakam 11*b*, Śivōtkarṣaśatakam 12*a*, Svānubhūtiḥ 19*b*, Jñānatārāvaliḥ 21*a*, Vēdāntaḍiṇḍimaḥ 22*b*, Sadāśivāryā 25*b*, Ēkaślōkī 28*b*, Svātmaprakāśikā 29*a*, Dṛgdṛśyavivēkaḥ with commentary 34*a*, Ēkādaśōttaraśatavākyagranthaḥ 47*b*, Pañcaratnamālikāvyākhyā 57*a*, Ātmaliṅgārcanam 61*b*, Māyāvivaraṇam 64*b*.

Complete.

This work treats of the pronunciation of ऋ and ऌ in the Vēda, when either of them becomes the first member of a conjunct consonant.

Beginning:

करेणुः कर्षिणी चैव हरिणी हारितेति च ।
हंसपादेति विज्ञेयाः पञ्चैताः स्वरभक्तयः ॥
करेणू रहयोर्योगे कर्षिणी लहकारयोः ।

End:

ऊष्मोत्तरे द्वितीय(:) स्यादादेशः प्रथमस्य तु ।
हकारः प्रथमादूर्ध्वः तत्तत्स्थानं चतुर्थकम् ॥

Colophon:

इति स्वरभक्तिः सम्पूर्णः(र्णा) ॥

No. 1022. स्वरशिक्षा सव्याख्या.

SVARAŚIKṢĀ WITH COMMENTARY.

Pages, 25. Lines, 18 on a page.

Begins on fol. 253*b* of the MS. described under No. 867.

Complete.

A work with commentary specifying those words of the Kṛṣṇa-Yajur-Vēda which have the Udātta accent.

Beginning:

प्रणम्य नारायणपादपङ्कजे
समस्तलोकत्रितयार्तिहारिणी ।
करिष्यते वेदपदानि पाठतो
निरुप्य चोच्चस्वरनिर्णयो मया ॥

प्रारिप्सितस्य ग्रन्थस्य स्वरलक्षणस्याविच्छेदपरिसमाप्तये लोकत्रितयार्तिहारिणी नारायणपादपङ्कजे प्रणम्य तैत्तिरीयवेदपदानि लोकप्रसिद्धपाठानुसारेण तत्त्वतः प्रतीक्ष्य उदात्तस्वरनिर्णयो नाम लक्षणं क्रियते इति । ननु किमनेन लक्षणकरणेन स्वत एव वेदपदानि इदमीदृशमिति प्रसिद्धाध्ययनादेव सर्वं तत्त्वतो निश्चिनुय(यु):। तथापि तु प्रतिलक्षणं प्रतिपदं किमिदं किमेवमिति सर्वदा सर्वत्र सन्देहिनां विस्मारिणामस्मादृशां निश्चायकं लक्षणमपेक्षणीयमेवेति तथास्तु स्वराष्टकस्वरसमुच्चयप्रातिशाख्यादीनि स्वरनिश्चायकानि पूर्वोक्तानि लक्षणानि सन्ति उदात्तस्वरनिर्णयनाम्ना किमनेन लक्षणकरणेनेत्याकाङ्क्षायामाह—

अन्तोदात्तं पदभेदमाद्युच्चमिदमीदृशम् ।
नियमो न कृतः कैश्चित् कस्मिंश्चित्स्वरलक्षणे ॥

End:

ओषधीष्वोषधीनाञ्च तदौषधय ओषधीः ।
सौषधीः, महिमौषधयः । एतान्याद्युदात्तानि पदानि व्याख्यातानि ।
एवमुच्चस्वरोऽस्माभिर्निर्णीतो वर्णितः क्रमात् ।

Colophon:

इत्युच्चस्वरसमुच्चयस्समाप्तः ॥

No. 1023. स्वरसिद्धान्तचन्द्रिका.

SVARASIDDHĀNTACANDRIKĀ.

Substance, paper. Size, 13 × 8 inches. Pages, 404. Lines, 21 on a page. Character, Grantha. Condition, good. Appearance, new. Incomplete.

A work treating of Vēdic accents in accordance with Pāṇini and other grammarians. The work is divided into 12 Prakaraṇas; and their contents are given in the first Prakaraṇa, which is extracted below. The author of the work is Srīnivāsa, son of Ananta (Kṛṣṇa).

Beginning:

स्वरसिद्धान्तचन्द्रिकायामारम्भप्रकरणारम्भः—
प्राणेष्ट व्याकरणं यदनुग्रहलेशतो मुनिः कृत्स्नम् ।
यस्याभाषिष्ट महाभाष्यं भूषा भजे तमीशानम् ॥
सङ्कृत्यन्वयसंभवात् गुणमहाम्भोधेरनन्ताह्वया(त)
जाह्नव्येव पवित्रया क्षितितले संवर्धितश्रेयसः ।
जातः कृष्णविपश्चितो विधुरिव प्रीणन् बुधानात्मना
सन्मार्गाभिगमोज्वलो विजयते स श्रीनिवासस्सुधीः ॥
पदवाक्यप्रमाणाब्धिपारावारीणबुद्धिना ।
तेन शुश्रूषितानेकगुरुलम्भितबुद्धिना ॥

तैत्तिरीयकशाखानुसारिणी विदुषां मता ।
विरच्यते धियश्शुद्ध्यै स्वरसिद्धान्तचन्द्रिका ॥
अथात्र स्वरसूत्राणां सङ्ख्याप्रकरणान्यपि ।
बुद्धेर्विशुद्धये पद्यैरमीभिः प्रतिपादये ॥
चतुस्सहस्रसूत्राणां पञ्चसूत्री विवर्जिता ।
अष्टाध्यायी पाणिनीया सूत्रैर्माहेश्वरैस्सह ॥
सप्ताशीत्यधिका तेषु त्रिशती सौवरी मता ।
पञ्चैकादश विज्ञेया(:) स्वरे योगा उणादिषु ॥
सङ्ख्याफिट्सूत्र[सूत्र]सूत्राणां विज्ञेयाशीतिरष्ट च ।
त्रिंशत्सूत्री प्रातिशाख्यात् संगृहीतात्र सौवरी ॥
संपद्यते पञ्चशती मेलने षोडशाधिका ।
सैषा पञ्चशती स्पष्टमत्र ग्रन्थे विविच्यते ॥
सङ्ख्योदात्तादिपदवत् सूत्राणामियमीरिता ।
ङीन्ङीषादिविधेयानि सूत्राणि सुबहून्यपि ॥
स्वरैकफलकान्येवं गुणसूत्राणि कानि चित् ।
सन्ति सूत्राण्युदात्तादिनिपातनपराण्यपि ॥
वार्त्तिकानि प्रसिद्धानि सूत्राणि सुबहून्यपि ।
किं बहुना श्रुतिरखिला ब्रह्माद्वैत (तैक) तत्परा यद्वत् ।
तद्व्याकृतिरखिला स्वरबोधैकप्रयोजना जयति ॥
द्वादशात्र प्रकरणान्याद्यमारम्भणं कृतेः ।
उपोद्घातान्यथ त्रीणि तेष्वाद्ये प्रतिपादितः ॥
उदात्तादेस्स्वरूपादिः परिभाषा द्वितीयके ।
तार्तीयीके तु सर्वत्रावेक्षितरसंहितास्वरः ॥
अथाष्टसु प्रकरणेष्वष्टौ व्युत्पादिता अमी ।
धातोस्स्वरः प्रत्ययस्य समासस्य फिषस्तथा ॥

सर्वानुदात्तभावश्च सुबन्तानां तिङामपि ।
स्वरः प्रतानामप्येकश्रुतिश्चेति यथाक्रमम् ॥

अवान्तरप्रकरणान्यत्र सन्ति बहून्यपि ।
ञिनि(न्नि)त्स्वरादयस्तेषु व्युत्पाद्या इति सङ्ग्रहः ॥

सौवरीं प्रक्रियां पूर्वे न सम्यग्व्युदपीपदन् ।
तथा हि तावद्वृत्त्यादौ वैदिकोदाहृतिर्न हि ॥

वेदे हि संप्रदायेन(ण) प्रथते नियतस्वरः ।
लोकेन पाठनैयत्यन्तस्य नेति च वक्ष्यते ॥

विप्रकीर्णा च सा तत्र यथासूत्रं यथायथम् ।
नापि सिद्धान्तकौमुद्याम् . . . .
सन्त्येव दुष्परिहरा दोषास्तत्रापि पञ्चषाः ॥

अदोषानेव तान्मन्ये गच्छतस्खलनं यथा ।
अथादोषाः कतिपये गण्यन्ते स्वारमञ्जराः ॥

अपेक्षितस्यावचनमनपेक्षितकीर्तनम् ।
अथाभाससमाधानमनाशङ्क्यस्य शङ्कनम् ॥

अपसिद्धान्तकथनं तथानन्वितकीर्तनम् ।
परस्परविरुद्धत्वं स्वोक्तानामेव च क्वचित् ॥

व्युत्क्रमेण च सूत्राणां कथनं निष्प्रयोजनम् ।
अनाञ्जस्यं विभागस्येत्याद्या दोषाः परिस्फुटाः ॥

बहूनां पाणिनीयानां सूत्राणामविवेचनम् ।
फिट्सूत्रस्यावर्णनञ्चापेक्षितानवबोधनम् ॥

न च वेदोदाहरणमेषां नेत्यविवेचनम् ।
उदाहरिष्यमाणत्वात् बहूनामेष्वपि श्रुतम् ॥

उदाहृतय एता हि वेदभाष्येऽप्युदीरिताः ।
द्वन्द्वानेकाधिकरणवचनो युगपद् भवेत् ॥

इत्यादिसाधनं युक्तादनपेक्षितकीर्तनम् ।
न हि काश्चिद्विशेषोऽस्मात् विचाराद्विद्यते स्वरे ॥

स्थानिवन्ना(न्न)हजा(ला)देशो भवेदिति यदीरितम् ।
यत्रैव देवताभाव एकस्मिन् हविषि द्वयोः ॥

तत्रैव देवताद्वन्द्वस्वर इत्यपि जल्पितम् ।
बह्वेवमादिकं ज्ञेयमपसिद्धान्तकीर्तनम् ॥

अन्येऽपि दोषास्तद्ग्रन्थदृष्टिभिस्सुगमा इति ।
वक्ष्यते चोत्तरत्रेति क्रियते नात्र विस्तरः ॥

ये दोषास्स्वरमञ्जर्यां ते तद्विवरणेऽपि च ।
अतः प्रचोदयति मां कृतावस्यां गुरोः कृपा ॥

विद्वांसश्श्रोतुमर्हन्ति तामेतां वीतमत्सराः ॥

इत्यारम्भणं नाम प्रथमं प्रकरणम् ॥

अथ संज्ञाप्रकरणम् ॥

निश्वसितं श्रुतिरखिला विश्वमिदं यस्य केवला लीला ।
तस्मै धाम्ने गिरिजामिश्रितवपुषे नमोऽस्तु कस्मै चित् ॥

सिद्धिः कार्यस्य निर्विघ्ना यदधीना विधेरपि ।
तदस्तु हस्तिवदनं वस्तु निश्रेयसाय नः ॥

कराभ्यां कस्याश्चित् कमलनयनायाः परिसरे
दृशोर्लीलाव्याजात् सपदि चलयन् केलिकमलम् ।
परागैस्तस्यास्यां मुकुलितदृशि स्वैरमपराम्
अथालिङ्गन् वृ(ह्)ष्टो दिशतु मदभीष्टं मुररिपुः ॥

व्याकृतिनिर्मितविदितान्मुनिवर्यांस्त्रीन्नमस्कुर्वे ।
गुरुमपि समष्टिमेषां वन्दे श्रीरामयज्वानम् ॥

तैत्तिरीयकशाखानुसारिणी विदुषां मता ।
विरच्यते धियश्शुद्ध्यै स्वरसिद्धान्तचन्द्रिका ॥

कष्टं व्याकरणं पतञ्जलिरपि प्राह स्म तत्राप्यसौ
दुर्ज्ञाना मतिमद्भिरप्यतितरां कष्टा स्वरप्रक्रिया ।
क्वैषा सा क्व मलीमसा मम मतिर्मन्दा तथाप्य(प्युत्स)हे
यन्मह्यं दयतेतरान्निरुपाधिश्श्रीरामभद्रो गुरुः ॥

निश्चित्य स्वरशास्त्रतत्त्वमखिलं भाष्यादिभिर्भास्करा-
द्याचार्यारचितं विभाव्य-सुचिरं भाष्यं श्रुतीनामपि ।
यच्चाकाङ्क्षितमत्र नैव कथितं तत् प्रातिशाख्यादिभि-
रसंगृह्य ग्रथिता मुदेऽस्तु विदुषामेषानवद्या कृतिः ॥

न्यक्कृतपूर्वनिबन्धा सत्कृतसत्संप्रदायरमणीया ।
कस्य न मोदं तनुते कृतिरेषा-मृदुपदावलीरचिता ॥

आम्नाये ये प्रवीणाः परिचयरहिताः प्रायशस्ते—
ये स्युस्तत्रापि दक्षाश्शिथिलपरिचयास्ते स्वरप्रक्रियायाम् ।
ईर्ष्यान्धाः केऽपि तत्राप्यधिकपरिचयाः किन्तु सन्तोऽनसूयाः
....पृथ्व्यां भवेयुः कति चन सफलो यत्र यत्नो मदीयः ॥

उच्चैरुदात्तः ।

ऊकालोऽज्ञ्रस्वदीर्घप्लुतः इति सूत्रादजित्यनुवर्तते, उच्चैरित्यधिकरणशक्तिप्रधानमव्ययमूर्ध्वशब्दसमानार्थकम्; तच्चात्र ताल्वादिस्थानसम्बन्धिन्यूर्ध्वभागे वर्तते । ताल्वादिषु हि स्थानेषु औत्तराधर्येण व्यवस्थिता भागाः । अधिकरणत्वस्य क्रियापेक्षत्वाद्योग्यतया निष्पत्तिक्रियालाभः । तदयमर्थः ताल्वादिस्थानोर्ध्वभागे निष्पन्नोऽनु(जु)दात्तसंज्ञ इति ।

End :

गुरोरनृत इति सूत्रात् । एवं च तत्र प्राचांग्रहणस्य विकल्पार्थत्वात् पक्षे न कस्य चित् प्लुतः । न च गुरोरनृत इति सूत्रादत्र कथमेवंलाभ इति वाच्यम् । यतस्तत्र काशिकायामुक्तं प्रत्यभिवाद इत्येवमादिना यः प्लुतो विहितस्तस्यैवायं स्थानविशेष उच्यते; प्राचां ग्रहणं विकल्पार्थम् ; आयुष्मानेधि देवदत्तेति हरदत्तो(त्तेना)प्युक्तं क्वचित् पठ्यत इत्युपक्रम्यानूद्य नेदं स्वतन्त्रं प्लुतविधानमित्यादिना व्याख्यायते न प्रत्यभिवाद्यमानार्थस्य च पदस्येदं प्लुतविधानं यत्र तत्रस्थस्य गुरोरिति द्रष्टव्यं प्राचां ग्रहणं विकल्पार्थमिति तेन पक्षे न कस्य चिदपि प्लुतो भवतीत्याह । अग्नीत्प्रेषणे परस्य चेति सूत्रे सर्वः प्लुतस्साहसमनिच्छता विभाषा वक्तव्य इति वदतो भाष्यकार

No. 1024. स्वराष्टकम्.
SVARĀṢṬAKAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 41*b* of the MS. described under No. 857.

Complete.

A work treating of Vēdic accents in 8 stanzas. A work of this name is quoted in the commentary of Svaraśikṣā as having been consulted by the author of the text thereof.

Beginning :

एकोदात्तं पदं विद्यादेकस्वारमथापरम् ।
कानि चित्तु द्व्युदात्तानि तच्छिष्टन्निहतं स्मृतम् ॥
द्व्युदात्तानां समासे तु त्र्युदात्तत्वञ्च दृश्यते ।
सर्वानुदात्तमेवान्यत् पदमेवंविधं स्मृतम् ॥

End :

स्वरितस्यैव पूर्वार्द्धमपरे तु मनीषिणः ।
अभिस्वार्यैव पूर्वार्द्धं नियच्छन्त्येव कम्पितम् ॥

Colophon :

स्वराष्टकं समाप्तम् ॥

(2) NIRUKTAM.

No. 1025. निरुक्तम्.

NIRUKTAM.

Substance, paper, Size, 12½ × 7½ inches. Pages, 177. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 167*a* of the MS. described under No. 33.

Complete.

The second part of Nirukta constituting the commentary on the first part; contains 14 Adhyāyas including 2 Adhyāyas of Pariśiṣṭam. The first part consists of 5 Adhyāyas making up the नैघण्टुक, नैगम and देवता Kāṇḍas.

Beginning of the second part :

समाम्नायस्समाम्नातस्स व्याख्यातव्यस्तमिमं समाम्नायं निघण्टव इत्याचक्षते । निघण्टवः कस्मान्निगमा इमे भवन्ति छन्दोभ्यस्समाहृत्य समाहृत्य समाम्नातास्ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवोऽपि वा हननादेव स्युः समाहता भवन्ति । यद्वा समाहृता भवन्ति तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति तत्रैतन्नामाख्यातयोर्लक्षणं प्रविशन्ति भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि तद्यत्रोभे भावप्रधाने भवतः पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तं मूर्तं सत्त्वभूतं सत्त्वनामभिर्व्रज्या पक्तिरित्यद इति सत्त्वानामुपदेशः । गौरश्वः पुरुषो हस्तीति भवतीति भावस्यास्ते शेते व्रजति तिष्ठतीतीन्द्रियनित्यं वचनमौदुम्बरायणः.

End :

मा ते राधांसि मा ते ऋक् मा च ते धामानि मा च ते कदा च नस्सरिषुस्सर्वाणि प्रज्ञानान्युपमानाय मनुष्यस्य हितोऽयमादित्योऽयमात्मा-थैतदनुप्रवदन्त्यथैतं महान्तमात्मानमेषर्ग्गणः प्रवदन्ति(ति) वैश्वकर्मणे देवा-

नां नु वयं जानाना नासदासीन्नो सदासीत्तदानीमिति च सैषात्मजिज्ञासा सैषा सर्वभूतजिज्ञासा ब्रह्मणस्सारिष्टं सरूपतां सलोकतां गमयति य एवं वेद नमो ब्रह्मणे नमो महते भूताय नमः पारस्का(स्करा)य नमो यास्काय ब्रह्म शुक्लमसीय ब्रह्म शुक्लमसीय ॥ 37 ॥

इति निरुक्ते चतुर्दशोऽध्यायः ॥

व्याख्यात(न्दैवत)मग्निरस्मि जन्मनापश्यं गोपामाकाशगुणस्तं परिवर्तमानं स यद्यनुरुध्यतेऽष्टोत्तरमथ ये हिंसामाश्रित्याथ ये हिंसामुत्सृज्य न तं हंसो घर्मस्सोमः पवते ब्रह्मा देवानां तिस्रो वाच ईरयति सोमं गावोऽक्रान्महत्तत्सोमो विधुं दद्राणं साकञ्जानास्त्रियस्सतीस्सप्तार्धगर्भानविजानाम्यपाङ् प्राङेति तदिदास को अद्य युङ्क्ते को अग्निमिछेत् त्वमङ्ग हंसश्शुचिषद्द्वा सुपर्णायाहीन्द्र विप्रं विप्रासो जातवेदस इदं तेऽन्याभिस्त्र्यम्बकं शतं जीव मा ते राधांसि सप्तत्रिंशत् ॥

Beginning of the first part:

गौः, ग्मा, ज्मा, क्ष्मा, क्षा, क्षामा, क्षोणी, क्षितिः, अवनी[:], उर्वी, पृथ्वी, मही, अदितिः, रिपः, इला, निर्ऋत(ति)ः, भूः, भूमिः, पूषा, गातुः, गोत्रेत्येकविंशतिः पृथिवीनामधेयानि ॥

End:

अशि, क्रा, उषाः, सूर्या, वृषाकपायी, सरण्या(ण्यू)ः, त्वष्टा, सविता, भगः, सूर्यः, पूषा, विष्णुः, विश्वानरः, वरुणः, केशी, केशिनः, वृषाकपिः, यमः, अज एकपात्, पृथिवी, समुद्रः, अथर्वा, मनुः दध्यजो(ङ्), आदित्याः, सप्त ऋषयः, देवाः, विश्वे देवाः, साद्या(द्ध्या)ः, वसवः, वाजिनः, देवपत्न्यो देवपत्न्य इत्येकत्रिंशत्पदानि ॥

Colophon

इति नैघण्टुकस्य पञ्चमोऽध्यायः समाप्तः ॥

No. 1026. निरुक्तम्.

NIRUKTAM.

Size, 13 × 7¾ inches. Pages, 15. Lines, 24 on a page. Character, Grantha.

Begins on fol. 37*a* of the MS. described under No. 589.

Has 5 Adhyāyas.

Contains the first part of the Nirukta.

Beginning:

गौः, ग्मा, ज्मा, क्ष्मा, क्षा, क्षौ(क्षा) मा, क्षोणी, क्षितिः, अवनिः, उर्वी, पृथ्वी, मही, अदितिः, रिपः, इला, निर्ऋतिः, मा, भूमिः, पूषा, गातुः, गोत्रा इत्येकविंशतिः पृथ्वीनामानि ।

End:

साध्याः, वसवः, वाजिनः, देवपत्न्यो देवपत्न्यः इत्येकत्रिंशत् पदानि।

अग्निर्द्रविणोदा अश्वो वायुः श्येनोऽश्विनौ षट् ॥

इति नैघण्टुके पञ्चमोऽध्यायः ॥

Colophon:

वेदाङ्गनैघण्टुके पंञ्चमोऽध्यायस्समाप्तः ॥

---

(3). JYAUTIṢAM (VĒDĀṄGA).

No. 1027. वेदाङ्गज्यौतिषम्.

VĒDĀṄGAJYAUTIṢAM.

Pages, 4. Lines, 24 on a page. Character, Grantha.

Begins on fol. 49*a* of the MS. described under No. 589.

Complete.

A small astronomical work on the determination of the proper seasons, months and days for the performance of Vēdic sacrifices; by Lagadha.

Beginning:

पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम् ।
दिनर्त्वयनमासाङ्गं प्रणम्य शिरसा शुचिः ॥
प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम् ।
कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः ॥
ज्योतिषामयनं कृत्स्नं प्रवक्ष्याम्यनुपूर्वशः ।
विप्राणां सम्मतं लोके यज(ज्ञ)कालार्थ(र्थ)सिद्धये ॥

End:

यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां ज्यौतिषं मूर्धनि स्थितम् ॥
वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्वा विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं
यो ज्यौतिषं वेद स वेद यज्ञान् ॥
यो ज्यौतिषं वेद स वेद यज्ञान् इति ॥

पञ्चसंवत्सरं प्रपद्येते कार्य(र्याः) नाडिके (कला दश च) या पर्वसविता विषुवं सप्त ॥

Colophon:

इति लगुधोक्तं वेदाङ्गज्यौतिषं समाप्तम् ॥

No. 1028. वेदाङ्गज्यौतिषम्.

VEDĀṄGAJYAUTIṢAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 887.

Complete. Same as the last.

The following is found at the end of the work:

बहुधान्यनामसंवत्सरे मार्गशीर्षशुद्धप्रतिपदि सौम्यवासरे परिभाषाप्रातिशाख्ये समाप्ते ॥

IV. KALPA AND THE ALLIED SUTRAS.

No. 1029. आश्वलायनश्रौतसूत्रम्.

ĀŚVALĀYANAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, 16 × 1¾ inches. Pages, 261. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Pratyaṅgirā-kavacam 132*a*, and Aśvatthanārāyaṇapūjā 137*a*.

Complete.

This work is in 12 Adhyāyas and treats of Vēdic sacrifices; it is in the form of Sūtras and is by Āśvalāyana. It has particularly in view the use of the Ṛgvēda by the Hotṛ priest in those sacrifices.

Beginning:

अथैतस्य स(मा)म्नायस्य विताने योगापत्तिं वक्ष्यामः । अग्न्याधेयप्रभृतीन्याह वै(तानि)कानि । दर्शपूर्णमासौ तु पूर्वं व्याख्यास्यामस्तन्त्रस्य तत्राम्नातत्वात् । दर्शपूर्णमासयोर्हविष्ष्वासन्नेषु होतामन्त्रितः प्रागुदगाहवनीयादवस्थाय प्राङ्मुजो(खो) यज्ञोपवीत्याचम्य दक्षिणाव(वृ)द्विहारं प्रपद्यते पूर्वेणोत्त(त्क)रमपरेण प्रणीताः । इध्ममपरेण(ा) प्रणीते । चात्वालं चात्वालवत्सु । एतत्तीर्थमित्याचक्षते ।

End:

अन्यो वा प्रज्ञातदक्षिणः । दक्षिणावता पृष्ठा(ष्ठ्या)नि शमयेरन्निति विज्ञायते । स एव हेतुः प्रकृतिभावे प्रकृतिभावे । नमो ब्रह्मणे नमो ब्रह्मणे नम आचार्येभ्यो नम आचार्येभ्यो नमश्शौनकाय नमश्शौनकाय ॥

द्वादशोऽध्यायः ॥

उक्तानि वैतानिकानि । अत्रि(त्री)णां, कण्वानां, गोतमानां, सर्वे समानगोत्रास्स्युरिति गाणगारिः, तस्य विभागं वक्ष्यामः, अथ सत्रिधर्म-

दीक्ष[:], अथ सवनीयाः, अथ सारस्वतानि, सर्पाणामयनं कुण्ड-पायिनामयनम्, आदित्यानामयनेनाङ्गिरस(ा)मयनं व्याख्यातं, गवामयने-मा(ना)दित्यानां, गवामयनेन कण्वानां द्वौ ॥

Colophon:

इत्याश्वलायनसूत्रे द्वादशोऽध्यायः ॥

चित्रभानुतपश्शुक्लसप्तम्यामिन्दुवासरे ।
आश्वलायनसूत्रं हि लिख्यते घण्टियज्वना ॥

No. 1030. आश्वलायनश्रौतसूत्रम्.

ĀŚVALĀYANAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, 15½ × 1⅜ inches. Pages, 40. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Āśvalāyanaśrautaprayōgaḥ 21*a*.

Contains the fourth and the fifth Praśnas of the work described under the last number.

No. 1031. आश्वलायनश्रौतसूत्रवृत्तिः.

ĀŚVALĀYANAŚRAUTASŪTRAVṚTTIḤ.

Substance, paper. Size, 8 × 6½ inches. Pages, 88. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new. Transcribed for the Library in 1895.

Begins on fol. 54*a*. The other works herein are Agnihōtrarakṣāmaṇiḥ 1*a*, Agnihōtrarakṣāmaṇivyākhyā 12*a*.

Contains a commentary on the Āśvalāyanaśrautasūtra; from the close of the 12th Khaṇḍa of the 5th Praśna to the end of the 6th Praśna. The author of the commentary is Ṣaḍguruśiṣya, and it is called Abhyudayapradā.

Beginning :

. . . . स्तैतेनास्य चतुराहावशस्त्रता ।
चतुराहावशस्त्रत्वमेवमुत्तरयोरपि ॥

आयातं मित्रावरुणेति याज्या । अत्रास्यनुवषण्णाभूद्द्विर्यागोऽजोऽनुमन्त्रणम् । अथ ब्राह्मणाच्छंसिन आह आयाहि सुषुमाहित इति षट्स्तोत्रियानुरूपावनन्तराः सप्त ऋचः.

* * * *

संस्थितेषु सवनेषु षोडशिनि चातिरात्रे प्रशास्तः (प्रसुहीत्युक्तः सर्पतेति) प्रशास्ता . . सताभिसृजेत् । अथ समाप्तेषु सवनेषु तथातिरात्रे अतिरात्रसंस्थे षोडशिनि शस्त्रे च प्रशासतः प्रस(सु)हीत्यध्वर्युणोक्तः प्रशास्ता सर्पतेत्यनुजानीयात् । प्रसुहीत्युपलक्षणम्.

* * * *

Colophon :

इति षड्गुरुशिष्यविरचितायामाश्वलायनसूत्रवृत्तौ पञ्चमोऽध्यायः ।

अथेदानीमुक्थ्यसंस्थायामाग्निमारुतशस्त्रादूर्ध्वं विशेषमाह—उक्थ्ये तु होतृकाणां शस्त्राणि भवन्ति न होतुः इति शेषः । तत्र प्रशास्तुः एद्वेषु ब्रवाणि ते स्तोत्रियतृचः ।

End :

तस्योपांशुसवं क्रियंते ओत्तमादनुयाजात् उरु विष्णो विक्रमस्वेति पूर्णाहुतिमेके उदवसानीयायास्थाने समामनन्ति इति द्विरुक्तिरुक्तार्थम् ॥

Colophon :

इति षड्गुरुशिष्यविरचितायामाश्वलायनसूत्रवृत्तौ अभ्युदयप्रदायां षष्ठोऽध्यायः ॥

No. 1032. आश्वलायनश्रौतसूत्रप्रयोगवृत्तिः.

ĀŚVALĀYANAŚRAUTASŪTRAPRAYŌGAVṚTTIḤ.

Substance, paper. Size, 10⅜ × 8⅝ inches. Pages, 227. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new. Transcribed for the Library in 1897.

Incomplete.

This is a commentary on the Āśvalāyanaśrautasūtra, containing directions for the performance of the various sacrifices. This is a very popular treatise with the priests. The author is one Tālavṛntanivāsin, also called Āṇḍapillai.

Beginning:

समस्तप्राणिजातस्य हृत्पद्मनिलये स्थितम् ।
वेदार्थं विदुषां ज्ञेयं यज्ञात्मानं नमाम्यहम् ॥

आश्वलायनसूत्रस्य देवस्वाम्यादिव्याख्यानानुसारेण प्रयोगवृत्तिः क्रियते । दर्शपूर्णमासप्रभृतीनामुक्तानां कर्मणां यः पदा(रा)र्थः कर्तव्यः तदा चोदितः अनादेशे होत्रा कर्तव्ये दक्षिणेन पाणिना यज्ञोपवीती शुचिर्भावति । ऋचं पादग्रहणे कर्मार्थं प्रतीयात् । पादमित्यविवक्षितं प्रतीकमात्रमेव सूक्तम् ॥

* * * *

इति तालवृन्तनिवासिकृतायां हौत्रप्रयोगवृत्तौ दर्शपूर्णमासप्रयोगः समाप्तः ॥

* * * *

प्रायश्चित्तानि समाप्तानि ॥
आश्वलायनसूत्रस्य वृत्तिरेषा प्रदीपिका ।
कृता त्रैविद्यवृद्धेन तालवृन्तनिवासिना ॥
समाप्तस्तृतीयोऽध्यायः ॥

सोमप्रयोग उच्यते ।

End:

ऋत्विजां त्रीणि शस्त्राणि यज्ञपुच्छादि पूर्ववत् ।
षोळशिग्रहसंस्थायां पशुरैन्द्रा (न्द्रो) विधीयते ॥
विहृतष्षोळश्युक्थ्यान्ते अस्य वा यज्ञपुच्छकम् ।
वाजपेयेऽग्निरुद्राग्नी इन्द्रश्च मरुतस्तथा ॥
सरस्वती सरस्वांश्च देवताश्च प्रजापतिः ।
पशूनां षोळश्यतिरिक्तो यज्ञपुच्छादि पूर्ववत् ॥
अथातिरात्रप्रयोग उच्यते ॥

आश्वलायनसूत्रवृत्तिश्रौतसूत्रप्रयोगदीपिका सूचिका.

दर्शपूर्णमासप्रयोगः	....	....	(१)
अग्न्याधेयस्य प्रयोगः	....	....	(१६)
यवाग्रयणे विकल्पः	....	....	(४३)
वर्षासु श्यामाकेष्टिः			
आयुष्कामेष्टिः	....	....	(४४)
स्वस्तिगमनार्थेष्टिः			
पुत्रकामेष्टिः			
उत्तरालोकेष्टिः	....	....	(४५)
पवित्रेष्टिः	....	....	(४८)
वर्षकारेष्टिः	....	....	(४९)
तुरायणेष्टिः	....	....	(५१)
दाक्षायणयज्ञः			
विभ्रष्टेष्टिः	....	....	(५३)
हिरण्यनाशेष्टिः	....	....	(५४)
चातुर्मास्यानां प्रयोगः			
अवभृथेष्टिः	....	....	(६१)
उत्तरेष्टिः	....	....	(६६)

सौत्रामण्यः .... (९०)
अन्वाहितप्रायश्चित्तम् .... (९५)
दर्शपूर्णमासातिपत्तिः .... (९७)
कर्तृविषयप्रायश्चित्तम् .... (१०६)
अग्निविच्छेदप्रायश्चित्तानि .... (१०७)
अन्यानि प्रायश्चित्तानि .... (१०९)
विपर्यासप्रायश्चित्तम् .... (११३)
सोमप्रयोगः .... (११७)
प्राजापत्यः .... (१२१)
प्रवर्ग्यः .... (१२७)
उपसत् कर्म .... (१३१)
वैश्वदेवशस्त्रम् .... (१८२)
सन्धिहोमः .... (१९४)
उदयनीयेष्टिः .... (१९६)
अत्यग्निष्टोमस्य प्रयोगः .... (१९८)
षोळशिप्रयोगः .... (२०१)
अविहृतषोळशिनः स्वरूपम् .... (२०७)
वाजपेयः .... (२०९)
वनस्पतियागः .... (२१९)
आग्निमारुतम् .... (२२२)

No. 1033. आश्वलायनश्रौतसूत्रप्रयोगवृत्तिः.

ĀŚVALĀYANAŚRAUTASŪTRAPRAYŌGAVṚTTIḤ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 408. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old. Fol. 26, 27, 125 to 203, 220 to 229 and 255 are lost.

Incomplete.

Contains directions for the performance of sacrifices in accordance with Āśvalāyanaśrautasūtra, as explained in the commentary of Dēvasvāmin. The work is by Tālavṛntanivāsin.

Beginning :

. . . . . यज्ञात्मानन्नमाम्यहम् ।

आश्वलायनसूत्रस्य देवस्वाम्यादिव्याख्यानुसारेण प्रयोगवृत्तिः क्रियते। दर्शपूर्णमासप्रभृतीनामुक्तानां कर्मणां यः परार्थः कर्तव्यः तदा चोदितः अनादेशे होत्रा कर्तव्ये दक्षिणेन पाणिना यज्ञोपवीती शुचिर्भवति ।

* * * *

Colophon :

इति तालवृन्तनिवासिकृतायां हौत्रप्रयोगवृत्तौ दर्शपूर्णमासप्रयोगवृत्तिः ॥

* * * *

आश्वलायनसूत्रस्य वृत्तिरेषा प्रदीपिका ।
कृता त्रैविद्यवृद्धेन तालवृन्तनिवासिना ॥

End :

एतत्सर्वं सर्वेषां सोमयागानां साधारणं भवति । अस्मिन् प्रकरणे अश्रुतफलानां कर्मणां शास्त्रान्तरेण फलोऽवगन्तव्यः । उद्देशक्रमेण इदानीम् एकाहा आरभ्यन्ते—उक्तानि चातुर्मास्यानीत्यारभ्य इत्यतिरात्रा इत्यन्तेन ग्रन्थरा ।

No. **1034.** आश्वलायनप्रयोगदीपिका.

ĀŚVALĀYANAPRAYŌGADĪPIKĀ.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 208. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains 6 Adhyāyas. This work is by Mañcanācārya, and gives the ritualistic directions for the performance of Vēdic sacrifices, as explained in Āśvalāyanasūtra. The author professes to follow the Vṛttikāra (Tālavṛntanivāsin).

Beginning :

य एको विविधैर्यज्ञैरिज्यते विविधाभिधः ।
तस्मै नमः क्रतुभुजे बिष्णवे गोपरूपिणे ॥

आश्वलायनसूत्रोक्तप्रयोगस्य प्रदीपिका ।
क्रियते मञ्चनार्येण वृत्तिकारानुसारतः ॥

तत्र प्रथमानुष्ठेयत्वेन अग्न्याधेयं प्रथमं वक्तव्यम् । एतस्य इष्टिस्वरूपत्वादिष्टेश्च विध्यन्तसापेक्षत्वात् विध्यन्तस्य दर्शपूर्णमासयोरेवाम्नानात् व्याख्यानमन्तरेण नाधानकथनमिति दर्शपूर्णमासावेव प्रथमं प्रदृश्ये(दर्श्ये)ते।

End :

उदवसानीयेष्टिपक्षे अग्निः प्रधानदेवता । अग्निर्मूर्धा भुवो यज्ञस्येत्यग्नेर्याज्यानुवाक्ये । शेषं पूर्णमासवत् । पूर्णाहुतिपक्षे होतुरप्रयोगः ॥

Colophon :

इति श्रीमञ्चनाचार्यविरचितायामाश्वलायनप्रयोगदीपिकायां षष्ठोऽध्यायः ॥

This was finished by the copyist on the 9th day of the month of Vṛṣabha in the year Raudri.

No. **1035**. आश्वलायनब्रह्मत्वम्.

ĀŚVALĀYANABRAHMATVAM.

Substance, palm-leaf. Size, $15\frac{7}{8} \times 1\frac{3}{8}$ inches. Pages, 2. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 80*b*. The other works herein are : Āpastambaśrautaprayōgaḥ 1*a*, Āpriyā 82*a*, Kuṇḍalēṣṭiḥ 86*a*, Avabhṛtatantram 88*a*, Vaiśvadēvavidhiḥ 95*a*, Sāvitram 99*a*, Agnihōtram 107*a*, Śrautaprayōgaḥ 114*a*.

This treats of the function of the Brahman priest in the conduct of Vēdic sacrifices, as understood by the Sūtrakāra Āśvalāyana.

Beginning :

ब्रह्मत्वं व्याख्यास्यामः । वरणानन्तरं ब्रह्मा यज्ञोपवीत्याचम्य समस्तपाण्यङ्गुष्ठोऽग्रेणाहवनीयं परीत्य दक्षिणतः कुशेषूपविशेत् । निरसनोपवेशने कृत्वा बृहस्पतिर्ब्रह्मा ब्रह्मसदन आसिष्यते । बृहस्पते यज्ञं गोपाय । उपविश्य जपेत् । एष ब्रह्मजपस्सर्वयज्ञतन्त्रेषु । बृहन्नपः प्रणेष्यामीति श्रुत्वा भूर्भुवस्सुवर्बृहस्पतिप्रसूतः । उपांशु जपित्वा ओं प्रणय उच्चैः सर्वत्रायमेव मन्त्रः ।

End :

अपरया द्वारा प्रसृप्य दक्षिणा पुरस्तात् मैत्रावरुणस्योपविशेत् : निरसनोपवेशने । उरुं नो लोकमनुनेषि यो अद्य सोम्योऽवदूघा सदसस्पतये नमः ॥

No. 1036. शाङ्खायनश्रौतसूत्रम्.

ŚĀNKHYĀYANAŚRAUTASŪTRAM.

Substance, paper. Size, 8⅛ × 6½ inches. Pages, 340. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new. Transcribed for the Library in March 1895.

Contains 18 Adhyāyas of the Sūtra. This Sūtra is similar in subject matter to the work described under No. 1029 ; but is by a different author Śāṅkhyāyana, and belongs to the Ṛgvēdic school of priests.

Beginning :

यज्ञं व्याख्यास्यामः ॥ १ ॥ स त्रयाणां वर्णानाम् ॥ २ ॥ ब्राह्मणक्षत्रिययोर्वैश्यस्य च ॥ ३ ॥ असंयुज्य विधीयमानं साधारणम् ॥ ४ ॥ संयोगाद्व्यवतिष्ठते ॥ ५ ॥ यज्ञोपवीती देवकर्माणि करोति ॥ ६ ॥ प्राचीनावीती पित्र्याणि ॥ ७ ॥ आचमनप्रभृति येनाधिकरणेन संयुज्येत न तेन व्यावर्तेत ॥ ८ ॥ न च व्यवेयात् ॥ ९ ॥ इत्यावृतां लक्षणा ॥ १० ॥

End:

तेभ्यस्तद्दद्याद्यद्देयं स्यात् ॥ ३२ ॥ अत्र संवत्सरः सन्तिष्ठते ॥ ३३ ॥ अथातो होत्राणामेव मीमांसा तस्यातस्तस्यातः ॥ ३४–२४ ॥

Colophon:

इति शाङ्खायनश्रौतसूत्रे अष्टादशोऽध्यायस्समाप्तः ॥

इति शाङ्खायनश्रौतसूत्रं समाप्तम् ॥

No. 1037. द्राह्यायणश्रौतसूत्रम्.

DRĀHYĀYAṆAŚRAUTASŪTRAM.

Substance, paper. Size, 11 × 8¾ inches. Pages, 212. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains 31 Paṭalas. Transcribed in 1897. This Śrauta-sūtra also deals with sacrificial ritual, and belongs to the priestly school of Sāma-Vēdins.

Beginning:

अथातो विध्य(व्य)पदेशे सर्वक्रत्वधिकारो मन्त्रविधिश्चादिग्रहणेनोत्तरादि पूर्वान्तलक्षणमेकश्रुतिविधानान्मन्त्रान्कर्माणि चोद्ग(ा)तैव कुर्यादनादेशे। यावद्य जुरनादृष्टान्तान्मन्त्रानृच . . . दिग्रहणेन ऋत्विगार्षेयोऽनूचानः साधुचरणो वाग्म्यन्यूनाङ्गोऽनतिरिक्ताङ्गोद्वयसतश्चानतिकृष्णोऽनतिश्वेतो याज्यश्च प्रथमैस्त्रिभिर्गुणैर्व्याख्यातस्सोमप्रवाकमकरिष्यन्नमस्सोमाय राज्ञ इत्युक्त्वा प्रत्याचक्षीत।

End:

त्रिस्संवत्सरं तस्य यथा कामी दक्षिणां षष्ठिरिति शाण्डिल्यः। प्रथमोत्तमौ संवत्सरं व्यतिवारेदिति धानञ्जय्येऽभिप्लवस्तोमपृष्ठ्ये देशरोहार्थोऽमावास्यायां प्रसवे सहस्रसंवत्सरे सहस्रसंवत्सरे ॥ ४ ॥

Colophon:

इति द्राह्यायणश्रौतसूत्रे एकत्रिंशः पटलः॥

No. 1038. द्राह्यायणश्रौतसूत्रभाष्यम्.

DRĀHYĀYAṆAŚRAUTASŪTRABHĀṢYAM.

Substance, palm-leaf. Size, 13½ × 1¼ inches. Pages, 219. Lines, 9 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains the commentary of Dhanvin on the Drāhyāyaṇa-sūtra; from the 2nd Paṭala to the 3rd Khaṇḍa of the 15th Paṭala, *i.e.*, to the 5th Paṭala of the second Daśaka.

Beginning:

एवं सुब्रह्मण्यस्य कृत्यमुक्त्वा प्रस्तोतुर्वक्तुमारभते—सर्वत्रानादेशे परिसामानि प्रस्तोता गायेत् स्वाध्यायवत्स्वास्यरि(सु तृचे)ति । यानि बहिस्तोत्राण्यङ्गतया प्रयुज्यन्ते तानि परिसामानि तान्यनादेशे स्वकीयास(स्वृ)क्षु यथाध्ययना(नं)प्रस्तोतैव गायेत् । योनिरुत्तराद्वयञ्च स्वकीयास्ततोऽन्याः परकीयाः । यथा रथन्तरस्य अभि त्वा शूर नोनुम इति स्वकीयाः, कया नश्चित्र आभुवदिति परकीयाः । वामदेव्यस्य विहिता स्वभूताः तत्र रथन्तरन्दक्षिणे पक्षे गायेदित्युक्ते कया नश्चित्र आभुवदिति एतास्वपि रथन्तरस्य दर्शनात् तास्वपि गानं प्रसज्येत । तन्निवृत्त्यर्थं स्वास्विति वचनात् .

* * * *

तस्मात् द्वित्वरूपाणां निवृत्तौ ज्योतिषान्निवृत्तिरिति पूर्वोक्तस्य हेतुकथनमेतदिति ॥

Colophon:

इति काश्यपगोत्रेण धन्विना प्रीतये हरेः ।
छन्दोगसूत्रदीपोऽयं द्वितीयः पटलः—॥

* * * *

इति छन्दोगसूत्रस्य दीपे धन्विविनिर्मिते ।
दशमः पटलो वृत्तस्तस्मिन् शिल्पमुदीरितम् ॥

* * * *

द्राह्यायणकृते सूत्रे दीपे धन्विविनिर्मिते ।
द्वितीये दशके वृत्तः प्रथमः पटलोऽधुना ॥

* * * *

धन्विनारोपिते दीपे ब्रह्मत्वस्य विधं प्रति ।
चतुर्थे पटले त्वर्द्धं सोमयागस्य कीर्तितम् ॥

End:

ब्रह्मन् वाचं यच्छेति तत्सत्रे पर्यायेण कुर्युस्तदुभयं कुर्युः प्रथम[ा]दिवसे कश्चिद्द्वितीये त्वपर इत्येवमहीने तु ब्रह्मैव ब्रह्मैव कुर्यादिति ॥ ३ ॥

No. 1039. छन्दोगश्रौतप्रयोगप्रदीपिका.

CHANDŌGAŚRAUTAPRAYŌGAPRADĪPIKĀ.

Substance, paper. Size, $8\frac{1}{2} \times 6\frac{5}{8}$ inches. Pages, 88. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new. Copied in 1895.

Begins on fol. 1*a*. The other work herein is Cayanōpasthānam 46*a*.

Contains the Prayōga relating to Agniṣṭōma.

The commentary is by Tālavṛntanivāsin, and relates to the Śrautasūtra of Drāhyāyaṇa giving directions to the Sāman-priests for the performance of various Vēdic sacrifices.

Beginning:

छन्दोगसूत्रप्रयोग उच्यते । द्राह्यायणीयपातञ्जलवाररुचमाशकानुपसङ्गृह्य केवलं पञ्चविंशब्राह्मणोक्तमप्युपसङ्गृह्य षड्विंशोक्तसासिसुब्रह्मण्यादीनुपसङ्गृह्य उपनिषदुक्तलोकद्वारादीनुपसङ्गृह्य शाखान्तरीयानविरुद्धानपेक्षितानप्युपसङ्गृह्य मखस्वामिरुद्रस्कन्दादीनप्युपसङ्गृह्य ज्योतिष्टोममारभ्य विश्वसृजामयनपर्यन्तानां यज्ञक्रतूनां प्रयोग उच्यते ।

End:

अपरेणोत्तरां वेदिं लोकद्वारद्वयं तथा ।
मृदाशिधिराक्रमणं स्यात् ऋतस्य उपह्वयते ॥ १ ॥

आदित्ये च हुते हर्तुर्हविर्धानप्रवेशनम् ।
विष्णोश्शिरोऽसीषमूर्जवसवस्त्वेति त्रयं प्रति ॥ २ ॥

पवित्रं तेति तस्मिन् स्यात् न द्रोणेन प्रशुक्रकम् ।
होमादि पूर्ववत् कार्यं प्रतिहर्तु(र्)ऋचा इति ॥

माध्यन्दिने तृतीये च स्तोता हर्ता च केवलम् ।
होमार्द्रसर्पणं चैव कुर्यात्तामेव के चन ॥

Colophon:

छन्दोगस्य प्रदीपस्य वृत्तिरेषा प्रदीपिका ।
कृता वैविद्यवृद्धेन तालवृन्तनिवासिना ॥
इत्यग्निष्टोमस्समाप्तः ॥

No. 1040. प्रतिहारसूत्रम्.

PRATIHĀRASŪTRAM.

Pages, 19. Lines, 9 on a page.

Begins on fol. 6*a* of the MS. described under No. 371.

Complete.

This work treats of the way in which the hymns of the Sāma-Vēda are to be sung by the Pratihartṛ in concert with the other singing priests in Vēdic sacrifices.

Beginning:

अथातः प्रतिहारस्य न्यायसमुद्देशं व्याख्यास्यामः । उत्तमं पदं प्रतिहारस्थानं तत्र पदसङ्ख्यानादेशे चतुरक्षरमाद्यं न्यायं प्रति(ती)यात्

सङ्ख्याविवृद्धिह्रासौ च । सङ्ख्याशब्दे च स्तौभिकान्यक्षराणि तस्य पुरस्तात् स्तोभा न्याय्येनोद्गातुरुपरिष्टात्.

End:

एवमेव सामान्ते । नाकाकं आवेच्छा औहोवा । पक्षिण्यो दाशा दाशाताः पक्षिण्यो दाशा दाशाताः इति वा वाग्बृहद्रथन्तरयोर्वाग्बृहद्रथन्तरयोः ॥

Colophon:

इति प्रतिहारसूत्रं सम्पूर्णम् ॥

No. 1041. सर्वपृष्ठाप्तोर्यामम्.

SARVAPṚṢṬHĀPTŌRYĀMAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 5*a* of the MS. described under No. 371.

Complete.

This gives the collection of Sāmans to be used in the sacrifices known as Sarvapṛṣṭha and Aptōryāma.

Beginning:

पवस्व वाचो अग्रियः दविद्युतत्यरुचा पवमानस्य ते कव इति । बहिष्पवमानं, त्रिवृत् । अग्निन्दूतमा नो मित्रा इन्द्रमिद्गाथिनो बृहदिन्द्राग्नि आगतं सुतमिति गर्भिण्यः.

End:

त्रिवृत्पञ्चदशसप्तदशएकविंशस्तोमाः । स्तोमविमोचनादि उदवसनीयान्तं प्रकृतिवत् ॥

Colophon:

इति सर्वपृष्ठाप्तोर्यामं सम्पूर्णम् ॥

No. 1042. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, 16¼ × 1¼ inches. Pages, 312. Lines, 7 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains the first 15 Praśnas. It treats of the rites connected with Vēdic sacrifices according to the Āpastamba-school of the Yajur-Vēda. Praśnas 1 to 24 deal with Śrauta sacrifices, the 24th containing the Paribhāṣā, Pravara and Hautra; Praśnas 25 and 26 give the Gṛhya-mantras; Praśna 27 forms the Gṛhya-sūtra; Praśnas 28 and 29 are the Dharma-sūtras; Praśna 30 is the Śulba-sūtra. For contents see pages 15 and 17 of Burnell's "Classified Index to the Skt. MSS. in the Palace Library at Tanjore".

Beginning:

यज्ञैराराध्यमानं तं नत्वा सद्भिरनुष्ठितैः ।
आपस्तम्बञ्च तमृषिं तत्सूत्रं लिख्यतेऽधुना ॥

अथातो दर्शपूर्णमासौ व्याख्यास्यामः । प्रातराग्निहोत्रं हुत्वान्यमाहवनीयं प्रणीयाग्नीनन्वादधाति । न गतश्रियोऽन्यमग्निं प्रणयति । देवा गातुविदो गातुं यज्ञाय विन्दत । मनसस्पतिना देवेन। वाताद्यज्ञः प्रयुज्यताम् ।

End:

अथ प्रतिप्रस्थाता समयाविषिते सूर्ये अग्नीदौपयिकान् उक्थ्यष्षोडश्यतिरात्रः ।

वासिष्ठो दक्षिणां वा वत्सरमग्निं नरो यदि सोमे यदि सत्राय यत् कलशो यदि सदो दश ॥

No. 1043. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, paper. Size, 12 × 9⅝ inches. Pages, 404. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are : Yajñōpavītavidhiḥ 309*a*, Yajñakartavyatāvidhiḥ 311*a*.

Contains the first 15 Praśnas.

Same as the last. This is a transcript of the MS. described under the last number ; made in 1891.

No. **1044.** आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 318. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Contains the first 14 Praśnas completely and only 5 Khaṇḍas in the 15th Praśna.

No. **1045.** आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, $17\frac{5}{8} \times 1\frac{1}{2}$ inches. Pages, 250. Lines, 8 on a page. Character, Grantha. Condition, very much injured. Appearance, old.

Contains the 24th Praśna consisting of 4 Khaṇḍas of the Paribhāṣāsūtra, of 6 Khaṇḍas of the Pravarasūtra and of 4 Khaṇḍas of (probably) the Hautraka. Then there are the first 12 Praśnas—fol. 7*b*. The leaves are very promiscuosly arranged and are not numbered.

Beginning of Paribhāṣāsūtra.

यज्ञं व्याख्यास्यामः । स त्रयाणां वर्णानां ब्राह्मणराजन्ययोर्वैश्यस्य च । स त्रिभिर्वेदैर्विधीयत ऋग्वेदयजुर्वेदसामवेदैः । ऋग्वेदयजुर्वेदाभ्यां दर्शपूर्णमासौ । यजुर्वेदेनाग्निहोत्रम् । सर्वैरग्निष्टोमः ।

End:

आरम्भविभागाच्च । अर्थायार्थायाग्निं प्रणयत्यपवृत्ते कर्मणि लौकिकस्सम्पद्यते यथा समारूढे ॥ खण्डः ॥ ४ ॥

ओम् । प्रवरान्व्याख्यास्यामः ।

* * * *

Beginning of Hautraka.

पुरस्तात्सामिधेनीनां होता हृदयदेश ऊर्ध्वं प्रादेशं धारयमाणो जपति मयि गृ . . धो नोऽग्निं . . राहवनीयमुत्करश्च प्रतीचीनं गच्छन् जपति.

End:

कर्माणि होतुराम्नातानि भवन्त्युपदेशादितराणि । ४ ॥ १४ ॥ अथातो दर्शपूर्णमासौ उत्तमस्याक्षरस्य । शुष्कं प्रच्छन्नाग्रं वा । अथ चत्वारि । पुरस्तात्सामिधेनीनां होता । अथ शण्डिलानाम् । अथ विश्वामित्राणाम् । अथ कुत्सानाम् । कुत्साग्निवेश्योर्जायनानाम् । अथ वीतहव्याः । प्रवरान्व्याख्यास्यामः । स्वामिनोऽग्नेः । देशे काले मन्त्रान्तैः । यज्ञं व्याख्यास्यामः । यज्ञं प्रवरानथ विश्वामित्राणां पुरस्तात्सामिधेनीनां चत्वारि ॥

No. 1046. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 232. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains the first 6 Praśnas.

Colophon:

इत्यापस्तम्बसूत्रे षष्ठः प्रश्नः ॥

स्वभानौ श्रावणे शुक्ले तृतीयायां स्थिरे दिने ।
आपस्तम्बस्य सूत्रस्य षट् प्रश्ना लिखिता मया ॥

No. 1047. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, 15⅛ × 1¼ inches. Pages, 69. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Contains Praśnas 1 and 2 and the first 12 Khaṇḍas in the 3rd Praśna; breaks off in the 13th Khaṇḍa thereof.

No. 1048. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, 15½ × 1⅜ inches. Pages, 120. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Aruṇakētu kacayanam 61*a*, Mahāvratam 65*a*.

Contains Praśnas 16 and 17 and Paṭalas 10 and 11 of the 22nd Praśna. The colophon at the end of Praśna 16 mentions it as the 15th. These two Praśnas treat about साङ्गः अग्निः and are called Cayana-Praśnas.

The following stanza found at the end gives the date of the MS:—

विक्रमाब्दे शुचौ मास्येकादश्यां सितपक्षके ।
लिख्यते श्येन (चयनमीश्वरार्प)णमस्तु यत् ॥

No. 1049. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, $14\frac{7}{8} \times 1\frac{1}{2}$ inches. Pages, 60. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Sōmayāga-prayōga 31*a*.

Contains the two Praśnas, 16 and 17, called Agnicayana-Praśnas.

No. 1050. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{1}{3}$ inches. Pages, 64. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Begins on fol. 111*a*. The other works herein are Śrauta-prāyaścitta 1*a*, Prāyaścittaśatadvayī 49*a*.

Contains the 7th and the 8th Praśnas, the former breaking off after the 22nd Khaṇḍa.

No. 1051. आपस्तम्बश्रौतसूत्रम्.

APASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 73. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a* and 171*a*. The other works herein are Agniṣṭōmaprayōgaḥ 14*a*, Araṇyādhānam 102*a*, Sautrāmaṇiprayōgaḥ 103*a*, Catuścatvāriṁśatsaṁskāraṇi 107*b*, Āpastambaśrautēṣṭiprayōgaḥ 108*a*, Brahmatvadīpikā 146*a*.

Contains Praśnas 8, 9 and 6 (27*Kh.*)

No. 1052. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, $15\frac{1}{8} \times 1\frac{1}{8}$ inches. Pages, 156. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Fol. 31, 54, and 74 to 76 are lost.

Contains Praśnas 10 to 14, and the first 3 Khaṇḍas of the 8th Praśna. Praśnas 10 to 14 treat of the Agniṣṭōma sacrifice.

No. 1053. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, $17\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 136. Lines, 9 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is Āpastambaprayōgavṛtti 69*a*.

Contains Praśnas 10 to 14, and 16 and 17. The last is, however, incomplete and contains only 26 Khaṇḍas.

No. 1054. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, $14\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 192. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Fol. 77 is lost.

Contains the 15th, the 9th and the 20th (23 Khaṇḍas) Praśnas. The 15th Praśna is wrongly numbered as the 14th.

No. 1055. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 15. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other work herein is Cāyanaprayōgaḥ 10*a*.

Contains the first 16 Khaṇḍas of the 16th Praśna and breaks off in the 17th Khaṇḍa.

No. 1056. आपस्तम्बप्रवरसूत्रम्.

ĀPASTAMBAPRAVARASŪTRAM.

Pages, 7. Lines, 24 on a page.

Begins on fol. 65*a* of the MS. described under No. 199.

Complete.

A part of the 24th Praśna of Āpastambasūtra.

Beginning:

प्रवरान् व्याख्यास्यामः । आर्षेयं वृणीते । बन्धोरेव नैत्यथो सन्तत्या इति विज्ञायते । न देवैर्न मनुष्यैरार्षेयं वृणीत ऋषिभिरेवार्षेयं वृणीत इति ज्ञायते । आर्षेयमन्वा[आ]चष्ट ऋषिणा हि देवाः पुरुषमनुबध्यन्त इति विज्ञायते ।

* * * *

अथासंप्रज्ञातबन्धुराचार्यामुष्यायणमनुप्रब्रवीताचार्यं प्रवरं प्रवृणीताथाह ताण्डिन एकार्षेयं सार्ववर्णिनं समामनन्ति। मानवेति होतामनुवव(द)दित्यध्वर्युर्मानव्यो हि प्रजा इति हि ब्राह्मणमिति हि ब्राह्मणम् ।

जमदग्निश्च वत्सश्च श्रीवत्सव्यासनाह्वयः ।
आम्रवानारसापर्णिजीवन्तीदेवरातगाः ॥

End :

तृतीयां वा चतुर्थीं वा पञ्चमीं पितृमातृतः ।
दक्षिणे तूद्वहेत् कन्यां स्वसारं मातरं विना ॥

Colophon :

प्रवरखण्डः सम्पूर्णः ॥

No. 1057. आपस्तम्बश्रौतसूत्रम्.

ĀPASTAMBAŚRAUTASŪTRAM.

Substance, palm-leaf. Size, 15 × 1¼ inches. Pages, 96. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Contains the 21st and the 19th (fol. 22) Praśnas of the Śrautasūtra.

No. 1058. आपस्तम्बशुल्बसूत्रम्.

ÁPASTAMBAŚULBASŪTRAM.

Substance, palm-leaf. Size, 15½ × 1¼ inches. Pages, 2. Lines, 8 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 17*a*. The other works herein are Āpastambagṛhyasūtram 1*a*, Piṇḍapitṛyajñaḥ 4*a*, Āpastambapūrvaprayōgaḥ 18*a*.

Śūtras 10 to 21 in the first Paṭala.

Beginning :

अथापरो योगः । पृष्ठचन्तयोर्मध्ये च शङ्कं निहत्यार्धे तद्विशेषमभ्यस्य लक्षणं कृत्वार्धमागमयेदन्त्ययोः पाशौ कृत्वा मध्यमे सविशेषं प्रतिमुच्य पूर्वस्मिन्नितरं लक्षणेन दक्षिणमंसमायच्छेत्.

End:

मण्डलं चतुरश्रं चिकीर्षन् विष्कम्भं पञ्चदश भागान् कृत्वा द्वावुद्धरे त्रयोदश ॥

No. 1059. आपस्तम्बपरिभाषासूत्रम्.

ĀPASTAMBAPARIBHĀṢĀSŪTRAM.

Substance, palm-leaf. Size, $11\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 9. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 36*a*. The other work herein is Āpastamba-śrautaprayōga 1*a*.

Complete.

No. 1060. आपस्तम्बश्रौतसूत्रभाष्यम्.

ĀPASTAMBAŚRAUTASŪTRABHĀṢYAM.

Substance, paper. Size, $13\frac{1}{2} \times 8\frac{1}{4}$ inches. Pages, 326. Lines, 28 on a page. Character, Telugu. Condition, good. Appearance, new.

Contains the commentary of Dhūrtasvāmin on the first 13 Praśnas and on 4 Khaṇḍas in the 14th Praśna; the commentary relating to the 5th Khaṇḍa is incomplete.

Beginning.

अथातो दर्शपूर्णमासौ व्याख्यास्यामः । अथोपोद्घातः । यज्ञं व्याख्यास्याम इति परिभाषया यज्ञजातिवचनयज्ञशब्देन एकविंशतिसंस्थस्य यज्ञस्य व्याख्या प्रतिज्ञाता । कथमेकविंशतिसंस्थो यज्ञ इति चेत्? सप्त पाकयज्ञसंस्थाः—औपासनहोमो वैश्वदेवं पार्वणमष्टका मासिश्राद्धं सर्पबलिरीशानबलिरिति । सप्त हविर्यज्ञसंस्थाः—अग्निहोत्रं दर्शपूर्णमासौ आग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणिपिण्डपितृयज्ञादयो दर्विहोमा इति ।

* * * *

विद्यमानत्वात्पूर्वमपि परिसमाप्तत्वं तासां मदन्तीनां पूर्वं विद्यमानत्वाच्च ॥

इति धूर्तस्वामिनो भाष्ये चतुर्दशप्रश्ने चतुर्थः पटलः ॥

End:

शकुनिः पक्षी लोके येषां पक्षिणां शकुनं गृह्णन्ति ते शकुनि(नय) इत्युच्यन्ते नं सर्वे यथा ॥

No. 1061. आपस्तम्बश्रौतसूत्रभाष्यवृत्तिः.

ĀPASTAMBAŚRAUTASŪTRABHĀṢYAVṚTTIḤ.

Substance, paper. Size, 11 × 8¾ inches. Pages, 176. Lines, 20 on a page. Character, Telugu. Condition, good. Appearance, new. Transcribed for the Library in 1893.

Incomplete.

Contains Kauśika-Rama's gloss on Dhūrtasvāmin's commentary on the Āpastambaśrautasūtra.

For notice and extracts *vide* pages 5, and 148 to 150, of the "Report on the search for Sanskrit and Tamil MSS. for the year 1893-94" by M. Seshagiri Sastri.

No. 1062. आपस्तम्बसूत्रवृत्तिः सूत्रदीपिका.

ĀPASTAMBASŪTRAVṚTTIḤ SŪTRADĪPIKĀ.

Substance, palm-leaf. Size, 17 × 1⅝ inches. Pages, 440. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Contains the commentary of Bhaṭṭarudra from the 5th Praśna, 2nd Khaṇḍa, 1st Sūtra, to the 13th Praśna, 20th Khaṇḍa, 13th Sūtra. This begins on fol. 8, wrongly numbered as 4.

The first seven leaves give the commentary on two Paṭalas of the 11th Praśna. This Praśna is numbered 15, according to

Bhaṭṭarudra's commentary, and it is so printed in the Bibliotheca Indica; but Burnell's Catalogue gives it as the 11th.

Beginning:

भूतो ज्योतिष्टोमस्सप्रायश्चित्तो व्याख्यातः। प्रवर्ग्यस्तु तस्याङ्गभूतोऽपि अनारभ्याधीतत्वात् सूत्रकृता प्रकरण . . . . स्वतन्त्रो व्याख्यातः। स इदानीमस्माभिः क्रतुशरीरतयात्यन्तान्तरङ्गत्वात् अत्रैव व्याख्यायते।

प्रवर्ग्यं जुहोति। प्रवर्ग्य इति कर्मनाम। प्रव्रज्यते तप्यतेऽस्मिन् घर्म इति तस्य साधनसमवधानं सम्भरणम्।

* * * *

इति . . . . प्रथमः पटलः॥

द्वितीयः पटलः।

* * * *

सूदे अविद्यमाने कुलीरसुषेराहारयेदिति। मृधो(दो) हिरण्यशकला भवन्ति पञ्च पञ्चाग्नेः। के चित्तु कल्पान्तरदृष्ट्या हिरण्यस्यासंभरत्वं मन्यन्ते तदयुक्तम्; संभारानाह(र)तीति प्रकृत्य हिरण्यमप्युक्त्वा तत ऊर्ध्वं पार्थिवा इति निगमनात्। संभरन्निति मन्त्रलिङ्गाच्च। तस्मादसंभारपक्षे हिरण्यमपि निवर्तत इति पार्थिवाः . संभारा इति शेषः। यदि पञ्च . वति। उदुम्बरं ताम्रम्। पञ्चसंभारपक्षे ताम्रमयानि(णि) लोहशकलानि पञ्चमस्संभारो भवति। तेषां तूष्णीं संभरणम्। अश्वो रूपं वानस्पत्याः। पूर्ववद्योजना।

* * * *

पुनराधेयं प्रत्यादरविशेषार्थमिति वेदितव्यम्॥

अष्टमः पटलः॥ इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ सूत्रदीपिकायां पञ्चमः प्रश्नस्समाप्तः॥

अग्न्याधेयानन्तरमग्निहोत्रं व्याचिख्यासुरधिकारं दर्शयति। अग्निहोत्रं . स्यामः—अग्निहोत्रशब्दः कर्मनामधेयः अग्नेर्होत्रमस्मिन्निति होमेऽग्नि-

देवतासम्बन्धात् । यथोक्तं ब्राह्मणे—स एतत् भागधेयमभ्यजायत, यदग्निहोत्रम्, तस्मादग्निहोत्रमुच्यत इति । क्वचिद्द्रव्यवचनोऽपि । यथा-अधिश्रित्याग्निहोत्रम् । यस्याग्निहोत्रं दुह्यमानमित्यादौ अधिवृ . इति ।

* * * *

यस्मिन्नेवर्तौ निष्पद्यन्ते तस्मिन्नेव यजेतेत्यर्थः ॥

इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ सूत्रदीपिकायां षष्ठः प्रश्नः ॥

सर्वान् . यति । अथ नित्यः पशुरारभ्यते—यस्मिन् कर्मणि यज्ञार्थं पशुर्बध्यते स पशुबन्धः तेनेष्टवान् पशुबन्धयाजी । सर्वान् लोकानभिजयति ।

* * * *

अष्टमः पटलः ॥ इति . . . . सप्तमः प्रश्नस्समाप्तः ॥ नित्यत्वसामान्याद्धविर्यज्ञसामान्याच्चातुर्मास्यानि व्याचष्टे—

* * * *

आपस्तम्बसूत्रवृत्तौ . . . . अष्टमः प्रश्नः ॥ उक्तानि सोमादर्वाङ्नित्यानि कर्माणि यानि[ह] हविर्यज्ञप्रकृतिरा(मा)चख्युराचार्याः ॥

* * * *

नवमः प्रश्नः ॥

उक्ता हविर्यज्ञाः उक्तानि चैषां प्रायश्चित्तानि । अथेदानीं सोम आरभ्यते—सोमोऽपि नित्यः ।

* * * *

इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रदीपिकायां दशमः प्रश्नः ॥

आतिथ्या . प्रतिमन्त्रं तनूनपात्सम्बन्धात्तानूनप्त्रमित्याज्यसमाख्या ॥

* * * *

इति भट्टरुद्रदत्तप्रणीतायामापस्तम्बसूत्रवृत्तौ दीपिकायामेकादशः प्रश्नः ॥

महारा . मृशति । महती रात्रिः महारात्रिः रात्रिशब्देन चरम-त्रिभागो लक्ष्यते ।

* * * *

इति . . . . द्वादशप्रश्नः ॥

अभिषवा . तायते । अभिषवादि महाभिषवादि तस्य . व्याख्यातः ॥

End:

पञ्चमः पटलः । अवभृथस्य . मयति बर्हिराहरणादितन्त्रं प्रक्रमयति । वेदिपक्षे परिस्तरणाद्यवेदिपक्षे नेध्मो भवत्युभयत्र . . . विवृत्तो . योक्रं विवृते विस्रंसयति ॥

No. 1063. आपस्तम्बश्रौतसूत्रवृत्तिः.

ĀPASTAMBAŚRAUTASŪTRAVṚTTIḤ.

Substance, paper. Size, $6\frac{1}{2} \times 8\frac{3}{8}$ inches. Pages, 80. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, new. Copied for the Library in 1895.

Begins on fol. 73*a*. The other works herein are Śāṭhyāyanasūtra 1*a*, Āpastambagṛhyasūtrabhāṣya 9*a*, Sōmahautra 113*a*, and Ādhānaprayōga 189*b*.

The commentary of Bhaṭṭarudra on the Śrautasūtra ; from the 13th Sūtra of the 25th Khaṇḍa of the 12th Praśna to the end of the 13th Praśna The colophon runs as follows:

इति भट्टरुद्रप्रणीतायाम् आपस्तम्बसूत्रवृत्तौ दीपिकायां त्रयोदश प्रश्नः ॥

No. 1064. आपस्तम्बसूत्रवृत्तिः.

ĀPASTAMBASŪTRAVṚTTIḤ.

Substance, palm-leaf. Size, $17 \times 1\frac{3}{8}$ inches. Pages, 226. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

Contains the commentary of Ahōbilasūri, son of Nṛsiṁhayajvan and pupil of Śaṅkarānandatīrtha. The commentator is said to belong to the Samudrāla family, and he refers to the authors of a Bhāṣya, a Vṛtti and a Prayōgavṛitti. The commentary in this MS. extends up to the 4th Paṭala of the 4th Praśna, and concludes with the rules for the performance of the Darśapūrṇamāsa sacrifice.

Beginning :

नृसिंहं मायुतं पूर्णं सच्चिदानन्दविग्रहम् ।
नमामि प्रत्यगात्मानं विधातारं जगद्गुरुम् ॥ (१)
तातं नृसिंहयज्वानं नरकेसरिविग्रहम् ।
शङ्करानन्दतीर्थं च वन्दे ब्रह्मगुरुं तथा ॥ (२)
नृसिंहमन्त्रसामानि गायन्तुष्टो ममाग्रजः ।
यो जयत्यखिले लोके वन्दे मन्त्रगुरुं हृदि ॥ (३)
यत्प्रसादात् सुरगणाः कार्यसिद्धिप्रसाधकाः ।
वेदशाखाग्रवेद्यन्तं वन्दे तीर्थं विनायकम् ॥ (४)
आपस्तम्बमुनिश्रेष्ठं भाष्यवृत्तिकृतावपि ।
प्रयोगवृत्तिकारादीन् नमस्कुर्वे सदा हृदि ॥ (५)
आपस्तम्बीयसूत्रस्य वृत्तिर्भाष्यानुसारिणी ।
कृतये बालबोधाय गृह्णीयुर्वीतमत्सराः ॥ (६)
क्वाल्पबुद्धिरहं क्वार्षं सूत्रं श्रुत्यर्थगोचरम् ।
तथापि चापलात्तूर्णं मन्मुखान्निस्सृताल्पगीः ॥ (७)
भाष्यादयो महाग्रन्थाः सन्ति श्रुत्यर्थगोचराः ।
गूढतात्पर्यतस्तेषां स्फुटा वृत्तिर्विधीयते ॥ (८)

तत्रादौ अधिकारो निर्णीयते । गृहस्थस्याग्न्याधेयादिकर्मस्वधिकारः गृहस्थमधिकृत्य यज्ञो याजनमित्यादिविधानात् । तत्र विदुषस्त्रैवर्णिकस्याधिकारः ।

* * * *

अथातो दर्शपूर्णमासौ व्याख्यास्यामः—अथशब्द आनन्तर्यार्थः। कस्यानन्तर्यम्? यज्ञं व्याख्यास्याम इत्यादियज्ञमात्रसामान्यरूपव्याख्यान-परिभाषानन्तर्यम्; सामर्थ्यात्, परिभाषामन्तरा विशेषरूपोत्तरशास्त्रस्य कर्तुमशक्यत्वात्। ननु यज्ञं व्याख्यास्याम इति परिभाषाया उत्तरत्रे-दानीमध्ययनात् तदानन्तर्यं दर्शपूर्णमासव्याख्यानस्यासङ्गतम्; उच्यते व्याख्यानसौकर्याय भाष्यकारादिभिरग्रे व्याख्यानात्। अन्ते अध्येतृभि-रधीयते तत्प्रणयं नत्वादावेवेति मन्तव्यम्॥

* * * *

Colophon:

श्रीमत्समुद्रालकुलतिलकश्रीमदहोबलभट्टोपाध्यायतनूभवस्य श्रीनृसिं-हयज्वनः पुत्रेणाहोबलसूरिणा विरचितायां याज्ञिकसर्वस्वाख्यायामापस्तम्बी-यसूत्रवृत्तौ तृतीयप्रश्ने षष्ठः पटलः। समाप्तः प्रश्नः॥

End:

पुरुषनियमाश्च ब्रह्मचर्यादयः कर्तव्याः पूर्वस्मिन् पयस्वतीरोषधय इति भोजनं कर्तव्यम्। विष्णुक्रमान् प्राचः क्रामति। प्राङुपेत्य गोमतीं जपति॥ चतुर्थः पटलः॥

इति श्रीमत्समुद्रालकुलतिलकश्रीमदहोबलभट्टमहोपाध्यायतनूभवस्य श्रीमन्नृसिंहयज्वनः पुत्रेण स्वयंप्रकाशयतिदेशिकपरम्पराप्राप्तविशिष्टेष्ट-देवतानुग्रहेण अहोबलसूरिणा विरचितायां याज्ञिकसर्वस्वाख्यायामापस्तम्बी-यसूत्रवृत्तौ साङ्गो दर्शपूर्णमासो निरूपितः॥

No. 1065. आपस्तम्बसूत्रध्वनितार्थकारिका.

ĀPASTAMBASŪTRADHVANITĀRTHAKĀRIKĀ.

Substance, palm-leaf (Śrítāla). Size, $5\frac{3}{4} \times 2\frac{3}{8}$ inches. Pages, 48. Lines, 17 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains 3 Khaṇḍas. The first leaf is numbered as 71, and the succeeding leaves are thereafter serially marked.

Begins on fol. 1*a*. The other work herein is Āpastambaśata-dvayīvyākhyā 25*a*.

This work deals in verse with the rituals of the Sōma sacrifice. The author is Bhāskara Miśra, son of Kumārasvāmin, and bears the title of Trikāṇḍimaṇḍana.

Beginning:

श्रियं वागीश्वरीं देवीं संप्रणम्य विनायकम् ।
गुरुं च सोमयागस्य प्रयोगः प्रवितन्यते ॥
तत्राधिकारकालादि प्रथमं प्रतिपाद्यते ।
सूत्रान्तरमतं वक्ष्ये सोपयोगं क्वचित् क्वचित् ॥
प्रसङ्गादग्निहोत्रेष्टिपश्वाधानोपयोगि यत् ।
तत्रापि लेशतः किंचित् प्रवक्ष्ये तत्र तत्र च ॥
अधिकारास्त्रिधा नित्यकाम्यनैमित्तिकत्वतः ।
ते च श्रुतार्थवादेच्छाकल्पत्वेन त्रिधा पुनः ॥
आधानं नित्यमेवेष्टं पितृयज्ञोऽपि तादृशः ।
कैश्चिन्मीमांसकैः काम्य(ः)पितृयज्ञो निरूपितः ॥
पितृयज्ञस्य चाङ्गत्वमापस्तम्बेन दूषितम् ।
साधितं च भरद्वाजसूत्रभाष्यकृता श्रुतेः ॥

* * * *

इति श्रीविद्यामदमत्ततत्तद्वादीन्द्रमतङ्गजविदारणैकपञ्चाननस्य श्रीकुमारस्वामिसुतत्रिकाण्डमण्डनभास्करमिश्रसोमयाजिनः कृतावापस्तम्बसूत्रध्वनितार्थकारिकासु सोमयागोपोद्घाते अधिकारनिरूपणम् ॥

* * * *

इति श्रीकुमारस्वामिसूरिसुतत्रिकाण्डिमण्डनभास्करमिश्रसोमयाजिकृतावापस्तम्बसूत्रध्वनितार्थकारिकासु प्रतिनिधिनिरूपणं द्वितीयं काण्डम् ॥

End :

निरूपितं विशेषेणान्यत् ग्रन्थान्तरे भवेत्।
त्रिकाण्डिमण्डनमिति कर्तृद्वाराभिधानधीः ॥

इति श्रीपदवाक्यप्रमाणज्ञश्रीकुमारस्वामिसुतत्रिकाण्डिमण्डनभास्करमिश्रसोमयाजिकृतायामापस्तम्बसूत्रध्वनितार्थकारिकायां पुनराधानप्रकरणं तृतीयकाण्डम् ॥

No. 1066. आपस्तम्बश्रौतसूत्रव्याख्यानम्.

ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀNAM.

Substance, paper. Size, 12½ × 7⅞ inches. Pages, 89. Lines, 19 on a page. Character, Telugu. Condition, fair. Appearance, old.

Begins on fol. 68*a*. The other works herein are Agniṣṭōma-prayōga 1*a*, Āpastambaśrautasūtravyākhyā 111*a*.

Contains the commentary on the two Praśnas, 16th and 17th: and gives also the Telugu meanings of certain technical words in the Śrautasūtra. The commentary breaks off in the 23rd Khaṇḍa of the 17th Praśna.

Beginning :

अग्निं चेष्यमाणोऽमावास्यायां पौर्णमास्यामेकाष्टकायां वोखाꣳसंभरति । त्र्यहादिदीक्षापक्ष उखासंभरण[ादि]प्रभृत्यामिक्षापर्यन्तकर्माणि वसन्ते,यदा(था) भविष्यति, पर्वण्युखासंभरणपक्ष एकाष्टकायां चेत्तस्यामुखासंभरणं कृत्वा पश्चिष्टादि सर्वं वसन्ते, चतुरो मासा इत्यस्मिन् पक्षे एकाष्टकायां न लभ्यते सर्वꣳसंभरणं मासादिकल्पेषु वसन्ते । सर्वमेव संभरणं पशुश्चैवं स्मृत्यारम्भः ।

End :

अग्ने देवाꣳ इहावः =ईड्यः । आग्नेय्या गायत्री प्रथमां चितिमुपधाया[म]भिमृशति । तत आपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचरन्ति ।

सुब्रह्मण्यान्ते श्वेतमश्वं परिणयन्ति । रात्रौ चतुस्तनव्रतं प्रतिगृह्य । अन्नपते । देवस्य त्वा । रात्रिमिष्टकां या ते अग्ने रुद्रीया शिवाः पीता भवथ । रात्रौ जागरणं श्वेतमश्वं परिणीय वसन्ति वसन्ति ॥

Beginning of the 17th Praśna.

श्वो भूते पौर्वाह्णिकीभ्यां प्रचर्य द्वितीयां चितिं चिनोति । श्वो भूते विसृष्टवाचि यजमाने प्रवर्ग्योपसद्भ्यां प्रचर्य । या ते अग्नेऽयाशया तनूरित्युपसदाहुतिः षड्डुपसदो व्यहमेकैकेनोपसन्मन्त्रेण जुहोतीति वचनात् । सुब्रह्मण्यान्ते दक्षिणतः श्वेतोऽश्वस्तिष्ठति तमालभ्य वाङ्म आसन् मा मा हिꣳसीः । आरोहं जपति ।

End:

उप त्वाग्ने दिवे दिवे । सचस्वा नः स्वस्तये तिसृभिरन्येषां यजमानानां चित्याग्निं दृष्ट्वा उपतिष्ठते । इदमू नु श्रेयः । अध्यवसाय मथित्वोपावरोह्यायतने निधायाहवनीयं प्रणीय पूर्णाहुतिः । इदं विष्णुः । अथ सायमग्निहोत्रं काले प्रातर्होमस्सन्तिष्ठतेऽग्निः । अग्निं चित्वानन्तरे पर्वणि सौत्रामण्या यजेत । अपरेद्युर्मैत्रावरुण्या चामिक्षायाः ।

मन्त्रोपधानमध्ये तु प्रस्थारे(स्तारो) वक्ष्यतेऽधुना ।
आक्रमण्याद्यमध्यं(स्)यादष्टम्याद्या तु मण्डला ॥
पञ्चमी तु द्वितीया स्यात्तृतीयस्यां चतुर्थिका ।
अन्वारोहे तु दूर्वादिहिरण्योप्त्वा तु वामभृत् ॥

* * * *

द्वे चैव षडभिज्ञेयाः क्षत्रं पाहि गणस्ततः ।
दक्षिणे दशपक्षाख्या विश्वेषु व्यादितो गणाः ॥
अष्टौ पक्षेष्टकास्तिस्रः पक्षमध्याश्च दक्षिणाः ।
एकादशेष्टकास्स्वर्जिदन्तरे पक्ष उच्यते ॥

द्वे पक्षाप्ययुगे पञ्चपक्षसंज्ञास्सपन्नहः ।
तत्रैवैकादशाब्धि वै ते समुग्याः पराः क्रमात् ॥

Colophon:

चयनप्रश्नस्समाप्तः ॥

No. 1067. आपस्तम्बश्रौतसूत्रव्याख्या.

ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Substance, paper. Size, 12½ × 7⅞ inches. Pages, 37. Lines, 27 on a page. Character, Telugu. Condition, good. Appearance, new. Begins on fol. 46*a*.

The other works herein are: Agniṣṭōmaprayōgaḥ 1*a*, Brahmamēdhaprayōgaḥ 70*a*, Sūryasōmōparāgavidhānam 94*a*, Ādhānaprayōgaḥ 95*b*, Darśapūrṇamāsaprayōgaḥ 10*a*, Paśubandhaprayōgaḥ 143*a*

Contains the commentary on the 17th Praśna. It breaks off in the course of the 23rd Khaṇḍa. This is more orless a copy of the corresponding portion of the MS. described under the last No.

Beginning:

श्वो भूते पौर्वाह्णिकीभ्यां प्रचर्य द्वितीयां चितिं चिनोति । श्वो भूते विसृष्टवाचि यजमाने प्रवर्ग्योपसद्भ्यां प्रचर्य या ते अग्नेऽयाशया तनूरित्युपसदाहुतिः षड्डुपसदो ह्यहमेकैकेनोपसन्मन्त्रेण जुहोतीति वचनात् । सुब्रह्मण्यान्ते दक्षिणतः श्वेतोऽश्वस्तिष्ठति, तमालभ्य वाङ्म आसन् मा मा हिंसीः ।

End:

आध्यायमग्रतः पञ्च ततो दक्ष्यन्नृषीष्टकाः ।
आध्यायमादितः पञ्च चैकैकश्चोत्तरा मता ॥
तस्यामेव नवम्यादिसप्तपादास्त्वनन्तराः ।
द्वितीयोत्तरगास्तिस्रो द्वे तृतीयान्त्यगे अपि ॥

चतुर्थ्यन्तगतौ पादा षट् सनीः परिकीर्तिताः ।
दक्षपक्षाप्ययस्थास्तु चतस्रः पक्षसंज्ञिके ॥
द्वे चैव षडभिज्ञेयाः क्षत्रं पाहि गणस्ततः ।

No. **1068.** आपस्तम्बश्रौतसूत्रव्याख्या.

ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Pages, 62. Lines, 14 on a page.

Begins on fol. 1*a* of the MS. described under No. 6.

Incomplete

Contains the commentary on the 17th Praśna, and is like the MS. described under No. 1067.

Beginning: Same as in the above work.

End:

उत्तराꣳश्रोणीम्—वनसदे वट् । दक्षिणाम्—बर्हिष्म (षदे) वट् । उत्तरमꣳसम्—सुवर्विदे वट् । मध्यम्—पञ्चभिरुत्तरवेदिवदाग्निꣳस्वयमातृणां (ण्णां)वा व्याघारयति । सर्वत्राग्नय इदं न स्वाहाकारः

ये देवा देवानां यज्ञ(ज्ञि) . . . अधि स्नुषु ॥

No. **1069.** आपस्तम्बश्रौतसूत्रप्रयोगवृत्तिः.

ĀPASTAMBAŚRAUTASŪTRAPRAYŌGAVṚTTIḤ.

Pages, 14. Lines, 8 on a page.

Begins on fol. 69*a* of the MS. described under No. 1053.

Contains the commentary on the 2nd Praśna; by Tālavṛnta-nivāsin.

As this MS. is much injured, the colophon only is given here.

. . . योगवृत्त्यां तालवृन्तनिवासिकृतायां प्रदीपिकायां द्विषाहस्त्रिषाहस्रप्रयोगस्समाप्तः ॥

No. 1070. आपस्तम्बश्रौतसूत्रव्याख्या.

ĀPASTAMBAŚRAUTASŪTRAVYĀKHYĀ.

Pages, 94. Lines, 18 on a page.

Begins on fol. 111*a* of the MS. described under No. 1066.

Contains the commentary, said to be by Āṇḍapilla, known also as Tālavṛntanivāsin, on Praśnas 10 to 12 of the Āpastamba-śrautasūtra.

Beginning:

अथ सोमप्रयोग उच्यते—सोम ओषधिविकारः तत्साधनत्वात् कर्मनामधेयं तेन यक्ष्यमाणः यस्य सोमेन यक्ष्यमाणस्य पिता पितामहो वा उभौ यजेत(?)। के चिदन्यतरविच्छेदे नैन्द्राग्न इति। के चित् पितृविच्छदे ऐन्द्राग्नः पितामहविच्छेदे नैतत्.

* * * *

इति सोमपञ्चके प्रथमप्रश्नः समाप्तः ॥

* * * *

इति सोमपञ्चके द्वितीयप्रश्नः समाप्तः ॥

End:

पञ्चदोहनानां भिन्नाकरणं लौकिकेऽग्नौ श्रपणम् अपूर्वत्वात् एतानि प्रज्ञातानि निदधाति। अत्र सवनीयस्य पशोः सवनीयानां पुरोडाशानां साधारणं न वा बर्हिः प्रस्तरमित्यत्र पक्षे तथा वैशेषि ॥

आन्ध्र(ण्ड)पिल्लासप्तमपटलः

Colophon:

तृतीयप्रश्नः समाप्तः ॥

No. 1071. आपस्तम्बप्रयोगप्रदीपिका.

ĀPASTAMBAPRAYŌGAPADĪPIKĀ.

Substance, paper. Size, $13\frac{1}{4} \times 8\frac{1}{4}$ inches. Pages, 214. Lines, 20 on a page. Character, Grantha. Condition, good. Appearance, new.

Contains the commentary of Tālavṛntanivāsin on the first 8 Praśnas. It opens in the 3rd Paṭala of the I Praśna and breaks off in the 4th Paṭala of the VIII Praśna.

Beginning :

पिण्डपितृयज्ञस्य कर्म—यस्मिन्नहनि चन्द्रमा न दृश्यते तस्मिन्नहन्य पराह्णे प्राचीनावीती प्रथमे प्रयोगे पिण्डपितृयज्ञमारप्स्ये, तेन मासि मासि यक्ष्ये। पिण्डपितृयज्ञेन यक्ष्ये इति के चित्। पिण्डपितृयज्ञेन सर्वदा यक्ष्य इति। एतदेव प्रथमे च। विद्युदसि। दृष्टचन्द्रायां प्रतिपद्यपराह्णे दक्षिणाग्निमेव (अ)ध्वर्युः प्राचीनावीती अपां मेध्यं यज्ञियमिति सकृदाच्छिन्नं बर्हिराहरति।

* * * *

इति तृतीयः पटलः॥

अमावास्यायां रात्र्यां स्वविधानादेधोदकादीनपि स्वयमेवाहृत्य यवाग्वाग्निहोत्रं जुहोति सन्नयन्। असन्नयतो यवागूनियमं स्थालीगतस्य शेषस्य निधानं सायमग्निहोत्रे हुतेऽग्नीनां परिस्तरणं न सभ्यावसक्थ्य(थ्य)योरित्युपदेशः।

* * * *

इति . . . .अष्टमः पटलः.

एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका॥
प्रथमः प्रश्नः समाप्तः॥

वेदिकरणम्—पूर्वेद्युरमावास्यायां वेदिं कृत्वा प्रशातनमपि कृत्वा देवस्य त्वेत्यादि ब्रह्मन्नुत्तरमित्यन्तः(न्तं) पूर्वं कुर्यात्। अत्र मन्त्रेण स्फ्यमादायाभिमन्त्र्य संमृश्य ब्रह्मन्नुत्तरमिति संप्रेषः। पौर्णमास्यान्तु यथाक्रममेव देवस्य त्वा आ दद इति स्फ्यमादत्ते॥

* * * *

यूपस्योपस्थितिं कृत्वा यज्ञ शं चादि के चन ॥
इष्टेर्विधे पुरोडाशे प्रणीतापूर्णकद्वयम् ।
विष्णोश्च क्रमणं कृत्वा विष्ण्वतिक्रमणाति(दि) च ॥
एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

पशुबन्धस्समाप्तः ॥

अथ पशोर्हौत्रमुच्यते भाष्यकारेण वर्णितम् । पश्विष्टेरग्नाविष्णू देवता अग्नाविष्णू इति द्वे उपदेशादितराणीति भाष्यकारवचनात् । पश्चाद्दार्शपौर्णमासिकाया वेदेरुपविश्य निरसनोपवेशने कृत्वा यजुर्वेद-विहितमार्गेण अग्नये प्रणीयमानायेत्युक्ते प्र देवं देव्या धियेति सप्रणवामुप त्रिराह ।

* * * *

चातुर्मास्यानां प्रयोगः ॥

चातुर्मास्यानीति समुदायनाम । यस्मिन् संवत्सरे अधिकमासो नास्ति तस्मिन् संवत्सरे नि . . . यस्मिन् संवत्सरेऽपराह्णे पर्वचतुष्टयस्य सन्धिस्तस्मिन् संवत्सरे याग इति के चित् । फाल्गुन्यां पौर्णमास्यां चैत्र्यां वा वैश्वदेवेन यजेत । तयोः पूर्वस्यां चतुर्दश्यां प्रातरग्निहोत्रं हुत्वा प्राणानायम्य सङ्कल्पः—चातुर्मास्यैर्यक्ष्ये अक्षय्यं मे सुकृतं स्यादिति.

End :

केचित् संसृष्टे मुख्य इति वचनादुभयत्र सान्नाय्यवदेव मरुतामहं जेमा-नमिन्द्रियावी वरुणस्याहं जेमानमिन्द्रियावी वा उभयत्र अथैककपालेन प्रचरति उद्धृत्य बर्हिषमित्यादिकयानुब्रूहि कं यज.

No. 1072. आपस्तम्बश्रौतप्रयोगप्रदीपिका.

ĀPASTAMBAŚRAUTAPRAYŌGAPRADĪPIKĀ.

Substance, palm-leaf. Size, 15⅜ × 1¼ inches. Pages, 294. Lines, 8 on a page. Character, Grantha. Condition, much injured. Appearance, old.

This is the original MS. from which the MS. described under the last number has been copied. As it is much injured no extract is given therefrom. The first leaf is lost and the next four leaves are very much injured.

No. 1073. आपस्तम्बसूत्रप्रयोगवृत्तिः.

ĀPASTAMBASŪTRAPRAYŌGAVṚTTIḤ.

Substance, palm-leaf. Size, 16½ × 1⅜ inches. Pages, 366. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Contains the commentary of Tālavṛntanivāsin, also known as Āṇḍapiḷḷa, on the Śrautasūtra from the I Praśna; but breaks off in the Sōmapraśna, *i.e.*, the 10th Praśna.

Beginning:

गङ्गाप्रवाहपरिपूतजटाकलापः
क्रीडाफणीन्द्रचकितेन्दुमणिप्रभाभिः ।
प्रज्वालितस्फुरिततक्षकहार . . .
. . . ठहरं नमामि ॥

आपस्तम्बीयसूत्रस्य धूर्तस्वामिव्याख्यानुसारेण शास्त्रान्तरसिद्धानपेक्षितानविरुद्धानप्युपसं . . . . अग्निचयनपर्यन्तानां कर्मणां प्रयोगवृत्तिः क्रियते । सोमान्तानि नित्यान्यफलार्थिनापि कर्तव्यानि . . . . . स्तुतमिति वसिष्ठवचनात् । सर्वाङ्गोपसंहारस्यासमर्थस्यापि कर्तव्यानि अन्धपङ्ग्वादीनां निवृत्तिरेव । के चि . . .

यस्य कृतदारस्य कर्तव्यानि अनधीतस्यापि साधोर्दर्शपूर्णमासशब्दौ कालविशेषयोर्वचनौ तयोः कालविशे . . . . यत्ते लक्षणया कर्माणि वृत्तिकाले मुख्यः कर्माणि लक्षणेति सूत्रकाराणाम्मतम् ।

* * * *

एषा त्रैविद्यवृद्धेन तालवृन्तनिवासिना ।
सोमपेन कृता वृत्तिः प्रयोगस्य प्रदीपिका ॥

Colophon:

इत्यापस्तम्बसूत्रप्रयोगवृत्त्यां तालवृन्तनिवासिकृतायां पशुबन्धप्रयोगः समाप्तः ॥

* * * *

इत्यापस्तम्बसूत्रस्य प्रयोगवृत्त्यां तालवृन्तनिवासिकृतायां चातुर्मास्यानि समाप्तानि ॥

अथ प्रायश्चित्तान्युच्यन्ते

* * * *

अथ सोमप्रयोग उच्यते

End:

यदि सोमपूर्वाधानं तत्राधानस्य न नक्षत्रादिनियमः । सोमेन यष्टुकामो महारात्रे मध्वेत्यादि सा यावद्वातेष्टिरिति अस्यार्वाक् सर्वकालो यथा तथा ॥

No. **1074.** आपस्तम्बप्रवरसूत्रभाष्यम्.

ĀPASTAMBAPRAVARASŪTRABHĀṢYAM.

Substance, paper. Size, 6⅜ × 4 inches. Pages, 40. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new. Purchased in 1894.

Begins on fol. 1*a*. The codex contains also Kapardikārikā fol. 22*a*.

Refer to pages 4, 5, 147 and 148 of M. Seshagiri Śastri's Report for the year 1893–94, No. 2, for comments and extracts.

No. **1075.** आपस्तम्बपरिभाषासूत्रव्याख्या.

ĀPASTAMBAPARIBHĀṢĀSŪTRAVYĀKHYĀ.

Pages, 50. Lines, 7 on a page.

Begins on fol. 170*a* of the MS. described under No. 23.

Complete.

The Paribhāṣāprakaraṇa is a portion of the 24th Praśna of the Āpastambakalpasūtra, the other parts dealing with Pravara and Hautraka. The commentary is by Haradattācārya.

Beginning:

यज्ञं व्याख्यास्याम इति । अत्रायमारम्भहोमः । नित्ययज्ञक्रिया-(वा)न् पुरुषः श्रियाभिव्यनक्ति । तस्यैवाक्रिया प्रत्यवायं संपादयति । ऋण-कृते अक्रियायाश्च प्रायश्चित्तविधानात् । ये चान्ये आश्रमा ऊर्द्ध्वरेतसां ते च नित्यश्रुतिविरोधा[ना]दनधिकृतार्थपरत्वादिविषयतया व्याख्येयाः । एवम-नुष्ठेयो यज्ञं(ज्ञः) श्रुत्यर्थस्यासर्वज्ञागम्यत्वेन शाखान्तरविध्युपसंहाराशक्तेश्च व्याख्यानतोऽनुष्ठातुं न शक्यत इति करुणाविष्टहृदयतया धर्मकथनाय गत-श्रेयोऽर्थितया च यज्ञं व्याचिकीर्षन्नाचार्यः प्रतिजानीते यज्ञं व्याख्या-स्याम इति । यज्ञं वि आख्यास्यामः देवतां प्रति स्वद्रव्यस्योत्सर्जनं यज्ञः, यज्ञ इत्येकविंशतिसंस्थो यज्ञजात्यभिमानेन व्यपदिश्यते । सप्त सोमसंस्थाः, सप्त हविर्यज्ञसंस्थाः, सप्त पाकयज्ञसंस्था इति । अग्निष्टोमोऽ-त्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्यामं इति सप्त सोम-संस्थाः । अग्निहोत्रं दर्शपूर्णमासावाग्रयणं पिण्डपितृयज्ञश्चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः । औपासनहोमो वैश्वदेवं पार्वणमष्टका मासिश्राद्धं सर्पबलिरीशानबलिरिति सप्त पाकयज्ञ-

संस्थाः। वि-आ-इत्येतावुपसर्गौ क्रियाशब्दमर्थान्तरे वर्तमानमभिद्योतयति (त): यथा प्रतिष्ठि(ष्ठ)त इति तामेव क्रियां विशेषयतः(ति) ।

End:

यज्ञार्थस्य त्र्यम्बकहोमार्थस्येति एवमादि तत्र तत्र द्रष्टव्यम् । यत्र प्रणीतस्याग्नेः कर्मचोदनात् तत्र प्रवृत्तेऽपि कर्माणि न लौकिको भवति यथा पर्यग्निकरणार्थस्याग्नेः प्रत्यपिसृज्योल्मुकमिति तस्य प्रतिनयनं कर्तव्यम् ॥

Colophon:

इत्यापस्तम्बपरिभाषाव्याख्या समाप्ता ॥

हरदत्तविरचितेयं व्याख्या ॥

No. 1076. आपस्तम्बपरिभाषासूत्रव्याख्या.

ĀPASTAMBAPARIBHĀṢĀSŪTRAVYĀKHYĀ.

Substance, palm-leaf. Size, $16\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 64. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, new.

Begins on fol. 1*a*. The other work herein is Cayanānukramaṇikā 33*a*.

Complete. Same as the last.

The colophon in the MS. runs as follows:

इति हरदत्तकृतापस्तम्बपरिभाषाव्याख्या समाप्ता ॥

No. 1077. प्रायश्चित्तशतद्वयी सव्याख्या.

PRĀYAŚCITTAŚATADVAYĪ WITH COMMENTARY.

Pages, 108. Lines, 17 on a page.

Begins on fol. 25*a* of the MS. described under No. 1065.

Contains 3 Prakaraṇas in full, and only 40 verses in the 4th Prakaraṇa.

This is a work with commentary in 2 centums of verses treating of the expiatory rites connected with Śrauta sacrifices as given in Āpastamba-Śrautasūtra. The commentary is by Vēṅkatēśa of Vatsa-Gōtra.

Beginning :

आपस्तम्बमुनिं नत्वा प्रायश्चित्तशतद्वयीम् ।
मन्दानां सुखबोधाय व्याकरिष्ये यथामति ॥

तत्र तावत् प्रारिप्सितस्य ग्रन्थस्य विषयप्रयोजनादिकं दर्शयति—

नैमित्तिकेषु श्रुतिलक्षणेषु सूत्रे यदस्पष्टमिवाल्पबुद्धेः ।
तद्भाष्यवृत्त्याद्यनुसृत्य सम्यक् स्वरूपबोधाय विविच्यते तत् ॥

हविर्यज्ञप्रायश्चित्तेषु सोमप्रायश्चित्तेषु च मन्दबुद्धीनां सूत्रे यदस्पष्टमिव प्रतीयते तदेव प्रायश्चित्तं तेषां स्पष्टावबोधार्थं स्वरूपतो विषयतश्च विविच्य प्रदर्श्यते । यद्यपि सूत्रेऽस्पष्टं व्याख्याने स्पष्टं भवति तथापि भाष्ये वृत्तौ प्रयोगवृत्तौ च व्याकीर्णतया दुर्ज्ञेयस्य प्रायश्चित्तस्य भाष्याद्यनुसृत्य क्रमेणैकत्र समू(मु)ह्य प्रतिपादने मन्दबुद्धीनां सुखावबोधो भवतीति तदर्थोऽयमारम्भ इत्यर्थः । (।) इदानीं श्रुतिलक्षणं प्रायश्चित्तमित्यादिपरिभाषासूत्रार्थं दर्शयति—

श्रुत्युक्तकर्मण्यकृतेऽन्यथा वा कृतस्य चित्तं श्रुतिलक्षणं स्यात् ।
पुंसोऽपराधे स्मृतिलक्षणञ्च निमित्तसंख्यादि विवक्ष्यते नः ॥

श्रुत्या यत् कर्मावश्यकतया यथा विधीयते तस्मिन्ननुष्ठिते अन्यथा वानुष्ठिते सति . . . . श्रुतिविहितमेव प्रायश्चित्तं कर्तव्यं न पुनस्स्मृतिलक्षणमपि श्रुतिप्रत्यये हि कर्मणि श्रेषे सति तत्समाधानेनापि श्रुतिप्रत्ययेनैव भवितव्यम् ।

* * * *

इति श्रीवत्सकुलभूषणश्रीवेङ्कटेशवाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने प्रायश्चित्तनिरूपणं नाम प्रथमं प्रकरणम् ।

इति प्रायश्चित्तशतद्वयीव्याख्याने हविर्दोषप्रायश्चित्तनिरूपणं नाम द्वितीयं प्रकरणम् ।

इति प्रायश्चित्तशतद्वयीव्याख्याने तृतीयं प्रकरणम् ।

End:

विधीयते ब्रह्मण एव तत्तत् श्रेषोदितव्याहि(हृ)तिचिन्तनं यत् ।
पूर्वोक्तहोमेन विकल्प्यते तत् सोमेन पश्चिष्टिषु तत् प्रवृत्तिः ॥ ४० ॥

ऋग्वेदाद्युक्तकर्मश्रेषे ब्रह्मणो भूरादिव्याहृतिध्यानमुक्तम् . . . . . चातुर्मास्येषु हविर्यज्ञप्रायश्चित्तप्रकरणे अनुक्तत्वादिति भावः ॥

No. 1078. प्रायश्चित्तशतद्वयी सव्याख्या.

PRĀYAŚCITTAŚATADVAYĪ WITH COMMENTARY.

Substance, paper. Size, 13⅜ × 8¼ inches. Pages, 112. Lines, 22 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is Khādiragṛhyasūtra with commentary 57*a*. Prakaraṇa I contains 46, II contains 60, III contains 59 and IV contains 42 stanzas altogether.

Contains 4 Prakaraṇas.

Same as the last.

Colophon:

इति वत्सकुलभूषणस्य ग्रामैकदेश(वेङ्कटेश)वाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने अग्न्यनुगमादिप्रायश्चित्तनिरूपणं नाम प्रथमप्रकरणम् ॥

* * * *

इति वत्सकुलभूषणस्य श्रीवेङ्कटवाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने हविर्दोषप्रायश्चित्तनिरूपणं नाम द्वितीयं प्रकरणम् ॥

* * * *

इति वत्सकुलभूषणस्य श्रीवेङ्कटेशवाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने तृतीयप्रकरणम् ॥

End:

अनुक्तमत्राप्यपरिस्फुटं यत्तद्भाष्यवृत्त्यादिषु बोधनीयम् ।
तत्राप्यनुक्तं तु तदुक्तरीत्या यथानिमित्तं स्वयमूहनीयम् ॥

न तावदासिन् सङ्ग्रहे सर्वाणि प्रायश्चित्तानि साकल्ये(न) प्रतिपादयितुं शक्यन्ते विस्तरप्रसङ्गात् । अतोऽनुक्तमस्पष्टं वा भाष्यवृत्तौ प्रयोगवृत्तौ वा द्रष्टव्यम् । तत्रापि सर्वं नैमित्तिकं वक्तुं शक्यं प्रमादादिदोषवशान्नानाविधस्खलनसम्भवात् । अतस्तत्राप्यनुक्तं सूत्रभाष्याद्युक्तन्यायानुसारेण तत्तन्निमित्तानुसरणं स्वयमेवोहनीयमिति सिद्धम् ॥

इति वत्सकुलभूषणश्रीवेङ्कटेशवाजपेययाजिनः कृतौ प्रायश्चित्तशतद्वयीव्याख्याने चतुर्थप्रकरणम् ॥

Colophon:

शतद्वयीव्याख्यानं समाप्तम्.

No. 1079. आपस्तम्बश्रौतप्रायश्चित्तशतद्वयीव्याख्यानम्.

ĀPASTAMBAŚRAUTAPRĀYAŚCITTAŚATADVAYĪVYĀKHYĀNAM.

Pages, 126. Lines, 7 on a page.

Begins on fol. 49*a* of the MS. described under No. 1050.

Contains the commentary on 203 stanzas. One more stanza is wanting.

Same as the last, except that the last stanza is incomplete.

No. 1080. प्रायश्चित्तशतद्वयी.

PRĀYAŚCITTAŚATADVAYĪ.

Pages, 45. Lines, 17 on a page.

Begins on fol. 127*b* of the MS. described under No. 237.

Contains 5 Paṭalas.

This work is said to have been written by Bhāskara. He has added a commentary to it which is described under the next number. This work is different from another work of the same name described under No. 1077, though similar to it in subject matter.

Beginning:

यस्य श्रुतौ लक्षणमात्रमेव
चित्तस्य दिष्टं श्रुतिलक्षणन्तत् ।
अथो निमित्तेन विवक्षितं स्यात्
विशेषणं क्षामहविर्गतैक्यम् ॥

नीत(ते)न्तराग्नि अ(ग्राव)पि नैव चित्तं
तथैव यष्टुस्स(स्व)गृहप्रयाणे ।
ब्रह्मौदनाग्नेः पचनात्पुरस्तात्
औपासनस्यैव विधिर्विनाशे ॥

End:

यस्मिन्नस्मिन् होमजातस्तथाग्ने-
र्गच्छेद्धूमो दक्षिणावृत्य कृष्णः ।
वातो धूमं चालयेद्वा स सव्यं
प्रायश्चित्तं व्याहृतीभिस्समस्य ॥

स्मार्ते श्रेषे सर्ववेदार्तिजे वा
सैवाम्नाता ब्राह्मणे ब्रह्मणश्च ।
वृत्तिं जन्मगुरोर्निरीक्ष्य रुचिरामार्यात्मजो भास्करो
धूर्तस्वामिमतञ्च लोकमहितं कल्पान्तराणामपि ।
श्लोकानां द्विशतं व्यधत्त महिमा(तः) श्लोकैरनेकैश्शुभं
प्रायश्चित्तसमुच्चयं बुधजनैस्सम्पूज्यमानैरसदा ॥

Colophon:

इति पञ्चमः पटलः ॥

No. 1081. प्रायश्चित्तशतद्वयीव्याख्या—प्रयोगप्रदीपिका.

PRĀYAŚCITTAŚATADVAYĪVYĀKHYĀ: PRAYŌGA-PRADĪPIKĀ.

Pages, 134. Lines, 18 on a page.

Begins on fol. 151*a* of the MS. described under No. 237.

Contains the commentary by Bhāskara on 4 Paṭalas.

Fol. 150 contains certain extracts from Smṛtis about the marriage of the younger brother before the elder is married.

Beginning:

यस्य श्रुति(श्रुतौ) लक्षणमात्रमेव
चित्तस्य दिष्टं श्रुतिलक्षणं तत् ।
अथो निमित्तेन विवक्षितं स्यात्
विशेषणं क्षाम[म]हविर्गतैक्यम् ॥

पूर्वेण . . . . प्रायश्चित्तं प्रपाठकः ।
शतद्वयीनां(स्थ)श्लोकानां धूर्तस्वाम्यनुसारतः ॥
तान् कृत्वा मनसि श्लोकान् तदर्थमनुसंवदन् ।
करोमि सुखबोधाय प्रायश्चित्तप्रदीपिकाम् ॥

यस्य श्रुतौ लक्षणमात्रमित्यस्य श्लोकस्य तत्र प्रथमं भाष्यकारेण श्रुतिलक्षणं प्रायश्चित्तं विध्यपराधे विधीयत इत्येतावान् ग्रन्थसूत्रद्वयात्मना व्याख्यातः । अनन्तरमेकसूत्रं, तथा च प्रयोजनवशादेकसूत्रतया च प्रयोजनवशात्सूत्रद्वयात्मना कृतव्याख्यानस्यायमर्थः । श्रुतिलक्षणं प्रायश्चित्तमित्येकसूत्रम्; तस्यार्थः । यस्य पुरोडाशः क्षामवति यदेकदेवत्य आलब्धो भूयान् भवति.

End:

तस्यां हिरण्यं निधाय इदं विष्णुरिति पृषदाज्यग्रहणादिसाधनान्तं पूर्ववत् । अत्राप्यङ्गान्तरस्पर्शे व्यापन्नम् अप्सु प्रक्षिप्त्वा स्रुचं त्यक्त्वा अन्यस्यां स्रुचि महीनां पय इति आज्यावदानं कर्म समापयेत् ॥

Colophon :

इति श्रीस्मृतिविषये आहिताग्निहोत्रप्रायश्चित्तानि ॥

इति चतुर्थः पटलः ॥

No. 1082. आपस्तम्बश्रौतप्रायश्चित्तम्.

ĀPASTAMBAŚRAUTAPRĀYAŚCITTAM.

Pages, 94. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 1050.

This work seems to be by Kēśava, and it treats of the expiatory rites connected with the Śrauta sacrifices.

Beginning :

अग्निहोत्रेष्टिपशुसोमेषु प्रायश्चित्तान्युच्यन्ते—तत्र प्रथममग्न्यनुगतप्र- . . . . . पूर्वमाहवनीयानुगमने लौकिकारणिमाहृत्य आहवनीयं भस्मना संस्पृश्य.

End:

यदि घर्मधुग्दोहकाले नागच्छेत् गङ्ग एहीत्याहूतायां यदि घर्मधुङ्नागच्छेत् अन्यां तल्लक्षणामाहूय दुग्ध्वा प्रव्रज्यात् । तामृत्विग्भ्योऽन्यस्मै सुत्यायान्दद्यात् । अनुवाकौ व्याहृतयश्च एवमजाया उपदेशो गव्येव प्रायश्चित्तमिति । यदि घर्मदुघि पयो न स्यादित्यादिप्रायश्चित्तानि सूत्र एव द्रष्टव्यानि ॥

Colophon :

प्रायश्चित्तानि समाप्तानि ॥ केशवीयं समाप्तम् ॥

No. 1083. आपस्तम्बश्रौतप्रायश्चित्तम्.

ĀPASTAMBAŚRAUTAPRĀYAŚCITTAM.

Substance, palm-leaf Size, 14¾ × 1¾ inches. Pages, 63. Lines, 8 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Vaśyaprayōgaḥ 32*b*, Nityāṣōḍaśikātantram 37*a*.

Incomplete.

A work similar in subject-matter to the last.

Beginning:

उक्ता हविर्यज्ञाः—उक्ता(:) पूर्वं सौत्रामण्याः पशुबन्धरूपत्वादुक्तप्राये(या इ)ति; हविर्यज्ञा इत्यविशेषोक्तेः। तेषु प्रायश्चित्तमवश्यंभावे दैवादज्ञानाद्वा प्रमादाद्वा पुरुषस्य भवतीति दैवादज्ञानात् ज्ञानेऽपि प्रमादाद्वा पुरुषस्याशक्त्या वा पुरुषस्यानुतिष्ठतो श्रेषः प्रायेण भवति। न च शास्त्रप्रत्यये कर्मण्यशास्त्रं कर्मशते कर्मेति।

End:

अन्ये त्वाहुः—विच्छिद्यते वा एतस्य यज्ञः। यस्य यज्ञे प्रतते आरब्धे अपरिसमाप्ते अन्तरेतामिष्टिं पाथिकृतिं(तीं)मुख्यां कुर्वन्ति। अत आग्नेय एव पथिकृद्देवत्यः कार्य एधि॥

No. 1084. आपस्तम्बश्रौतप्रयोगः.

ĀPASTAMBAŚRAUTAPRAYŌGAḤ.

Substance, palm-leaf. Size, 15⅞ × 1⅜ inches. Pages, 158. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Āśvalāyanabrahmatva 80*b*, Āpriyā 82*a*, Kuṇḍalēṣṭi 86*a*, Avabhṛtatantra 88*a*, Vaiśvadēvavidhi 95*a*, Sāvitra 99*a*, Agnihōtra 104*a*.

The work under notice contains the Prayōga or ritualistic procedure relating to the following sacrifices;

Darśapūrṇamāsa 1*a*, Ādhāna 39*b*, Agnihōtra 51*b*, Anvārambhaṇīyā 52*a*, Iṣṭi 55*a*, Vaiśvānarēṣṭi 57*a*, Āgrahāyaṇa 58*a*, Paśubandha 60*a*, Payasāgnividhi 78*a*, Gārhapatyānugataprāyaścitta 80*a*.

Beginning :

अथातो दर्शपूर्णमासौ व्याख्यास्यामः—प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः प्राणानायम्य सङ्कल्प्य दर्शेन यक्ष्ये, पूर्णमासेन यक्ष्ये । विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि । अस्मिन्दर्शे अस्मिन्पूर्णमासेऽध्वर्युन्त्वां वृणीमहे ।

End :

सर्वप्रायाश्चित्तङ्करोति अनन्तरं विश्वदानादि ॥

No. **1085.** आपस्तम्बश्रौतप्रयोगः.

ĀPASTMBAŚRAUTAPRAYŌGAḤ.

Substance, palm-leaf. Size, 16⅛ × 1⅜ inches. Pages, 118. Lines, 7 on a page. Character, Telugu and Grantha. Condition, slightly injured. Appearance, old.

Contains the Prayōg aor ritualistic procedure relating to the following sacrifices :

Darśapūrṇamāsa 1*a*, Agnihōtra 25*a*, Paśubandha 30*a*, Anvārambhaṇīyā 47*a*, Pathikṛdvaiśvānarēṣṭi 49*a*, Hautra 49*b*, Vibhraṣṭēṣṭi 50*a*, Āgrayaṇa 51*a*, Hautra 54*a*, Agnyādhāna 55*a*.

No. **1086.** आपस्तम्बश्रौतप्रयोगः.

ĀPASTAMBAŚRAUTAPRAYŌGAḤ.

Pages, 112. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 1050.

Contains the Prayōga relating to Paśubandha 1*a*, Ādhāna 28*a*, Darśapūrṇamāsa 41*a*, Paśumaitrāvaruṇa 61*a*.

No. 1087. आपस्तम्बश्रौतेष्टिप्रयोगः.

ĀPASTAMBAŚRAUTĒṢṬIPRAYŌGAḤ.

Pages, 76. Lines, 8 on a page.

Begins on fol. 108*a* of the MS. described under No. 1051.

Contains the Prayōga relating to the following sacrifices: Mṛgārēṣṭi, Mitravindēṣṭi, Vaiśvānarēṣṭi, Daśahaviṣkāpavitrēṣṭi, Āyuṣkāmēṣṭi, Vrātapatīṣṭi, Hautravaiśvānarēṣṭi, Pavitrēṣṭihautra.

Beginning:

अमावास्यायां पौर्णमास्यां वा प्रातरग्निहोत्रं हुत्वा सङ्कल्पं करोति— अंहआगएनोनिवृत्त्यर्थं दशहविप्रा मृगारेष्ट्या यक्ष्ये । विद्युदादि अमावास्यं त्रम् (स्यातन्त्रम्) अद्य यज्ञाय। इमामूर्जम् । पिष्टꣳ हविः । सप्तदश सामिधेन्यः ।

End:

वपायां श्रप्यमाणायां देव्याश्शमितार आरभध्वम् । एकादश प्रयाजाः ।

* * * *

No. 1088. दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Pages, 70. Lines, 29 on a page.

Begins on fol. 108*a* of the MS. described under No. 1067.

Complete.

The Prayōga herein closely follows the Śrautasūtra of Āpastamba, Praśnas 1—4. It gives the ritualistic procedure relating to the Darśapūrṇamāsa sacrifice.

Beginning:

अथातो दर्शपूर्णमासौ व्याख्यास्यामः । प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति—उपात्तदुरितक्षयद्वारा परमेश्वरप्रीत्यर्थं दर्शेन यक्ष्ये ।

End:

दधिक्राविण्ण इति दधि, यज्ञ शश्च म आयुश्च मे बलश्च मे, यज्ञ-शिवो मे सन्तिष्ठस्व, यज्ञस्विष्टो मे संतिष्ठस्व, यज्ञारिष्टो मे सन्तिष्ठस्व, वृष्टि-रसि वृश्च मे पाप्मानमृतात्सत्यमुपागाम् । ब्राह्मणांस्तर्पयतवै अग्ने नयेत्यादि प्रवसन् काले विहारमभिमुखो याजमानं जपति । दर्शपूर्णमासाभ्यां सोमेन पशुना वेष्ट्वा जपति जपति ॥

No. 1089. दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 71. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are: Paśubandha 37*a*, Ādhāna 51*b*, Paśuhautra 59*a*, Paśumaitrāvaruṇa 62*a*.

Complete.

Same as the last.

No. 1090. दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 37. Lines, 7 on a page. Character, Telugu. Conditon, slightly injured. Appearance, new.

Incomplete.

Begins on fol. 22*a*. The other work herein is Paśubandha-prayōga 1*a*.

Contains fully the Prayōga agreeing with the first Praśna, and breaks off in the course of the second Praśna.

Same as No. 1088.

No. 1091. दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Substance, palm-leaf. Size, 14 × 1⅓ inches. Pages, 117. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Complete.

Begins on fol. 23*a*. This leaf is numbered as 31. The first 22 leaves also contain a portion of this same work.

Same as No. 1088.

No. 1092. दर्शपूर्णमासप्रयोगः.

DARŚAPŪRṆAMĀSAPRAYŌGAḤ.

Pages, 64. Lines, 7on a page.

Begins on fol. 138*a* of the MS. described under No. 23.

Complete.

Same as No. 1088.

End :

